Gyananand.

Siddhāntamuktāvalī. (Dikshit, Nanadi).

114 p.

Language - Sanskrit, Hand written.

Size -

(ओं श्री गणेशाय नमः ओं विश्वेशं ढुंढिराजं - - - - - -

श्री विघ्नध्वंसायनमः श्री रामचन्द्राय नमः)

Note - Without margin.

धाराधरा एव धराधराणां निदाघदाहौघभिदं तनयः तुंगात्मनोऽतुंगतराः न नीचाः मनोरथा

॥ ॥ न्पूरयितुं समर्थाः ॥४॥

॥ वेदान्तसिद्धान्तमुक्तावलीसमाप्ता ॥

॥१२४॥

ॐ

उक्तयुक्त्यात्मज्ञानात्कृतकृत्यत्वसंपन्नेति ग्रंथमुपसंहरति तस्मादिति इति शब्दो ग्रंथसमाप्तौ एवं ग्रंथस्याऽत्वां
नरप्रयोजनमाह भृगुप्रकाशेति तादृक् सिंहदंष्ट्राग्रधरीकृतायेत्यर्थः एतेन वाजिविजयार्थिभिरपीयम
भ्यसनीयेति भावः शेषमतिरोहितार्थं नानादीक्षितसंज्ञेन विदुषेयं निर्मिता सिद्धांतमौक्तिकस्मरणी दीपि
कात्मप्रकाशिका २ विदितसकलवेदैर्ग्रंथग्रंथिलोके ग्रथितमर्थमहद्भिः किं पुनर्मोहशेनदृति विफलस

सं४

तस्माद्यथोक्तप्रकारात्मैकत्वविज्ञानेन कृतकृत्यो भवतीति नात्र विवदितव्यमिति प्रकाशानंदयति
नाकृतिनात्मविशुद्ध्यै सिद्धांतमुक्तावल्येषा रचितार्थप्रबंधवर्जिता सद्वैतानंदसंदोहास्त
तादिलक्षणा नारायणासमासक्त्याश्रयासायत्यदूषिता भृगुप्रकाशरचितां सद्वैतनितिरापत
दो वादीभकुम्भनिर्भेदसिंहदंष्ट्राधरीकृतां वेदांतसारसर्वस्वमज्ञेयमधुनातनैः अशेषेणाममयो
कंतत्पुरुषोत्तमयत्नतः स्नातंतेन समस्ततीर्थसलिले सर्वापि दत्तावनिर्यज्ञानां तु कृतं सह
स्रमखिलादेवाश्च संपूजिताः संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योप्यसौ यस्य ब्रह्म
विचारणे क्षणमपि स्थैर्यं मनः प्राप्नुयात् ॥४॥ ॥इति श्रीपरमहंसपरिव्राजकाचार्य श्रीज्ञाना
नंदविरचिता सिद्धान्तमुक्तावली समाप्ता ॥ ॥संवत् १८९७ भाद्रपदद्वितीयायां भौमवासरे
उपाध्यायनारायणेन नाम्ना श्री हरसा विंदपुर मध्ये स्वपठनार्थं लिखित्वा समाप्तीकृता ॥ शुभं भूयात्

मेऽस्मिन् वाऽस्येहं प्रवृत्तः स्वमतविमलतायै संतु मे संत इति संतः ॥ यदज्ञानादिदं भाति यज्ज्ञानाच्च प्रलीयते त
त्सांतं तदहं नित्यं नित्यसंवित्सुखाद्वयं ॥३॥ अधिकारिप्रविष्टं शमिमं सिद्धांतदीपिका निर्मिता राजतां पाश्चत्य
सानंदप्रदायिनी ॥४॥ इति श्रीपरमहंसपरिव्राजकाचार्य श्रीप्रकाशानंदपूज्यपादशिष्य श्रीनानादीक्षितवि
रचिता वेदांतसिद्धांतमुक्तावली टीका सिद्धांतदीपिका ॥ ॥ श्रीविघ्नध्वंसायनमः ॥ श्रीरामचंद्राय नमः

रचितावेदांतसिद्धांतमुक्तावलीटीकासिद्धांतदीपिका ॥ ॥श्रीविघ्नध्वंसायनमः ॥ श्रीरामचंद्रायनमः

परमेवेति

नचैतद्वाक्यमशुभकर्मनिवृत्तिपरंवाच्यम्कर्मशब्दस्यशुभाशुभसाधारणत्वात् विद्यासामर्थ्यस्यचो
भयत्रतुल्यत्वात् ब्रह्मात्मैकत्वविज्ञानंशाब्दंदेशिकपूर्वकं बुद्धिपूर्वकृतंपापंकृत्स्नंदहति
वह्निवदित्यत्रबुद्धिपूर्वकृतपापस्यापिब्रह्मज्ञानेनदाहस्मरणात् यथैधांसिसमिद्धोग्निर्भस्म
सात्कुरुतेऽर्जुनः ज्ञानाग्निःसर्वकर्माणिभस्मसात्कुरुतेतथा इत्यत्रसर्वशब्देनाशे
षपुण्यपापपरिग्रहत्वात्तस्यसर्वस्यैवज्ञानाग्निनादाहस्यभगवताप्युक्तत्वाच्च किंच यस्यदर्श
नमात्रादन्येषामपिपापक्षयोजायतेकाकथातस्यब्रह्मीभूतस्यपापक्षयेतदाहभगवान्
वशिष्ठः यस्यानुभवपर्यंतंतत्वेबुद्धिःप्रवर्तते तद्दृष्टिगोचराःसर्वेमुच्यंतेसर्वपातकैः तथा
कुलपावित्र्यहेतुत्वमपिब्रह्मविदःस्मर्यते कुलंपवित्रंजननीकृतार्था विश्वंभरापुण्यव
तीचतेन अपारसंवित्सुखसागरेऽस्मिन्लीनेपदेब्रह्मणियस्यचेतः श्रीमच्चंद्रयन

पूर्वपक्षमुपसंहरति तस्मादिति तत्वज्ञानस्याज्ञानवत् कर्मभिरपिविरोधस्याविशेषाद्धर्मा

तस्मादज्ञाननिवृत्तेपिसंसारोननिवर्तिष्यते प्रमाणाभावादितिव्यर्थप्रयासःमेवंकर्मम
लमनर्थानांतच्चज्ञानेनवाध्यन्ते क्षीयन्तेचास्यकर्माणि तथाचश्रुतिशासनंज्ञानेजातेपि
कर्ममूलकःसंसारोनुवर्तिष्यत इत्ययुक्तं तत्र अविद्यावत्कर्मणोपिज्ञानेनवाध्यत्वात्
अविद्यावत्तत्कार्येणापिविद्यायाविरोधित्वाविशेषात् नहिसंभवतिरज्जुसाक्षात्का
रेतदविद्यानिवृत्तौतत्कार्यसर्पोप्यनुवर्तत इति नचयेनाज्ञानमज्ञानस्यैवनिवर्त
कमित्यवधारणंशास्त्रकारणमेवंसत्यःसमंजसमितिवाच्यं अज्ञानकार्यस्याप
ज्ञानानिवर्तकात् तदभावेतत्सत्वानुपलंभात् नचात्रप्रमाणाभावः भिद्यतेहृद
यग्रंथिश्छिद्यन्तेसर्वसंशयाः क्षीयन्तेचास्यकर्माणितस्मिन्दृष्टेपरावरे इतिश्रुतेः

धर्मद्रूपंकर्माप्यनेननिवर्त्तते इतिश्रुतिस्मृतियुक्तिसिद्धत्वादितिपरिहरतिमेवमित्यादिनास्प
ष्टार्थोग्रंथः॥ ॥ ॥

एवंच जीवन्मुक्तिरपि मम प्रसिद्धा इत्याह एवंचेति तत्त्वज्ञानावस्थायां शरीरं बाध्यमिति किं वक्तव्यं तत्त्वज्ञा
नात्प्राक् अपि द्वैतप्रपंच प्रतिभासो यो मम आऽभूत् तस्याप्याश्चर्यमेवेदानीं मम वर्तत इत्याह आश्चर्यमिति
ननु किमत्राश्चर्यं श्रोतृबोधः पूर्वं बाधको नाभूत् इदानीं चेन्नबाधितः इति तत्राह किमिमा इति एवमित्याद्युप
सहरत्येताग्रंथः ॥ स्पष्टार्थः ॥ ननु ज्ञानादज्ञानाद्वा न निवृत्तावधि संसारः ॥ श्रीरामचंद्रायनमः ॥ ॥

एवंच जीवनमिव प्रतिभासनं च निःशेषसाधिगममनं च मम प्रसिद्धं आश्चर्यमद्य मम भाति कथं हि
तीये नित्ये निरस्तनिखिलेशिवचित्प्रकाशे आसीत्सुरेति किमिमाः श्रुतयो न पूर्वं येन द्वितीय
मभवत्त्विमिरप्रसूते एवं शास्त्राचार्यप्रसादात्परोक्षीकृतजीवब्रह्मैक्यस्य तत्त्वस्य गुरुभक्त्यामिनयो
पिस्मर्यते अतोपीयं विद्या जायते एवं तथाहि त्वत्पादपंकजसमाश्रयणं विना मे सन्न पर
मन्निधपरः पुरुषः पुरासीत् त्वत्पादपद्मयुगलाश्रयणादिदानीं नासीन्न वास्ति न भविष्यति
पा॰ भेदबुद्धिः यस्मात्कोपरवधो मम दुःखिकिल संसारबोधमपनेतुमसि प्रवृत्तः त्वत्पादपंक
जरजः शिरसादधानस्त्वामाशरीरपतनादहमप्युपासे ननु विद्यया विद्योपमर्देऽपि कथं संसार
स्यहलोकपरलोकसंसारलक्षणस्य नानाविधध्यानिप्राप्तिपरिहाराभ्यां अनेकविधदुःखसंकु
लस्य निवृत्तिः स्यात् तद्धेतोः कामकर्मादिलक्षणस्य सत्त्वात् न चाविद्यानिवृत्त्या तदुपादेयस्या
पि निवृत्तिरावश्यकी तिवाच्यं वैशेषिकाणां समुपादेनिवृत्तेपि इतरांकार्यावस्थानवदनिवृत्तेश्च ति
कायांकुरप्रदं शत्वात् न च दृष्टान्ते नेन्द्रियरूपैवेति न दोषः तत्रतण्डकुत्तरदंडोपानुपपत्त्यभावव
स्यानुमातुं शक्यत्वात् ॥

कथं निवर्तते तस्य कर्मजन्यत्वात् तस्य च विद्यमानत्वात् इति शंकते नन्विति ननु कर्मणोपादानं प्र
पंचस्य किंत्वविद्यासा चेत् ज्ञानान्निवृत्ता तन्मूलः संसारोपि निवर्त्स्यति इत्याशंक्य परिसिद्धदृ
ष्टान्तेन परिहरति न चेत्यादिना ॥ श्रीरामचंद्रायनमः ॐ शारदायैनमः ॐ नमः परमात्मने ॥

यत्नतः संपाद्यत्वे हेतुमाह तदभावइति इहेतिपदं पूर्वार्द्धे स्थितमत्रापि योजयित्वा श्रुतिं पठन्ति इहेति इह सं
सारमंडले ब्रह्मात्मत्वेन न चेदिहाविदितवन्तो न वेदितवन्तो ऽहमवेदिः साक्षात्कृतं हि ततः को दोषस्तत्राह महतीति
विनष्टिरिति जन्ममरणादिलक्षणानंतपरिणामा विनष्टिः स्यात् तस्मादवश्यमात्मसाक्षात्कारः सं
पादनीय एवेत्यर्थः तत्त्वज्ञाने सति संसारो निवर्तत एवेत्यत्र विद्वदनुभवमपि प्रमाणयन्ति उत्पन्ने चे
ति कारणादिकोपादानात्मराशेर्विविच्य केवलब्रह्मात्मानुभवो मम संपन्नः संसारश्चासन्निहित इत्यर्थः
तथापि जीवनाभासोऽप्यनुवर्तत इत्याह पश्यामीति न च तावता मुक्तेः किंचिद्वैकल्यमित्याह तिस्रामीति

तदभावे यतो महती विनष्टिः श्रूयते इह चेदवेदीदथ सत्यमस्ति न चेदिहावेदीन्महती वि
नष्टिरित्यग्र उत्पन्ने च ब्रह्मात्मज्ञाने विधुतपापकलेन सह विशोकाऽहारः स्मर्यते विद्याविद्ब्रह्म
ग्रहेणापिहितं प्रपंचमुच्चैरुल्लसन्मुखं ह्यात्मपूर्वं समुन्निधिया मुञ्जादिषीकामिव कोशात्का
मः॥ र्यकारणात्ववविकल्प्यात्म पश्यामि निःसंशयं नासीदस्ति भविष्यति कनुगतः संसारदुःखा
दधिः पश्यामि चित्रमिव सर्वमिदं द्वितीयं निस्त्रामि निष्कलं चिदेकवपुषं नेन आत्मानम
द्वयमचिंत्यसुखैककंपं पश्यामि दग्धरशनामिव च प्रपंचं अद्वैतमप्यनुभवामि करस्थविल्व
तुल्यं शरीरमहिनिर्ल्वयिनीव वीक्षे ॥ ॐ नमः कमलदलविपुलनयनाभिरामाय ॥ श्री ॥

ननु संसारदर्शनब्रह्मदर्शनयोर्विरुद्धत्वात्कथमेककालावस्थानमितित्तत्राह दग्धरशनामिवे
ति अद्वैतदर्शनेन द्वैतप्रपंचो बाध्यते एवेत्यर्थः विपरीतशंकां प्रत्याह अद्वैतमपीति अद्वैतानुभ
वस्य न कदाचिदपि पारोक्ष्यं यथा परित्यक्ताहिनिर्मोको हि भासते एवं संसारं बाध्यमपि सत्तृ
ति भासत इत्यर्थः स्वभावपरित्यागापत्तेः न विपरीतशंकेति भावः ॥ ॐ नमः परमात्मने ॥

४

अत्रहेतुमाह॰ तद्धैतदिति तद्ब्रह्मएतत् अहमितिपश्यन् साक्षात्कुर्वन् एतस्मादेवदर्शनादृषिर्नामतो
वामदेवः प्रतिपेदेहकिलज्ञानफलंसर्वभावापत्तिप्रतिपादकान्मंत्रान् ददर्शेत्यर्थः यथाभुंजनतृप्ती
त्युक्तेभुक्तितृप्त्योर्मध्येकार्यांतरंनप्रतीयते तथात्रपश्यन्नेवप्रतिपेदे इत्यत्रापिदर्शनसर्वभावापत्त्यो
र्मध्येकार्यांतरप्रतीतिर्वर्तमानार्थशतृप्रत्ययनिर्देशेननास्तीत्यर्थः यद्वाब्रह्मवेदत्वेदेवब्रह्मभवतीति
ब्रह्मभवनवेदनयोरेककालत्वप्रतीतेः कालविलंबोपिनास्तीत्यर्थः कर्मैवमुक्तिसाधनमितिपराचे
ष्टे तमेवेति नचस्मृतिविरोधः संसिद्धिशब्देनतत्त्वज्ञानस्यैवोक्तत्वात् कषायकर्मभिः पक्वेततोज्ञानं

तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेब्रह्मविद्ब्रह्मैवभवति तरतिशोकमात्मवित् इत्यादिश्रु
तिभ्यः आत्मज्ञानतत्फलयोः समानकालत्वनिर्देशात् मध्येसाधनांतरकालविलंबयोर
भावप्रतिपत्तेः तमेवविदित्वातिमृत्युमेतिनान्यः पंथाविद्यतेऽयनायेत्यादिसाधनांतरप्र
तिषेधश्रवणाच्च तस्मात्संन्यासात्तत्त्वज्ञानमेवामृतत्वसाधनंयत्नतः संपादनीयम्॥ = ॥

प्रवर्त्तते इत्याद्यागमात् कर्मणांतत्त्वज्ञानसाधनीभूतांतःकरणशुद्धिहेतुत्वप्रतीतिः एतेनसमुच्च
यप्रतिपादकवाक्यविरोधोपिपरास्तः तत्रैववाक्यशेषेणव्याख्यामस्तुनिवर्तकत्वमेवाविद्याश
द्वाच्यानांकर्मणांप्रतीयतइतिज्ञानमेवमुक्तिफलमितिसिध्यति यदाचैवंतदावश्यंसंसार
भीरुणातन्निवृत्तेसाधनेश्रवणादिसाधनैः संपादनीयमित्युपसंहारव्याजेनाह॰ तस्मादिति
तस्मात्त्यागएवहिसर्वेषांमुक्तिसाधनमुत्तममितिप्रागाश्रमाश्रित्याह॥ संन्यासेति॥श्रीराम

नन्वेतादृशात्मज्ञानं यदि भवेत्तदा घटादिज्ञानवदुपलम्भेत साधनाभावान्न जायते इति चेन्न तत्साधनस्य श्रुतेः सत्वा
त्तेतान जायते एवैतादृशं ज्ञानमिति नेत्याह नचेति नच सांप्रतमिति ज्ञायौवदनं अनुपलंभविरोधप्रत्याह न
वृत्त्यतीति उत्पद्यमानस्य ज्ञानस्य प्रपश्यन् प्रतिपेदे यो यो देवानां प्रत्यबुध्यत इत्यादिश्रुतिभिर्दर्शनात् नानुपलं
भविरोध इत्यर्थः यत्तु सत्यपि साधने ज्ञानं न जायत इति तदप्ययुक्तमित्याह साधनेति वेदान्तवचनादि नोत्प
न्नविविदिषोनित्यानित्यवस्तुविवेकादिसाधनचतुष्टयेनाथशब्दसूचितेन संपन्नस्याधिकारिणो गुरूप
दिष्टमहावाक्यविचारानेन तं ज्ञानोत्पत्तिदर्शनात् कथं तर्हि संसारात्तु हृतिः श्रुतवेदान्तानामिति

नचैतादृशात्मज्ञानं न जायत इति सांप्रतं साधनचतुष्टयसंपन्नस्य विविदिषोर्मनननिदिध्यासनाभ्या
मुपकृतश्रवणानुष्ठानसमनंतरमेतदुत्पत्तिदर्शनात् अन्यथा तादृशात्मप्रतिपादकागमाप्रा
माण्यप्रसंगः नच ज्ञानमपि ज्ञानं साधनान्तरापेक्षया फलदानाय विलंबितमिति वाच्यम् ॥ ॥ ॥

तत्राह मननेति असंभावनाविपरीतभावनानिवर्तकमननाद्युपकृतात् वाक्यविचाराच्छक्तितात्पर्यग्रा
हकानुकूलव्यापारादनुष्ठितात् दृष्टिवद्ज्ञानं जायत एवेत्यर्थः ननु ज्ञानान्मुक्तिरिति कोर्थः किं ज्ञानमे
व मुक्तिसाधनं उत ज्ञानमपि नाद्यः विद्यां चाविद्यां चेत्यादिसमुच्चयप्रतिपादकवाक्यविरोधात् नहि
द्वितीयः कर्मणैव हि संसिद्धिमास्थिता जनकादय इत्यादिवचनेत्याह नचेति समुच्चयपक्षमत्रप
राकरोति नचवाच्यमिति ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

यस्माद्वैतं तद्दर्शनं च तुच्छत्वादसत् तस्मादात्मनो दृष्टद्वयत्वमुपपन्नतरमित्युपसंहरति तस्मादिति द्वै
तस्य विवर्तत्वेनोपपन्नं इदानीं प्रपंचस्य तुच्छत्वं उपपन्नतरमित्यर्थः अदृष्टद्वयमेवात्मतत्त्वमित्यत्र श्रुतिप्र
माणयति तथा चेति श्रुतिरात्मनो द्वैतदर्शनशून्यत्वमेवाहेत्यन्वयः निरोधः प्रलयः वैदिककर्मानुष्ठा
नसाधकः निःकलं निरवयवं निर्विकल्पं विशेषानात्मकं अजममचिंत्यादि तच्छुद्धलक्ष्यं ब्रह्माहमिति
साक्षात्कृत्य ब्रह्मणः स्वयं ध्रुवमविचालिकूटस्थात्मको भवति अनंतमजं ज्ञानमप्रत्तद्रहितं हेतुवर्जितं स्व

तस्माद्वैतद्दर्शनयोस्तुच्छत्वात् स्वतःसिद्धशुद्धबुद्धमुक्तपरिपूर्णानंदात्मनोऽदृष्टद्वयत्वमुपपन्नत
रं तथा च श्रुतिः न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता
तदेव निःफलं ब्रह्म निर्विकल्पं निरंजनं तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म संपद्यते ध्रुवं निर्विकल्प
मनंतं च हेतुदृष्टांतवर्जितं अप्रमेयमनादिं च यज्ज्ञात्वा मुच्यते बुधः इत्येवमादिका श्रुतिरात्मनो द्वैतदर्शनशू
न्यत्वमाह तस्मात्तु सत्यं ज्ञानमनंतं च पूर्णमानंदविग्रहं मात्रावर्णिकमात्मानं विनिश्चित्य विमुच्यते ॥

यमकार्यदृष्टांतवर्जितं अनुपमं स्वतुल्यरहितं एतेन सजातीयभेदः परास्तः कारणत्वं प्रतिषेधति अ
नादिमिति इति स्वरूपमात्मत्वेन साक्षात्कृत्य मुच्यते अविद्यातत्कार्यरहितो भवतीत्यर्थः भवत्वेवमा
त्मतत्त्वं [illegible]ह किं तत इत्यत्राह तस्मादिति यस्मादिदं वास्तवं वृत्तं तस्मात्सत्यज्ञानमनंतं ब्र
ह्मेति मंत्रवर्णसिद्धं सत्यादिस्वरूपमात्मानं स्वमभिन्नं विनिश्चित्य साक्षात्कृत्य विमुच्यत इति तज्ज्ञा
नफलं स्वस्वरूपप्राप्तिरित्यर्थः ॥

तस्य पुरुषार्थत्वमाह प्रपंचेति प्रपंचाभावरूपत्वेन तदोपपद्यते यदि प्रपंचोऽसद्रूपो भवेत् असदभावस्य भावरूपत्वात् तं
न विजातीयभेदनिराकृतिः तस्य सुखरूपतामाह शिव इति सजातीयभेदं निषेधति अद्वैत इति तेन अज्ञातार्थापत्तिः
प्रपंचस्यात्र कालिकाभावं बोधयतीत्यर्थः न चैवं प्रपंचस्य प्रामाणिकत्वं आभासोपस्थितस्याप्यभावप्रतियोगि
त्वोपपत्तेः अन्यथा न सुरां पिबेदित्यादौ सुरापानस्यापि प्रामाणिकत्वं किं न स्यात् अभिमन्यते इति वदतां समन्व
यविरोधोऽपि निरस्तः अन्यथा विधिवाक्यानां सिद्धे वस्तुनि स्यात् इत्यात्मसिद्ध्यर्थमेव प्रपंचतुच्छत्वानुमानमिति न चो

8

प्रपंचोपशमः शिवोऽद्वैत इत्येवं प्रकारिका सजातीयविजातीयस्वगतभेदशून्यमात्मानं बोधयंती आत्माति
रिक्तस्य सर्वस्य तुच्छत्वमभिमन्यते तद्व्यतिरिक्तस्य कथंचिदपि सत्त्वे द्वैतव्याघातप्रसंगात् तस्मादागतः
श्रुत्यनुमतमेव तदुक्तं गौडैः तुच्छाऽनिर्वचनीया च वास्तवी चेत्यसौ त्रिधा ज्ञेया माया त्रिभिर्बोधैः श्रौतयौ
क्तिकलौकिकैः वशिष्ठोऽपीममर्थमाप्रथयदाह अहो नु चित्रं यत्सत्यं ब्रह्म तद्विस्मृतं नृणां यत्तस्या
मविद्या ख्यातं तत्सुरः परिवल्गति तथा अहो नु चित्रं पद्मोत्थैर्बद्धास्तंतुभिरद्रयः अविद्यमाना याविद्या तया

पि विश्वं तोध गंध इति ननु किमिति तुच्छत्वमेव विवेद्यते उपात्मस्वरूपस्य प्रपंचमिथ्यात्वेनापि [illegible] तिहृत
तेरिति नेत्याह तदतिरिक्तस्येति कथंचिदपि मिथ्यात्वेन वास्तवत्वेन वेत्यर्थः कथं तर्हि विवर्तवादादिस्वीका
र इत्याशंकां परिहरन्नुप संहरति तस्मादिति एवकारो भिन्नक्रमः तुच्छत्वपदेन संबध्यते तेन श्रौतं तु
च्छत्वमेव विवर्तादिवादस्यायुक्त्यादिमूलत्वात् तदपि विवर्तादि अधिकारिभेदेन न विरुध्यते इत्यर्थः उपात्म
र्थं वृद्धसंमत्याऽस्योपपत्तिं तदुक्तमिति वास्तवी परिणामरूपा तस्याः वेदांतवादस्य प्रथमसोपानत्वात्
एवं प्रपंचस्य तुच्छत्वे श्रुतिमुपपत्तिं च प्रदर्श्य स्मृतिमपि तत्र संवादयति वशिष्ठोऽपीति अग्राः सन्त्वमित्युपजीव्यते ॥

ॐ

ॐ

वे॰मु॰टी

१९

ननु वक्तृभेदेन व्याख्यासंभवात् न सर्वे पक्षाः प्रामाणिका एव तथा सति परस्परविगानात् को वा परीक्षकः किं
मतं चोपादेयं किं वा हेयमिति नियामकाभावादेकस्याप्यनुपादानं स्यादित्यत आह नचेति परीक्षकत्वे
पक्षस्य चोपादेयत्वे विनिगमकं शङ्कते नित्येति स्ववाक्ये विरुद्धगोति यस्य हीति त्याज्यत्वे सिद्धांत्यभिमत
दृष्टांतमाह यथेति तुच्छत्ववाद्याद्दृष्टं न तर्हीति ननु अप्रामाणिकत्वमसिद्धं प्रत्यक्षादिप्रमाणमूलत्वा
दित्यत पक्षस्य त्याशंक्य हेत्वंतरमाह श्रुतिविरुद्धत्वादिति तथाच प्रत्यक्षादि श्रुतिविरोधे अप्रामाणी

तावत्ताप्येकेकांगीकारस्यात्रतमाध्याहृतत्वात् तुच्छत्वेतद्भावात् नचात्रापि मयांगीकारोस्त्येवेति
वाच्यं तथा प्रामाणिकत्वात् तुच्छत्वग्राहकप्रमाणाभावात् नच परीक्षकाणामपि परस्परविरुद्धानाम
ध्येकस्य मतं समीचीनं कस्यासमीचीनमिति विनिगमकाभावात् एकमपि न ग्राह्यमिति वाच्यं मूलि
त्यनिर्दुष्टवेदमूलकत्वभावाभावाभ्यां विशेषात् यस्य हि मतं वेदमूलं न ग्राह्यं यस्य तु तन्नास्ति न त्या
ज्यं यथा पाखंडानां मतं हंतत्तर्हि तत्तोपिगत्वाच्छ्रुत्येव विश्वासस्यात् श्रुतिसिद्धमेवमतं मदुक्तं ग्रा
ह्यमिति नदितरग्राह्यमेव प्रामाणिकत्वात् श्रुतिविरुद्धत्वाच्च श्रुतिरुसदेव सोम्येदमग्र आ
सीत् एकमेवाद्वितीयं नेह नानास्ति स एष नेति नेति अथात आदेशः मात्रश्रुत्यर्थाः अव्यवहार्याः

भवन्तीत्यर्थः ननु न श्रुतिः प्रपंचस्य साक्षात् तुच्छत्वं परा आलि समन्वयाधिकरणाविरोधात्तत्राह
श्रुतिस्त्विति श्रुतिरात्मातिरिक्तस्य सर्वस्य तुच्छत्वमभिमन्यत इत्यन्वयः श्रुतीरुदाहरति सदेवेत्या
दिना मीयंते इति मात्राः मत्रा भ्योऽन्योऽमात्रः अप्रमेय इति यावत् अथवा मात्रा एकदेशोऽवयव इत्य
इति तेन स्वगतभेदनिषेधसिद्धिः तुर्य एव चतुर्थशब्दार्थः अव्यवहार्यः अभिवदनादिव्या
पाराविषय इत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

राम

१९

कृतिसिद्धात्मस्वरूपानुरोधेनैतस्य तुच्छत्वमुक्तं तदुपपादयितुं शंकते नन्विति लौकिकाः अशास्त्र
संस्कृतमतयः शास्त्रसंस्कृतमतयः परीक्षकाः एकमत्याभावमुपपादयन्ति सर्वशून्यवादिनेत्यादिना
तद्विरुद्धस्य शून्यत्वविरुद्धस्यानित्यस्य सार्वदिकं सत्त्वमनित्ये कादाचित्कमिति विभाग इत्यर्थः द्वैविध्यं सत्त्ववि
रुद्धं सांख्यादिमतमित्याह तद्विरुद्धेति विरुद्धत्वमेवाह सर्वदा सर्वसत्त्वस्येति सत्कार्यवादस्वीकारान्न
न्ततावत् प्रागसत्त्वं वर्त्तमानकाले सत्त्वादेवनाशत्वं ध्वंसस्य चेति रोधानमात्रत्वादनन्तसामर्थ्यवस्था
यां

नचात्मभिन्नस्य जगतस्तद्दर्शनस्य च तुच्छत्वं लौकिकानामभिमतं परीक्षकाणां वा नाद्यः तेषामबाधित
त्वबुद्धेरुत्पत्त्या व्याहतत्वात् तुच्छत्वस्यानिर्वचनीयत्वात् नेतरः परीक्षकाणां सर्वेषामैकमत्याभावात्
सर्वशून्यवादिनानिषेधप्रमाणप्रमेयापत्त्यापित्ताः प्रामाणिकैर्नाशेषस्य तुच्छत्वस्वीकारात् तद्विरुद्ध
स्यानित्यानित्यविभागेन सार्वदिककादाचित्कसत्त्वस्याक्षचरणकणभुगादिभिः स्वीकारात् तद्विरुद्धस्य
च सर्वदा सर्वसत्त्वस्य सांख्यादिभिरभ्युपगमात् तस्मात्परीक्षकाणां सर्वेषां परस्परविप्रतिपत्ते
रत्यन्तविरुद्धस्य तुच्छत्वमसंप्रतिपन्नमेव तथा च लौकिकपरीक्षकविरुद्धं जगतस्तुच्छत्वं कथमं
गीकारपथमारोहति नच परीक्षकाणां मतमपि बहुत्वेके परस्परविरुद्धत्वात् अयाहेयमेवेति वाच्यं

सत्त्वात्सर्वदा सत्त्वमिति सांख्यमतं तथा पातंजलादीनां संग्रहाय आदिपदं तुच्छत्वासंप्रतिपत्तेः फ
लमाह तथा चेति तत्र तत्रेति शून्यत्वस्य सर्वदा सत्त्वकादाचित्कसत्त्वपक्षद्वये तदभावादिति एके
कांगीकारस्याप्यभावादित्यर्थः तुच्छत्वेऽपि परीक्षकांगीकाराभावोऽसिद्धः समयपरीक्षकस्य तत्रांगी
कारसत्त्वादिति नेत्याह नचात्रापीति परीक्षकासंमत्या परिहारे हेतुमाह तदेति प्रमाणेन परीक्ष्य
व्यवहर्त्ता परीक्षकः नेच तुच्छे प्रमाणमस्ति तत्सत्त्वे तुच्छत्वहानेरिति हेतुमाह तुच्छेति ॥ श्री ॥

द्वैतदर्शनप्रसक्तिस्तस्य दोषत्वादित्युक्तं तदादाय शङ्कते ननु द्वैतदर्शित्वमिति धर्मपक्षं दूषयति
नाद्य इति धर्मः सन्नसन् वा नान्त्यः असतो वन्ध्यासुतस्य धर्मत्वादर्शनात् संश्चेद् द्वैतापत्तिरित्या
ह द्वैतापत्तेरिति द्वितीयदर्शने द्वैतं विशेषणमेव वाच्यं अपलक्षणत्वे दर्शित्वमेवात्मस्वभावः
स्यात् तच्च स्वदर्शित्वेनाप्युपपन्नं द्वैतपदं व्यर्थं स्यात् तथा च द्वैतविशिष्टदर्शित्वस्य स्वभावत्वे स्वप्रका
शत्वं द्वैतस्यापि स्यात् इति दूषयति नेतर इत्यादिना द्वैतस्यात्मस्वभावत्वे स्वतः सिद्धिः स्यादित्युक्तं न

ननु द्वैतदर्शित्वं किमात्मनो धर्मः स्वभावो वा नाद्यः द्वैतापत्तेः नेतरः द्वैतजातस्य सर्वस्य स्वतः
सिद्धिप्रसंगादिति चेन्न अतिदृष्टात्मस्वरूपानुरोधेन द्वैतजातस्य सर्वस्य तुच्छत्वात् न हि तु
च्छस्य स्वतः सिद्धिः संभवति तस्य निरस्तसमस्तसामर्थ्यस्य स्वतः परतो वा सत्त्वमशक्यत्वात्

तदनुपपन्नं किमात्मस्वरूपमिति कृत्वा स्वप्रकाशत्वमापाद्यते किं वा स्वातन्त्र्येण नाद्ये
इष्टापत्तिरात्मनः स्वप्रकाशत्वस्य सिद्धत्वात् द्वितीये निवृत्तं च निवर्तत इति श्रुत्यात्मभिन्न
स्य तुच्छत्वबोधनात् पूर्णप्रतिपादकवाक्यसिद्धपूर्णात्मस्वरूपानुपपत्त्या च द्वैतस्य तुच्छत्वात् स्व
तो वा परतो वा सिद्ध्यनर्हत्वादिति नेति प्रतिज्ञायां हेतुमाह अतीत्यादिना ॥ श्रीवासुदेवाय नमः
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

नन्वजगतोऽद्वयंतासत्वं तन्निवर्तकं च शास्त्रं इत्येतत्तत्किंते नत्नुप्रमितमिति चोद्यं परा कुर्वन् शास्त्रस्य सार्थकत्वेन प्रामा
ण्यमुपसंहरति तस्मादिति श्रुतेरर्थान्तरशंका निवर्तकं संक्षेपशारीरकवाक्यमुदाहरति नित्यबोधेति बोधपीडिते
बोधमहिम्नात्रासदित्यर्थः इममेवार्थं स्पष्टयति जगदात्मकस्येति किंच शास्त्रस्यानर्थकत्वेनाप्रामाण्यापादने द्वैतवादिने
प्रतिवाच्याद्वैतेषामुपालंभेपि ब्रह्मात्मैक्यवादिनं प्रतितदापादनस्यायोगात् द्वितीयेत्वस्माति रिक्तेन किंच नापि स
दिति कुत्राप्रामाण्यमापादयतेत्याह किंचेत्यादिना स्वनभ्युपगमादित्यंतेन वेदप्रामाण्यानंगीकारेपाखंडत्वाप
त्तिमुद्धरति नचेति वस्तुतस्तु पाखंडत्वमात्मातिरिक्तमन्यंतासद्वैतितदापादनमेवाद्वैतवादिने प्रतिनयुज्यत इति

तस्माद्विमुक्तश्च विमुच्यते निवृत्तं च निवर्तत इत्यादिशास्त्रादद्वयंतासत्वं तत्कारणनिवर्तकत्वेनैव शास्त्रप्रामाण्यं
नित्यबोधपरिपीडितजगद्विभ्रमं तुदितिवाक्यमिति वासुदेवनिहितं धनंजयो हंति कौरवकुलं यथापुनरि
तिस्मृतिरपि जगदात्मकस्याविभ्रमस्य नित्यबोधस्वभावस्यात्मनः स्वरूपयथात्मत्वात्तन्नासत्वमेवाह किं
चन्नस्यातिरिक्तं शास्त्रं सत्वमस्तीति ये मन्यंते तान्प्रतिभवतु शास्त्राप्रामाण्यप्रसंगो दोषः तस्य प्रमाणैक
स्वभावत्वात् येतुमन्यंते सदाद्वैतमेवास्ति द्वैतं वर्तते नभिन्नात्मान्प्रतिकथमयं दोषः स्यात् ते
शास्त्रस्यावास्तवप्रामाण्यस्य वाद्वयातिरिक्तस्यानभ्युपगमात् अयमथाताभ्यामेवाद्वैतकृतिः स्यात् नचवे
दप्रामाण्यानभ्युपगमे पाखंडत्वप्रसंगः तद्प्रामाण्यस्याप्यनभ्युपगमात् नचवेदप्रामाण्यानभ्युपगमेऽद्वैत
स्याप्रामाणिकत्वप्रसंगदोषः द्वैतदर्शनं प्रतिप्रमाणाधीनसिद्धिकेष्वात्मनि च तस्य दोषत्वात्॥ ॥ ॥

नन्वेवं प्रामाण्यानंगीकारेपि तन्त्रप्रामाण्यमनंगीकृत्य येन तेन वा स्वाद्वैतं साधयति द्वितीयेब्रह्मात्मैक्यासिद्धिः
प्रमाणाभावादितिनेत्याह नचेति किमेतद्वोद्यं द्वैतदर्शनं प्रतिउताद्वैतदर्शिनं प्रतिनाद्य इत्यादि किं नंछिन्नं
द्वितीयेप्रमाणप्रमेयभावस्यैवासिद्धिः यत्रत्वस्य सर्वमात्मैवाभूदितिश्रुतेः किंच प्रमाणं किमर्थमग्य
ते प्रतीत्यर्थे चेत्तन्न स्वप्रकाशत्वे नापिनास्तिद्धेः अज्ञाननिवृत्त्यर्थे चेत्तथाप्यद्वैतस्य सिद्धत्वेन तत्प्रा
नपेक्षणात् नतस्याप्रामाणिकत्वप्रसंगइत्यर्थः ॥ ॥ ॥ ॥ ॥ ॥

आत्मनि द्वैतदृष्ट्यभावं प्रमाणयति तथा चेति श्रुतिः पूर्वमेव आख्याता तत्रैव प्रमाणान्तरं वाक्यान्तरमुदाहरति वातात्मनीति
वातप्तदेशव्याख्यातं कृति न उत्तमार्थकारिण इति यावत् सविता सन्ततमहरेकाकिकामेत्यदि तत्त्वमस्यादिवाक्यं वेद्यपर्यशंक
ते नन्विति तत्त्वमस्यादिवाक्यं हि किं प्रत्यग्ब्रह्मणोरैक्यं भासयति उत तदज्ञानादि निवर्तयति नाद्यः तस्य स्वप्रकाशत्वात् न
द्वितीयोऽत्यंतासतो नित्यनिवृत्तत्वात् तथा चेषां स्वार्थे सार्थकत्वाय द्वितीयपक्षमाश्रित्य परिहरति नेत्यादिना नासीदेति
भविष्यतीत्याकारबाधोत्पादकत्वमेव संसारनिवर्तकत्वं न तु स्वतः ध्वंसस्तस्य पूर्वं निराकृतत्वात् तदपि संसारनिवर्तकत्वं

तथा च श्रुतिः यद्वै तन्न पश्यति पश्यन्वै तन्न पश्यतीत्यादि आत्मनोऽविलुप्तदृष्टिस्वभावस्य द्वैतदर्शनं वारय
ति वातात्मनीति विवर्तोऽयं ब्रह्मणः सकलं जगत् अविवर्तितमानंदमास्थितः कृतिनः सदेति स्मृतिरपि आत्म
नो द्वैतदर्शनाभावमनुमन्यते नन्वात्मनो द्वैतदर्शनाभावे नित्यमुक्तस्य संसारिणः शास्त्रश्रवणप्रयोज
नमस्य तथा शास्त्रानर्थक्यप्रसंग इति चेत् न नित्यमुक्तस्यासंसारिणः अत्यंतासत्संसारनिवर्तकत्वेन शास्त्र
प्रामाण्योपपत्तेः अत्यंतासतो नित्यनिवृत्तत्वात् तन्निवृत्त्यर्थं शास्त्रव्यापारोऽनर्थक इति चेत् न सत्यस्यापि तुल्यत्वात्
न हि सन्निवर्तयति शास्त्रमिति क्वचिद्दृष्टं अनिर्वचनीयं निवर्तयति तु शास्त्रमिति चेत् न तत्राप्यदर्शनस्य तुल्यत्वा
त् न ह्यनिर्वचनीयं निवर्तते इत्युभयसम्प्रतिपन्नस्थलमस्ति ॥

प्रत्यक्ब्रह्मैक्याकारापरोक्षवृत्त्युत्पादनद्वारेति भावः अभिप्रायमविद्वानाशंकते अत्यंतासत इति अत्यन्तानिव
र्तकत्वं चेत् तत्किं सन्निवर्तकमुच्यते उतानिर्वचनीयं नोभयथापीति सहेतुकमाह न सत्यस्यापीत्यादिना स्थलम
स्तीत्यंतः स्पष्टार्थो ग्रन्थः ॥

असत्त्वेति असत्त्वं मिथ्येत्युक्ते गगनकमलादावतिव्याप्तिस्तन्निवारणाय कदाचित्प्रतीयमानत्वमिति कदाचित्कप्रतीतिविषयत्वमिति
यावत् प्रतीतिरत्रापरोक्षा विवक्षिता असत्त्वं नाम सद्भिन्नत्वम् एतत्कदाचित्कप्रतीतिविषयत्वं इतिव्याप्यत्वेनातस्य प्रसक्तौ तत्र दर्शयितुं विशिन
ष्टि असत्त्वाविशेषेपीति कदाचिदिति स्वरूपकीर्तनं व्यावर्त्याभावात् सद्भिन्नत्वे सत्यपरोक्षप्रतीतिविषयत्वमित्येतावतैव चरित
र्थत्वात् इति त्रैकालिकासत्त्वप्रतीतिमिथ्यात्वमित्याद्यपक्षे मिथ्यापक्षं दूषयति नाद्य इत्यादिना द्वितीयं मिथ्यात्वलक्षणं दूषय
२० ति न द्वितीय इति तत्रेष्टत्वहेतुः स्वप्रतीत्येति अयं भावः स्वरूपाकारप्रतीतेर्मिथ्यात्वनिर्वचनात् प्रतीतिविषयकप्रतीत्यन्तरमवश्यं
वाच्यं प्रतीतिकर्मत्वघटितत्वाच्च लक्षणस्य तथा च तदपि प्रतीत्यन्तरं किं मिथ्या उत पारमार्थिकं उत तच्छुना इति नाद्यः अनव

किमिदं मिथ्यात्वं त्रैकालिकासत्त्वं असत्त्वाविशेषेऽपि कदाचित्प्रतीयमानत्वं वा नाद्यः इष्टापत्तेः न द्वितीयः त
त्प्रतीत्येवाद्वैतव्याघाते स्यादवस्थानात् सादेवातत्प्रतीतिरिति चेन्न तस्यासंगत्वात् असंगो ह्ययं पुरुष इति श्रुतेः
साक्षित्वात् कदाचित्कत्वानुपपत्तेश्च किंचात्मनो दृष्टत्वं दृष्टिः प्रमाणसिद्धा वा नोतिसिद्धा वा नाद्यः अद्वैतागम
विरोधात् नेतरः अंतःसिद्धपदार्थस्यासत्त्वनियमात् अन्यथा अंशान्तित्वानुपपत्तेः तथा चात्मनो दृष्टत्व दृष्टिः
कदाचिदपि नास्त्येव ॥

प्रतीतिरित्यर्थः अस्याः प्रतीतेर्मिथ्यात्वनिर्वाहाय

स्यापत्तेः नान्त्यः तद्धद्वैतव्याघात प्रतीतेरपि तत्त्वापत्तेः नापि मध्यमः द्वैतापि तद्विषयकं प्रतीत्यन्तरं स्वीक्रियते न चानवस्था
प्रतीत्यन्तरस्यासत्त्वादिरूपत्वात् स्वप्रकाशत्वात् नापि द्वैतापत्तिः तस्य वादेवेति शंकते सादेवेति साक्षिप्रवृत्ता विद्यावृत्त्या
रूढं चैतन्यमुच्यते उत्तरं श्रुत्या नाद्यः विशिष्टस्य मिथ्यात्वात् परमार्थिकत्वे विशेषणस्य चैतन्यस्य पारमार्थिकत्वप्रसंगः तथा चा
नवस्थानादवस्थानं च वृत्तिप्रतिबिंबितचैतन्यं स्वस्वरूपवृत्तिं च भासयिष्यति स्वप्रकाशत्वादिति वाच्यम् प्रतीयमानत्वस्य च
न प्रतीतिकर्मत्वस्य उच्यमानत्वात् असेदे च तदसंभवात् अपश्च द्वैतचैतन्यं साक्षिशब्दार्थः न हि स्वमाक्षि स्वसंगि न मर्थं
भासयति उत्तासंगिनमपि नाद्यः तस्यासंगित्वादिष्टत्वात् तस्येति द्वितीयं दूषयति साक्षित्वादिति प्रदीपादेरस्य संवद्धार्था
वभासकत्वदर्शनादिति सूचयितुं चकारः किंचेत्यादि ग्रंथो व्याख्यातार्थः ॥

अत एवेत्यारम्भविरोधाभावादित्यंतेन ग्रंथेनाह तदर्थः नन्वेवमिति रज्जुरेवमया प्रतिपन्ना न सर्पः इत्येवं व्युत्पादने सति दृष्टां
ते प्रामाणिकानुभवानुरोधेनाधिष्ठाने रज्ज्वादौ तद्विषयिणी प्रतीतिरस्तीति द्वयमेव वक्तव्यं न तु सर्पेणापि सर्पविषयानुभवो भ्रांत
प्रतीतेरनादरणीयत्वात् दार्ष्टांतिके तु स्वप्रकाशे चिदात्मन्यधिष्ठाने तद्विषयिणी द्विविधापि प्रतीतिरपि नास्ति तथा
सति अधिष्ठानमेव स्वरूपमपरित्यज्य रूपांतरेणाभासमानं विवर्त इति पदे योगतः रूपांतरस्याभावात् भान कर्तृत्वस्या

अत एव बोधोत्तरमनंतेरज्जुरेव सर्पतया प्रतिपन्नेति न तु किं सर्पेण प्रतिपन्न एवकः संशयः एवं तस्यानुभववि
रोध इति चेन्न भ्रांतानुभवविरोधेपि अविरोधात् तस्य किं प्रतीतं किं न प्रतीतमिति विवेकविरहात् अभ्रांत
स्य तु तदनुभवाभावेनानुभवविरोधाभावात् नन्वेवं सति अधिष्ठानं तत्प्रतीतिरस्तीति द्वयमेव दृष्टांते अति
रिक्तप्रतीतिप्रत्येतृत्वयोरसत्त्वस्य व्युत्पादनात् दार्ष्टांतिके त्वधिष्ठानं तत्प्रतीतिरद्वयमप्यात्मैव स्वयंप्र
काशे प्रतीत्यंतराणामनभ्युपगमात् तथा च तदतिरिक्तस्य विवर्तस्य दर्शयितुमशक्यत्वया गतं विवर्तवादेन
तत्तोतिस्फुटः स्वसिद्धांतपरित्याग इति चेत् न तस्य बालव्युत्पत्तिमात्रप्रयोजनत्वात् तया उपनिषत्तात्पर्या
विषयत्वात् अन्यथा विपरीतदृष्टेव द्वैतापत्तेः मिथ्यैव सा दृष्टिरिति चेत् ॥ ॥ ॥ ॥ ॥

प्रभावादिति शिष्योपसिद्धांतेन गुरुं निगृह्णातीत्यर्थः परिहरति बालेति मध्यमाधिकार्येऽत्र बालपदार्थः सो
पानारोहणन्यायेनाद्वैते चेतसो बुद्धिप्रवेशार्थं प्रपंचमारोप्य निषेधंती श्रुतिर्विवर्तपर्यवसितेत्युच्यते न वस्तुतोऽ
न्याकारप्रतीतिसद्भावप्रतिपादनपरा समन्वयविरोधात् तयैव प्रतीत्यात्मवत् प्रामाणिकया द्वैतापत्तेस्ततः
कथमपसिद्धांत इत्यर्थः द्वैतापत्तौ परिशंकते मिथ्यैवेति सतो द्वितीयस्याभावात् न द्वैतापत्तिरिति ॥ ॥ ॥

नन्वख्यातिर्नाम का चेत् त्वं तस्याप्यख्यातेरन्यता प्रसक्तिरित्यभिप्रेत्य शंकते किमिदमिति नन्वरूपेणाख्यातत्वमख्यातिरुच्यत इति
ब्रूमः किं त्वाकारान्तरेणाभासमानत्वमित्याह वस्तुत इति आकारान्तरस्वरूपं यद्यात्मैव तर्हि तद्रूपेणैव प्रतीतिः किं नस्या
दिति शंकते तथैवेति द्वैतस्वरूपमात्मत्वेन प्रतीतिः किं त्वनात्मारोपो दाहाननस्यानन्यस्य आरोपापत्तिरित्याह उ
चितमिति द्वितीयं दूषयति नह्येति अन्याकारप्रतीतिकाले स्वरूपप्रतीतेर्विरोधाद्योग इति भावः नन्वभ्रान्तिस्थले

व

किमिदं ख्यातेरध्यस्तमिति चेत् वस्तुतो निःप्रकारिकायाः सप्रकारकत्वेन भानमेवेति गृहाणान्तस्यैव प्रकार
स्य स्वरूपं वाच्यमिति चेत् वस्तुतो निर्विकल्पकख्यातिस्वरूपमेव तथैव तर्हि प्रत्येतव्यमिति चेत् उचि
तमेव तद्दृष्टस्य ननु यांत स्वतस्य भ्रान्तत्वादेव किं तेनाधिकं प्रतीतमिति चेत् न किमपि कथमसौ भ्रा
न्त इति चेत् अन्यप्रतीतेरन्यविषयत्वाभिमानादेवं यथा लोके रज्जुं प्रत्येति सर्पमभिमन्यते अयं स
र्प इति कोऽसावभिमान इति चेत् परमार्थस्थितविषयस्यावभासमानस्याप्यसत्वनिश्चयः यदि वस्तुतो
रज्जुप्रत्यय एव कथं तर्हि सर्पोऽयमिति सर्पप्रत्ययः परिस्फुरतीति चेत् आकारसाम्यात् दोषवशा
च्चेति वदामः ॥

विषयोऽधिष्ठानादधिकः कश्चिदस्ति न वा न चेत् कथं भ्रान्तत्वमस्तीति चेत् न त्वस्वरूपस्य वक्तव्यत्वापात इत्यभि
प्रेत्य शंकते नन्वेति द्वितीयमंगीकृत्य परिहरति न किमपीति रज्ज्वादिविषयप्रत्ययस्य सर्पाकारत्वं रज्जुत्ति यदीति
साद्दृश्यादिति हेतुमाह प्रकारेति न ह्यन्यस्यान्याकारप्रतीतिर्नस्यात् निरवयवत्वेनात्मनः सादृश्याभावादिति त
त्राह दोषेति अज्ञानवशादित्यर्थः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तत्त्वपरिणामत्वे मात्मनः परिणामत्वं अनुपपत्तिं स्फुटयति नहीति किं त्वात्मनः परिणामत्वे चेत् तर्हि सामस्त्येन सर्वात्म
ना उतैकदेशेन नाद्यः आत्माभावप्रसंगात् नद्वितीयः निरवयवत्वादिति हृत्वेन रमाह कार्त्स्न्यैकदेशेति
अयं दोषः कार्त्स्न्यैकदेशविकल्पासह्यः कल्पितविवर्ते प्राक्कार्थं शंकते किंचिति किं प्रातीतिकाकारः कस्येति
एच्यते उत वा सर्वः आद्ये अधिष्ठानस्येत्सत्क ल्पितवेदितं द्वितीयं दूषयति वस्तुतइति आत्मनो वा सत्त्वाना
त्मकारत्वं नेति नेत्यादि वाधान्तरं भवति आत्मनोऽन्यत्राप्रतीतेरेव तत्समानत्रासत्त्वमिति नवाल्पेवाविल

नहि स्वयं स्वस्य परिणामः कार्त्स्न्यैकदेशविकल्पेन परिणामपक्षानुपपत्तेश्च ननु विव
र्तपक्षेप्ययं दोषः समान इति चेत् न विवर्तस्वरूपापरिज्ञानात् न ह्यधिष्ठानस्वरूपाति
रिक्तं विविक्तं नाम किंचिदस्त्यस्ति यदाश्रित्य कार्त्स्न्यैकदेशविकल्पावतारः स्यात् किं
त्वधिष्ठानमेव दोषवशात् विलक्षणाकारेणाभासमानं विवर्त इत्युच्यते स एव वि
लक्षणाकारः कस्येति चेत् वस्तुतो न कस्यापि अधिष्ठाने तस्य बाधात् अन्यत्राप्रतीतेः
भंपतरेणासत्ख्यातिवुसाधनमेवेत् इति चेत् न ख्यातेरप्यध्यस्तत्वात् असत्ख्यातिवा
दिना च चार्वाकेण तस्यानभ्युपगमात् सर्वशून्यवादिनस्तु पूर्वं निरस्तत्वात्॥ ॥ ॥

लक्षणाकारः कस्यापीत्यर्थः पद्मा असत्ख्यातिवादी प्रकृते अधिष्ठान इति असत्ख्यातेरुपपादनमेतद्भ्रां
त्यंतरेण विवर्तवादव्याजेनेत्यर्थः तदेतद्दूषयति नेति प्रतिज्ञायां हेतुमाह ख्यातेरिति परेषां मते ज्ञानेना
ध्यस्तं अस्माकं तु तदप्यध्यस्तमिति न सर्वात्मना सांप्रतं तदभावे च न परिशिष्टो तापत्तिरित्यर्थः निरस्तत्वात्
इति न विज्ञातुरात्मत्वादित्यत्रेत्यर्थः॥

दि॰

ब्रह्मणोद्वैतद्रष्टुरभेदे विकारित्वं वदन् प्रश्नः द्वैतद्रष्टरि पदार्थत्रयं वर्तते द्वैतं तत्द्रष्टिः स्वरूपं च तदभेदे
स्वरूपाभेदेन परिणामित्वं प्रयुक्तं किं द्वैतं तद्दृष्टिर्वेति तत्सर्वथाप्ययुक्तमिति विकल्पयति कोयमिति
निषिद्धत्वात् नेति नेति श्रुत्यावेदितिशेषः ननु मन्तव्योनास्तीति निषिद्धो विषयो यथास्य द्विकारस्त
था द्वैतं निषिद्धमपि कस्यचिद्विकारः किं न स्यादिति तत्राह नहीति घटस्य नसर्वथा निषेधः प्रपंचस्य
धिष्ठानादन्यत्र नास्त्येव अधिष्ठाने चेन्निषिद्धत्वं सत्वात्परिणामइति श्रुतौ वा चित्तं दृष्टं तन्माहे
यथेति नरशृंगात्प्रपंचस्य वैलक्षण्यं शंकते नन्विति अस्य द्वैतस्येत्यर्थः दृष्टिरपरोक्षप्रत्ययः नतोऽस्य द्वैत

18

कोयंविकारः द्वैतं तद्दृष्टिर्वा नाद्यः द्वैतस्य सर्वस्य ब्रह्मातिरिक्तस्य निषिद्धत्वात् नहि
यन्नास्ति तत्कस्य चित्परिणामः यथा नरशृंगं तत्नोस्त्वैलक्षण्यं तद्दृष्टिरेवेति चेत्
तर्हि अप्राप्ताप्तवित्वेकेन दृष्टेरेव परिणामोऽस्तु तदतिरिक्तद्वैताभावात् ओमिति
चेन्न दृष्टेः फलरूपाया आत्मरूपा नमोऽवेन तत्परिणामत्वानुपपत्तेः ॥ ॥ ॥ ॥

तत्पणाद्विकारित्वं द्वैतस्य पुष्कलमित्यर्थः विनाद्वणस्य भावो वैलक्षण्यं विलक्षणत्वप्रयोजको धर्मो दृष्टिरित्यर्थः
तर्हि प्रपंचस्य विकारत्वे द्वैतत्वं न प्रयोजकं किंतु दृष्टिसंबंधित्वं तथा च विशेषणे हीति न्यायेन दृष्टेः प्राप्तायां द्वैत
स्य विकारत्वमप्राप्तायां नेति चेत्तर्हि विकारोस्तु इति दृष्टिपक्षमपि निराकर्तुं मध्ये अंगीकारयति तर्हीति किं
च तानन्त्येयो भेदस्य प्राप्तुं निरस्तत्वात् परिशेषाद्दृष्टिरेव विकारहेत्वंतरमाह तदतिरिक्तेति अंगी
कारितमर्थं शिष्योंगीकरोति ओमिति दृष्टिशब्देन किं वृत्तिरुच्यते उत विषयाभिव्यक्तफलाद्विधं चेत्तत्र
नाद्यः तस्याः जडत्वेन प्रकाशकत्वानुपपत्तेरदृष्टत्वादित्याह नेति नद्वितीय इत्याह दृष्टेरिति ॥ ॥ ॥

प्रत्यगात्मेति सिद्धमित्यन्तो ग्रन्थः स्पष्टार्थः ननु यद्यपि द्वैतद्रष्टैव स्वतो ऽत्मनो नातिरिच्यते ऽतिप्रवे द्वैतस्याप्यात्मा
त्मसिद्धत्वादात्मव्यतिरिक्तानात्मस्वरूपाभावात्सदैव सिद्धित्वात् प्रकृत्यनावश्यिस्यत इत्युक्तं तथापि द्वैतद्रष्टृ
न निर्णीतमिति शंकते ननु तथापीति इदानीं मरुत्वं चेत् द्वैतद्रष्टृभ्यो ऽयमित्यस्ते तर्हि भवानेव द्वैतद्रष्टेति
प्रश्नोत्तरमाह य स्त्विमिति आत्मस्वरूपमजानन् एतद्वै कोहमिति किं संसारिस्वभाव उत द्विलक्षण इति यद्यपि दे

तर्ह्युभयप्रवृत्तिः विधिनेव पुरुषार्थसंपर्यवसत्वादिति चेत् न अधिकारिभेदेनोभयोरुपयोगात् क
श्चिद्धि संसारदुःखेनात्यन्तमुपहतश्चेत्तास्लन्निवृत्तिमेव प्रथमतः कामयते तं प्रत्यादौ निषेधवाक्यमेवो
पयुक्तं विधिवाक्यं तु पश्चात् यथा सर्पभारोपभियाकंपमानं प्रति नायं सर्प इति निषेध एवादौ
न तु विधिः यस्त्वत्यन्तमनुद्विग्नः किमस्य जगतस्तत्त्वमिति तत्त्वं जिज्ञासते तं प्रतीदं सर्वं पदमात्मे
त्यवोत्तरं न्याय्यं निषेधस्तु पश्चात् यथा सर्पमध्यसत स्त्री कारन्ताना निर्भयः पृच्छति किमिदं
पुरोवर्तीति तं प्रति रज्जुः इत्येवोत्तरं न तु निषेधः तस्मादवस्थाभेदेनोभयोरुपयोगात्तक
स्यापि वैयर्थ्यमतो विधिनिषेधाभ्यां परिपूर्णः सच्चिदानन्दः प्रत्यगात्मेति सिद्धं ननु तथापि कोसौ
द्वैतद्रष्टेति अद्यापि न निश्चितं इति चेत् प्रत्यक्षत्वैकोहमिति चेत् ब्रह्मैव एवं तर्हि ब्रह्म
णो विकारित्वापत्तिरिति चेत् ॥

ह्यादेरात्मत्वं परा कुर्वता कर्तृत्वादिप्रपंचस्य मिथ्यात्वमावेदयता च ब्रह्मरूपतात्मनो निर्णीतैव तथापि पदार्थ
शोधनेनार्थादैक्यमात्मब्रह्मणोः सिद्धमिति इह तु प्राक्तत एव तत् वक्तव्यमिति तदर्थमारंभो युज्यत इति शोधि
तपदार्थयोरधिकारिणो प्रपन्नाय कृपावरपृष्टो गुरुराह ब्रह्मैवेति द्वैतद्रष्टुर्ममब्रह्मणाश्चाभेदे ब्रह्मणो कौटस्थ्य
भंगं शंकते एवं तर्हीति यद्यपि विकारजातमविद्यकमिति विद्वुषा निर्णीतं तथापि प्रकांतरेणापि तन्निर्णीय
मुपक्रम इति भावः ॥ ॥

सा

अत एव दृष्टान्ते स्वरूपशब्देनैव व्यवहरति । अत एवात्मव्यतिरिक्तं नास्तीति तस्य सर्वात्मरूपत्वेन तद्व्यतिरेके बाधा
मते संभाविते विधिशास्त्रं निषेधशास्त्रं चोपपन्नमित्याह अत एवेति विधिशास्त्रमुदाहरति तद्यथेति पञ्चम
जात्यादिजगत्सत्त्वाद्युपस्थापितं तन्नामात्मा एक एवासीत् कार्यजातं नैवासीदित्यर्थः आत्ममेदयात्विमित्तं त
न्निषेधति अद्वितीयमिति यत्र यस्मान्निर्विशेषावस्थायां मृषा तदिति अथ सत्यस्वरूपनिरूपणानन्तरं यस्मा
त्पत्तत्वमसत्त्वं तदेव निरूपणीयमवशिष्यते तल्लक्षणादादेशोत्र स्वरूपाण्यति आदेशो निर्देशः स्वरूपप्रति

अत एव विधिनिषेधशास्त्रयोरविनाभावः तद्यथा इदं सर्वं यदयमात्मा स देव सोम्येदमग्र
आसीदेकमेवाद्वितीयं ऐतदात्म्यमिदं सर्वं ब्रह्म वा इदमग्र आसीत् अहं मनुरभवं सूर्यश्चेति
यत्र त्वस्य सर्वमात्मैवाभूत् नारायण एवेदं सर्वं यद्भूतं यच्च भव्यमित्यादि विधिशास्त्रं तथा
निषेधशास्त्रमपि नेह नानास्ति किंचन नेति नेति अथात आदेशो नेति न ह्येतस्मादिति नेत्यन्य
त्परमस्ति अतोऽन्यदार्तं न तत्तु द्वितीयमस्ति नैवेह किंचनाग्र आसीत् नासदासीन्नो सदा
सीत् इत्यादि भवतीह लोके रज्जौ समारोप्यमाणे प्रत्युपदेशः इदं सर्वं रज्जुरिति नेह सर्पादि
रस्तीति तथाप्युभयोस्तादृश्योर्भेदे कतरः प्रमाणमिति चेत् यद्यप्युभयोरेकार्थत्वमेव तथा
पि विधेरस्ति कश्चिद्विशेषः तत्र हि परिहृष्यमाना नानाध्यासान्नासात्मैवेत्युक्ते तदनन्तात्मैव आ
त्मैव परिपूर्णा इति ज्ञानं साक्षादेवाभिव्यंभति निषिद्धे त्वर्थाद्विशे

पादनमिति यावत् तत्र प्राक् प्रवृत्तिनिमित्ताभावादिदं तदिति निर्वक्तुमशक्यत्वेऽपि प्रपंचापवादेनावधिभूतमधि
ष्ठानेन स्वस्वरूपमिति निर्दिशतीति नेतीति वीप्सा व्याप्त्यर्थाय यद्यत्प्राप्तं तन्निषिध्यत इत्यर्थः हि यस्मान्नेतिने
तीत्येतस्मात् परं निर्देशनं नास्ति तस्मादयमेवादेशो युज्यत इत्यर्थः इतरः अन्तयः सद्व्याप्यो भवतीहेत्यारभ्य

अनात्मात्मनोरभेदपक्षं दूषयति नद्वितीय इति ...

प्रत्यक्षानुपलब्धत्वाद्वैतात्मसाक्षात्कारो ज्ञानं तर्हि ज्ञानान्तरस्याभावात्ततः परं पुनः सोन युक्तत्वात् एवं त
र्हीति ज्ञानान्तराभावमाक्षिपति अतीति अन्यात्मवेदनेन सर्वस्याविदितत्वात् रज्ञानवत्त्वेनाभावान्नेत्यर्थः
रमलीतिपरिहरति नचात्मनस्त्वादिना दृष्टान्तं नात्मद्वितीयस्य ज्ञाने ज्ञानान्तरस्य प्राप्तिविचारः सोऽपि नेत्य
र्थः तथाचात्मनोऽन्यात्मननेन चोत्पन्ने यद्विशेषरूपमपरोक्षसाक्षात्कारलक्षणं ज्ञानं तत्त्वविज्ञाननिवर्त्यः
न न किंचिदन्यत्किमपि वस्तुतस्त्वदो संनाद्यः किं नाज्ञवन न सार्थ स्वीकर्तव्यत्वापत्तेः योऽपि च तत्प्रयोगता
माक्षिपति नान्विति प्रपंचस्यात्मभेदपक्षं दूषयति नाद्यस्त्यादिना अनात्मात्मनोरभेदपक्षं दूषयति
अन्यनात्मेतिचेन्न आत्मनोऽद्वयरूपदर्शनेनाश्रुत्यात्मन्यविज्ञानेनेदं सर्वं विदितमिति श्रुत्यात्मदर्शनेनेतरत्सर्वं दृष्टं भ
वतीति श्रवणात् ननु इदमनुपपन्नं यदात्मदर्शनेनेतरत्सर्वं दृष्टं भवतिकुत इति चेन्न तथाहि किमितरत्सर्वमात्मनोऽभि
न्नमभिन्नं वा नाद्यः अन्यदर्शनेनान्यस्य दृष्टत्वमप्रसक्तत्वात् नहि घटे दृष्टे पटोऽपि दृष्टो भवतीति शक्यं वक्तुं अन्यथाऽतिप्रसङ्गापा
तात् नद्वितीयः आत्मनात्मनोर्विरोधात् परमार्थसत्यात्माभिन्नस्यानृतत्वानुपपत्तेः नाऽपि निषेद्धुमशक्य
तया वाधानुपपत्तेश्च अन्यथा आत्मनोऽपि वाधिततया शून्यमेवावशिष्येत तस्मादात्मदर्शनेन सर्वमेव
दृष्टं भवतीत्यनुपपन्नं नैष दोषः आत्मसत्तैव द्वैतसमस्तानामायतनत्वात् आत्मन्येव जगत्सर्वं दृष्टं दृ
ष्टं श्रुतं आत्मसत्तातिरिक्ताया द्वैतसत्ताया अभावात् आत्मनि दृष्टे सर्वं द्वैतं दृष्टं भवति यथा
रज्जुस्वरूपे दृष्टे तत्राध्यस्तानां सर्पदण्डादीनां स्वरूपं दृष्टं भवति तद्वत् आत्मनि दृष्टे सर्वं दृष्टं भव
तीति नानुपपन्नं॥

नद्वितीय इति प्रत्यक्षेण परोक्षेणात्मानात्मनोः स्वाभावविरोधादित्यर्थः किंचात्मानात्मनोरभेदस्यात्मन्यना
त्मा प्रविशति अनात्मन्यात्मा वा आद्यं दूषयति परमार्थेति द्वितीयं दूषयति अन्यथेति अधिष्ठानस्वरूपमेवा
ध्यस्तस्वरूपं अधिष्ठानयाथार्थ्येनाध्यस्तस्वरूपानिरूपणादिति घटविचारादावनेकशो निरूपितं तथा च जगद
धिष्ठानात्मस्वरूपे विदिते जगत्स्वरूपं विदितमितिपुनस्त्याज्जगतोऽपि स्वरूपविज्ञानाद्धि दिनं तत्त्वं संभावितं यो

तर्हि त्वं किमित्यत्र किंशब्दसूचितं द्रष्टृभेदपदं पराकृत्य तद्भेदपदस्य स्थापयति ननु नन्विति पदच्छेदः त्वत्त
इति पदेन व्यवस्थानुपपत्तेरौपाधिकं भेदं मादायापि प्रतिबिंबभेदानामिव चलनादिव्यवस्थावदुपपत्तेः तस्मा
भाविकात्मभेदप्रतापकत्वमिति सूचितं तथा चोपाधिभेदेन भवामीति पदांतरस्वीकारफलमाह तथा
चेति एतदंगीकृत्य गुरुराह तर्हीति यदि द्वैतदृष्टा त्वत्तो वस्तुतो नातिरिच्यते किंतु तदात्मैव तथा सति
मामात्मत्वेन पश्यन्न को दृश्यो विद्यत इत्यर्थः किंशब्दार्थमाह किमिति आत्मानुपातेनैव नास्ति एकरीति यदा

ननु त्वत्तोऽभिन्न एवाहं तथा च ममात्मत्वाभिधानमापाद्यत स्तवैवास्मत्ताभिधानमायातीति
चेत् तर्हि कोऽयं त्वयात्मत्वेन दृष्टः किं स द्वितीयोऽद्वितीयो वा यद्याद्यस्तर्ह्ययमपरो दोषः
यस्त्वं विहायासि तवैवाचार्यमात्मत्वरूपेण पर्यवसितं द्वैतवार्ता न भिन्नं स द्वितीयकल्पकल्पय
सि एकमेवाद्वितीयं नेह नानास्ति किंचनेति श्रुतिविरोधः अस्तु तर्हि अद्वितीयपदउ
क्तदोषविरहादिति चेन्न हं तर्हि कुतो मामद्वितीयमात्मत्वेनोक्तवानसि त्वद्वचनादुदा
तथास्त्वेति चेत् एवं तर्हि प्रवृत्तोऽसि नातः परं पृष्टव्यमस्ति नह्यात्मनि विदिते ततः परमविदित
वस्तु शिष्टव्यं स्यात्

यदित्यादिना आत्मनः सद्रूपत्वं दर्शने श्रुतिविरोधमप्याह एकमेवेति द्वितीयमंगीकर्त्तुमनुवदति
अस्तु तर्हीति उक्तदोषस्यासत्यभावमात्रादेरनवकाश इत्यर्थः एतत्तर्हि द्वितीयात्मदर्शनं तव कुतो हेत नि
त्याचार्यः पृच्छति हंत तर्हीति शिष्य आह त्वद्वचनादिति पूर्वोक्तात्मानुरूपाद्वचनादित्यर्थः वच
नस्य युक्तिप्रतिपादकत्वेनोपजीव्यप्रमाणत्वे दार्ष्टांतमाह उदाहरणं तथा ह्यादिति उदाहरणं श्रुतेरेक
मेवाद्वितीयमित्यादि

ननु हेतुज्ञानं भविता स एव हेतुद्रष्टा इति स्थिते विमोक्षसंस्कारादाविद्वत्वे नानित्यत्वप्रसंगे किं समाधानं भव
तीति पृष्टः कते किमतत् इति समाधत्ते इदमिति एतदेव स्पष्टयति एतेषामिति आविर्भावाः भिव्यक्तिरनुभवइ
ति यावत् तथा च नित्य एव मोक्षः परंतु प्रतिबंधवशात्नानुभूयते यथांधकारप्रतिबंधात् उपवरकदेशा
वस्थितो घटादिरिति हेतुदर्शनं मोक्षाविर्भावप्रतिबंधकं तस्मिन्नसत्यपि मम मोक्षाविर्भावात् दर्शनादिति
शंकते अस्त्वेतदेव हीति हेतुद्रष्टृत्वमसिद्धमिति वक्तुं एवकृते तर्हि च किमिति किंचाच्छस्वरूपचिंतां हेतुद्रष्ट

किमतइदमतो भाति एतेषां यत् हेतुदर्शनं तदेव सच्चिदानंदपरिपूर्णात्मस्वरूपमोक्षाविर्भाव
प्रतिबंधकमिति गृहाण अस्तु तर्हि तेषां प्रतिबंधः मम हेतुद्रष्टुः कथं मोक्षोनाविर्भवतीति
चेत् तर्हि त्वं किमेतेभ्यो भिन्नः येन हेतुद्रष्टृत्वं भवेत् कः संशयः तद्वृत्तानामात्मत्वेनानुभवा
मि तेषां सुखदुःखादीनां मम लेपाभावात् अहो आश्चर्यं ज्ञानतेकविधान्देवतियेगमन्तु
ष्यादिभेदभिन्नान्यपपन्नेहेतुं नपश्यामीति वदत्तत्त्ववचः कथंमसद्रूपं स्यात् नहि मुमुक्षोः
संन्यासिनस्तत्त्वबुभुत्सोरिदमुचितं यदसत्याभिधानमिति ॥

ष्योभिन्नत्वपक्षं विनेयोंगीकुरुते कः संशयइति भिन्नत्वमुपपादयति नहीति हिमाच्छस्वचिंता
सुखदुःखव्यवस्थानुपपत्तिं तत्र प्रमाणयति तेषामिति द्रष्टृभेदेप्रमाणमुपन्यस्ततो हेतूनानुभवत् त्वमात्म
नित्यपाव्यवस्थापितं तथाच हेतुद्रष्टृत्वमात्मनिवदतोमिथ्याभवितमिति शिष्यमुपालभते अहो
इति ननु परवामोहार्थं कथायामयथार्थमपि वक्तव्यं तत्राह यदसत्येति ॥ ॥ ॥ ॥

ननु ज्ञानादिकेवदुःखपुञ्जापराख्येऽस्मिंश्च मोक्षान्वयिविकारः द्वितं चैतन्यमवशिष्यते न च ननु द्वैतदर्शनानिषेधप्रसं
गादिनिर्यं कर्त्तृ एतावन्तापीति प्रसंगस्यानिष्टत्वमाशंकते नन्विति तन्मोक्षस्य साध्यत्वान्नित्यत्वमसिद्ध
मितितत्राह विमुक्तश्चेति पूर्वमपि विमुक्त एव अज्ञानवशात् विमुक्तत्व भ्रमेणन्न साक्षात्कारात् ज्ञानोपम
र्दिते विमुच्यत इत्युपचर्यते न तु जन्यते मोक्षः पूर्वस्थितस्तुलादिवदर्थः मोक्षस्याजन्यत्वेन नित्यत्वे फलित
माह तथाचेति इदानीमिति मोक्षकालेऽस्मिन्नपीत्यर्थः द्वैतदर्शनमोक्षयोरेककालत्वं लौकिकानुभ
ववलात्कल्प्यते उत श्रुतिबलात् आद्यं निषेधति नेति न केवलमननुभवाभावः किन्त्वविपरीतानुभवो

एतावताऽपि द्वैतदृष्टुरनुत्पादनात् न हि मुक्तस्य द्वैतदृष्टत्वमुपपद्यते मोक्षकालेऽपि तद्दर्श
नप्रसंगात् ननु मोक्षस्य नित्यत्वेन सर्वदा सत्त्वात् सर्वादिकालो मोक्षकाल एव विमुक्तश्च विमु
च्यत इति श्रुतेः अन्यथा मोक्षस्य कादाचित्कत्वेनानित्यत्वप्रसंगः तथाच मोक्षकाले द्वैतद
र्शनप्रसंगो नानिष्ट इदानीं तद्दर्शनादिति चेन्न सार्वलौकिकानुभवविरोधात् न हि द्वैत
दर्शनकाले कश्चन मोक्षमनुभवतीति न हि सर्वलोकप्रसिद्धमर्थं श्रुतिरपि प्रतिपादयति अन्य
थाऽग्निशीतत्वादिवाक्यानामपि तादर्थ्यं प्रामाण्यप्रसंगः न तावन्न सर्वः कालो मोक्षकालः सर्वलौ
कानुभवविरोधादिति द्वैतन हि येनर्वेऽनुभवति ताः स्वर एवं द्वैतदृष्टा स्वरूपेण निश्चिता तथा
च स्वाधीनविमुक्तो द्वैतदृष्टिकः प्रश्नः॥

बाधकोक्तिमाह सार्वलौकिकेति नेतीति निषेधमुपपादयति न हीति द्वितीयं दूषयति न हीति द्वैतद
र्शनमोक्षयोरेककालत्वनिराकरणमुपसंहरति तत इति ततः प्रकृतार्थमाह सर्वेति तथा च द्रष्टृत्वमपि न
निरूपितमिति तदुक्तं वाक्यवित्तिः अध्यस्ताभिप्रायः द्वैतानुभवविरोधमुक्तं नानुभवतीत्युक्तं मास्मि तद्रुरु
रुत्तरमाह द्वैतेति अननुभवदर्शनयोः पर्यायत्वाद्द्वैतानुभविता रत्रेव दृष्टा इति व्याख्ये वाक्ये निर्णीतमिति स्ववुद्धि

अशेषविशेषाभावेऽपीति इत्थंभावे तृतीया तत्र मूलशंकां निरस्य आह नचेति विशेषाः सत्त्वे सति तत्त्वज्ञानात्मकस्त्वर्थः तर्हि
नारोपवस्तुस्वरूपं त्वयावाच्यमिति शिष्याशङ्कां तस्येति ननु संदिग्धं जिज्ञासितं देहाद्यध्यासानां तेभ्योऽपि भिन्नत्वतया परि
शेषान्निश्चिते वस्तुनि संदेहानुपपत्तेर्जिज्ञासायोगात् किं स्वरूपप्रश्नेनेति तत्राह नचेति ननु तर्हि इतु नामा
ज्ञानं निश्चिते वस्तुनि संदेहादर्शनात्कथं जिज्ञासेति तत्राह स्थितएवेति विवेकज्ञानस्यान्यथासिद्धत्वात्तया
परोक्षत्वात्परोक्ष संशयादिनिवर्तकत्वं नयुज्यत इत्यर्थः ननु विविक्ततया निश्चिते पदार्थे तत्त्वयुक्तः संशयो
पलीतत्वेऽज्ञानादिसत्त्वे निश्चय एव नास्ति तस्मिंश्च सति नाज्ञानादीति शंकामनूद्य दूषयति नचेति अ

नचाज्ञानं परित्यज्य तद्विषयस्वरूपमात्रं प्रत्यक्तत्त्वग्राह्यमितिवाच्यं अशेषविशेषेण तत्त्वबुभु
त्सां प्रत्येतस्यानुत्तरत्वात् नच सामान्यविशेषशून्यो विषयो विभक्तत्वेनानुपपन्न इति वाच्यं तस्यैव सामान्यविशेषशू
न्यस्य वक्तव्यत्वापत्तेः नचाज्ञानाद्यतिरिक्ततया निश्चिते स्वरूपे संदेह एव नोपपद्यत इति वाच्यं अज्ञानस्याप्य
निवृत्तत्वात् स्थितएवाज्ञाने विवेक इष्यात तद्व्यतिरिक्तस्वरूपनिर्णयोऽपि तेनैवाज्ञानेन विषयीकृते संदेहोपपत्तेः
नचाध्यस्तस्यानस्वरूपे स्थिते तदधिष्ठानस्यात्मनो विवेकोऽशक्य एवाधिष्ठानभेदेनाध्यस्तस्य पृथक्स्वरूपाभा
वात् ततो यदि विवेकदृष्ट्याधिष्ठानस्वरूपमात्मतत्त्वं निश्चितं तदा तत्राध्यस्तमज्ञानं तत्कार्यं वा ततो भेदेन त
त्रनालीत्यवधार्य विनिश्चितत्वं तथाच तत्रज्ञानविरहात्संदेहानुपपत्त्या प्रश्नानुपपत्तिरेवेति वाच्यम् ॥

ध्यस्तादन्यत्वमधिष्ठानस्य विवेकः नच सतोऽध्यस्तस्याध्यस्ते तदन्यत्वं ज्ञातुं शक्यं अध्यस्तस्याधिष्ठानतादात्म्यात् त
द्भेदेन स्वरूपाभावात् अथ यदि विवेकनिश्चयः स्वीक्रियते ततो नाज्ञानादीत्याह ततोयदीति संदेहाभावे
प्रश्नोजिज्ञासाभावादेव न संगच्छत इत्याह तथाचेति नवाच्यमितिव्यवहितेनान्वयः ॥ ॥ ॥ ॥ ॥

एवं गुरुणोपदिष्टेनोपदिष्टेन च वाच्यमितितेन निषिद्धे स एव निषिद्धान्तचद्देन्नमाह तेषामिति तेषां शरीरादीनां प्रत्येकस
मुदाययोरात्मवस्तु स्वरूपत्वानुपपत्तेरित्यन्वयः अनुपपत्तौ चतुर्विधान्वयव्यतिरेको हेतुत्वेनाह अनात्मकार्याणामित्या
दिना अनेन कार्यकारणान्वयव्यतिरेको दर्शितो न चात्मानमेव कारणं नात्मेति वाच्यं अज्ञानाधिष्ठानत्वेनात्मनः
कारणत्वस्यास्माद्युक्तत्वात् अहंप्रत्ययावलम्बनत्वमन्यथयति ममेति तेन भेदे प्रतीयमाने अभेदप्रतीतिरुपचारेत
ति भावः न च विपरीतं किं न ममात्मेति व्यपदिशति देहस्यात्मत्वात्सन्निधानात्संबंधप्रत्यय उपचारमर्हति न चात्र
तथास्ति अहंप्रत्ययस्य देहादावात्मतादात्म्याध्यासेनाप्युपपत्तेः कस्तर्हि ममेति षष्ठ्याः संबंधः प्रतिपाद्यत इत्याशंक्याह

तेषामप्यनात्मकार्याणां मद्भोगोपकरणतया ममप्रत्ययविषयाणां स्रक्चन्दनादीतरभोगसाधनवन्मदुपसर्ज
नतया प्रतीयमानानां प्रत्येकं समुदाययोः कार्यकारणविलक्षणहेयानुपादेयस्वभाव ममप्रत्ययाद्विषय
परमप्रियतमस्वातिरिक्तस्यावभासकसर्वदाऽव्यभिचार्यात्मवस्तु स्वरूपत्वानुपपत्तेः न च देहादिबुद्धिपर्यं
तेभ्यो यत्स्वरूपं व्यापारे व्यभिचरितं तदेवं तत्स्वरूपमिति गृहागतिवाच्यं तस्याप्यनात्मत्वात् ॥ ॥ ॥ ॥

मद्भोगेति तत्र दृष्टान्तः स्रक्चन्दनादीतिज्ञानात्मत्वे हेत्वंतरमाह मदुपसर्जनतयेति येषां मध्ये प्रत्येकं वा समुदायो
वा स्वरूपत्वं न संगच्छत इत्यर्थः आत्मस्वरूपं विशिनष्टि कार्येत्यादिना कारणमाचाज्ञानं विवक्षितं आत्मन्यहेयत्वं
वक्ता प्रपंचस्य शरीरादेर्दुःखात्मकत्वं सूचितं तेन दुःखित्वप्रेमास्पदत्वलक्षणान्वयव्यतिरेकौ ध्वनितौ अनु
पादेयत्वमविक्रियत्वात् देहादाविवाहंप्रत्ययस्यात्मनि गौणत्वं प्रत्याह ममेति निरतिशयसुखरूपत्वेनान्यानुप
सर्जनत्वमाह परमेति साक्षित्वमाह स्वातिरिक्तेति अनेन साक्षिसाक्ष्यान्वयव्यतिरेकौ प्रदर्शितौ अज्ञानादाव
ध्यस्तेषु सर्वत्रानुगतत्वेनाव्यभिचारित्वमाह सर्वदेति एतेन देहादीनामव्यभिचारित्वमुक्तं तेन च तत्रापि अ
न्वयव्यतिरेको दर्शित इत्यर्थः तस्यापीति प्रत्यक्चेतनस्यापीत्यर्थः ॥

तत्राग्रिमग्रन्थेदेहादिवद्दृश्यस्वरूपनिर्णयार्थं शरीरादीनां दृश्यस्वरूपत्वमाशंक्य परिहरति नचदेहादीनामिति आदि
शब्देनेंद्रियमनसोः संगृह्यते तेषां दृश्यस्वरूपत्वे हेतुमाह अहंप्रत्ययेति अहंप्रत्ययेत्यादिविषयत्वरूपफलमाह इतरे
ति अन्यत्वमिति शरीरमेवात्मा मनएववा बुद्धिरेववेत्येवं एतेषां समुदायो वा दृश्यस्वरूपमिति पक्षांतरमाह समुदा
यो वेति शरीरस्येंद्रियाद्यपेक्षयाति स्थूलत्वात् प्रथमं तन्नोपन्यासः शरीरात्मवादिनामयमभिप्रायः तत्र शरीर
त्वं नाम निरपेक्षत्वमिंद्रियाधारः निरपेक्ष[illegible] दमे गृह्णात्यवयवानां प्रत्येकं शरीरत्वनिरासाय तेषामित्तरावय
वसापेक्षाणामेव तत्त्वगाधारत्वात् अहं मनुष्य इति प्रतीतेरहंत्वमनुष्यत्वयोरेकमधिकरणं प्रतीयते मनुष्यत्वं च देह
एवेति सर्वसंमतं तथा च स एवात्मा न च मम देहः शरीरमिति भोक्तृशेषत्वप्रतीतेः गृहादिवदनात्मत्वमिति वाच्यं

नचदेहादीनां बुद्धिपर्यंतानामहंप्रत्ययावलंबिनीभूतानामपि तेरानात्मव्यावृत्ततया प्रतीयमाना
नांमध्येन्यतमं ससमुदायो वा तत्स्वरूपमिति वाच्यम्॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ममात्मेतिवदुपचारात् ततश्शरीरमेवात्मेति स्थूलदर्शिनो वाह्यविशेषाः प्रतिपन्नाः केचनपु
नरिंद्रियाण्येवात्मेत्याहुः इंद्रियाणां ज्ञानान्वयव्यतिरेकात् ज्ञानकारणत्वेउपादानत्वाभावेपि तत्त्वात्तदेवो
चितमहं काणो वधिर इत्याद्यहंप्रत्ययावलंबत्वाच्चेंद्रियाण्येव द्रष्टॄणीति अपरेपुनः स्वप्नेंद्रियोपरमे
पि मनसोनुवृत्तेरहं मन इति प्रतीतेर्मनएवात्मेति वदंति विज्ञानव्यतिरिक्तस्य मनसोऽभावात् क्षणिक
विज्ञानमेवात्मेति विज्ञानवादिनः प्रतिपेदिरे इति बुद्धिपर्यंतानामित्युपलक्षणं येषां यथान्तरमव्यभिचार
त्वेन यत्संभवति तदपि स्वरूपत्वेन ग्राह्यमिति॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

किंचजीवपरमात्मनोरनुगतं चैतन्यं प्रवृत्तिनिपदेत्यन्योन्याश्रयोद्धरणांतरमित्याह उपाधीति तृतीयप्रकारे चैतन्यस्य दृष्टृत्वे
तद्दृशाद्युपाधिप्रसिद्धिस्तज्ज्ञानादिसिद्धिरित्यत्र चतन्त्रित्वस्य विवक्षितत्वाज्जीवेश्वरभेदप्रकारद्वयाद्येचेति तत्र तृतीयप्रकारस्तीति
तद्दृशाद्युपाधिप्रसिद्धिस्तज्ज्ञानादिसिद्धिरिति प्रयत्नपूर्वकत्वादित्यत्राविद्याप्रवेष्टावाविद्यादृष्टेत्यर्थाद्युक्तं तत्
त्वित्यन्योन्याश्रयादयं पक्षोन साधनीया इत्यर्थः ननु प्रसंगस्य ज्ञानपूर्वकत्वादित्यत्र इति यद्दूषयति नचेति ननु कोऽयं दृष्टेति प्रश्नो
याऽप्रावाततदृष्टेति तथाचैतद्दृष्टृत्वात्प्रश्नः पुनर्न युज्यते इति यद्दूषयति नचेति ननु कोऽत्र दृष्टेति प्रश्नोऽ
विद्याद्दृष्टृत्वस्वरूपाज्ञाने मायापयाने प्रश्नविषयाज्ञाने तद्विषयशब्दप्रयोगायोगादित्यत आह नचेति मुग्धोऽत्र तेः
एवार्थः प्रश्नस्य इत्यर्थे विपक्षबाधेन दूषयति अन्यथेति संसर्गज्ञानेनवाक्यप्रयोग इत्युक्तगादिस्तोभप्रयोगे व्यभि
चारात्तदज्ञानस्येवशुकवेदवाक्यादिषु कारणत्वेन ग्रहस्तस्य नतु ज्ञापितस्येव वाक्यरचनाहेतुत्वोपपत्तौ संसर्गः प्रतीत
उपाधिसिद्ध्युत्तरकालीनत्वाच्च तृतीयविभागस्य नचाविद्यांगीकारेऽतद्विषयकप्रश्नासंभवानुपपत्त्या
तवैव प्रधुराद्देन्मुचीविद्यादृष्टृत्वेयुक्तमिति वाच्यं तस्यैव ममाविद्याद्दृष्टुः स्वरूपस्यैदानींतत्वया तत्त्वनिर्णाया
र्थवक्तव्यत्वात् नचयत्स्वस्वात्मस्वरूपमपि नजानासि त्वयमहमिदं पृच्छामीति तस्य तत्वप्रश्नस्यैव कथं स्यादि
ति वाच्यं प्रश्नविषयाज्ञानेऽसत्येव प्रश्नोपपत्तेः अन्यथा प्रष्टव्यार्थे ज्ञानाज्ञानविकल्पेन प्रश्नाभावेनाप्रष्टः
कस्यचिदूयान्नचान्याधेन पृष्टम् ज्ञानमस्ति हिमेधावीजडरश्लोकमाचष्टेऽदिति न्यायेन स्वयं वक्तुमशक्य
तयासंदेहान्मम स्वरूपकदिति स्यात् नच प्रश्नविषयार्थपरिज्ञाने कथं तद्विषयकशब्दरचना नहिसंस
र्गमज्ञात्वा शब्दरचना नाम तिप्रसिद्धिरिति वाच्यं स्तोभशब्दवत्सार्थकस्यापि शब्दस्य तत्त्वरूपज्ञानादेव र
चनोपपत्तेः सर्वत्र शब्दस्वरूपज्ञानस्यैव शब्दरचनाहेतुत्वात् संसर्गज्ञानस्य च शब्दरचनाहेतुत्वेन प्रसि
द्धौ पादृस्य प्रमाणशब्दप्रामाण्यप्रयोजकत्वासिद्धेः ॥ ॐ नमः कमलदलविपुलनयनाभिराम
कारणत्वेन प्रमाणाभावादित्ति नच वाच्यमिति पूर्णतयाहेतुमाह स्तोभशब्दवदिति नचबाधितलोकप्र
सिद्धिसिद्धस्य वाक्यरचनाहेतुत्वस्य संसर्गप्रतीतेः कथमपह्नवः क्रियत इत्यत आह संसर्गज्ञानस्य चेति
ननु वेदप्रामाण्यपनसंसर्गज्ञानमस्ति शुकवाक्यादिवाक्यविन्नास्ति ततः कथं तस्य प्रामाण्यप्रयोजकत्वेति
मेवनैयायकमते नाऽस्य परिहारस्योक्तत्वात् नन्वने चेश्वरज्ञानस्य वेदशुकादिवाक्ये प्रामाण्यप्रयोजकस्य सत्वात्
अस्माकं पुनर्नुपदादिशब्दप्रामाण्ये नज्ञानेन व्यभिचारात् लोकप्रसिद्धेरं धपरंपरावदनादरणीयत्वादि
ति तस्माद्यत्तोषितप्रश्नसंभवादविद्याद्दृष्टृत्व स्वरूपतत्त्वनिर्णयार्थं त्वया वाच्यमिति ॥ स्मृतं ॥ श्रीरामायनमः

ॐ

तर्हि ब्रह्मणो भ्रांतत्वपरिहाराय वास्तवजीवपरमात्मनोर्भेदोस्त्विति नेत्याह । नान्योतोस्तीति ननु परमात्मैव द्रष्ट
द्रष्टास्तु न च सर्वज्ञत्वविरोधः सर्वज्ञत्वे हि नाविद्यानिवर्तकप्रमाणाजन्यज्ञानाश्रयत्वं किंतु स्वरूपचैतन्येन स्वा
ध्यस्तसर्वजगदवभासकत्वं न च स्वरूपचैतन्यस्य अविद्याविरोधित्वस्य तत्साधकत्वात् यश्च परमात्मैव द्र
तद्रष्टेति नेत्याह न चेत्यादिना अविद्यायामपीत्यपि शब्दोऽविद्याकार्यसंग्रहार्थः निरंजनपदेन
नाविद्याकार्यस्य निषिद्धत्वादिति अविद्यादिनिषेधवाक्यस्यान्यविषयत्वेन नाविद्यादिनिषे
धकत्वमित्याशंक्याविद्याशब्दस्याविद्यामात्रशक्तस्य वाऽस्मदविद्यापरत्वे लक्षणापत्तेर्नैवमिः

नान्योतोस्ति द्रष्टेत्यादिशास्त्रविरोधाच्च न च सर्वज्ञत्वं नाम स्वरूपचैतन्येन स्वाध्यस्तसकलभास
कत्वं तच्चाविद्यावत्त्वेपि न विरुध्यत इति वाच्यं निरवद्यं निरंजनमिति श्रुत्या अविद्याया अपि तत्र निषिद्ध
त्वात् न च वस्तुभूताविद्यानिषेधः न तु कल्पिताया अपीति वाच्यं साधारणनिषेधात् वस्तुभूतावि
द्याप्रसिद्धेश्च जीवस्य चाविद्यातरभावित्वयाऽनादित्वानुपपत्तेः अन्यथाऽविद्यानिवृत्त्यापि जीवभावो
न निवर्तेत न तृतीयः जीवपरमात्मव्यतिरिक्तस्य सर्वस्यैव जडत्वेन द्रष्टृत्वानुपपत्तेः न चोभयानुगत
चित्सामान्यस्यैव द्रष्टृत्वमिति वाच्यं तथा च तस्याविद्यायामपि तत्रैव वक्तव्यतया जीवस्य नि
निरवद्यस्याभ्रांतस्य परमात्मवन्नित्यमुक्तत्व सर्वज्ञत्वाद्यापत्तिः ॥ ॐ नमः परमात्मने ॥ ॥

आद्ये

त्याह न चेत्यादिना किं च वस्तुभूताविद्या प्रसिद्धा न वा आद्ये तत्रापत्ति निषेधानुपपत्तिश्च ब्रह्मवत्स्यात् ।
द्वितीये प्रसिद्धत्वादेव निषेधानुपपत्तिरित्याह वस्तुभूतेति जीवोऽनादिरिति पक्षं प्रत्याह जीवस्य चे
ति विपक्षे भावत्वे सत्यनादित्वाज्जीवभावस्य संसारिकत्वस्यानिवृत्त्यापत्त्याऽनिर्मोक्षः स्यादिति बाधक
माह अन्यथेति अथापरः कश्चिद्द्रष्टेति पक्षं प्रत्याह न तृतीय इत्यादि सर्वज्ञत्वाद्यापत्तिरित्यंतो निग
दव्याख्यातो ग्रंथः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ननु यथा बिंबप्रतिबिंबयोस्तदेवेदं मुखमिति प्रत्यभिज्ञया ऐक्यत्वेपि पृथगवस्थानं प्रतिबिंबे एव अवदातत्वं बिंबे उपाधेः प्रति
बिंबपक्षपातित्वनियमस्तद्वदत्राप्यौपाधिकत्वेन दर्शनं जीवस्यैव न परस्येति शंकांपराह नचभिदेऽपीति दृष्टांते बि
बंप्रतिबिंबभावस्य नियामकत्वेपि प्रकृते चान्योन्याश्रयदोषग्रस्तत्वात् तन्न संभवतीति शेषमप्येनोत्तरमाह वै
षम्यादिति शेषमप्येवं स्पष्टयति तत्र हीत्यादिना इह दार्ष्टांतिके द्वैतदर्शने सति तत्त्वप्रहत्य स्थापितस्याज्ञानतत्कार्य
स्य प्रतिबिंबोपाधितया तदनुप्रवेशेन तदुपरागेण प्रतिबिंबादिकल्पना तस्यां च सत्यां प्रतिबिंबात्मा जीवो द्र
ष्टेत्यन्योन्याश्रयात् अयं प्रकारो नोपपद्यत इत्यर्थः ननूपाधिप्रतिबिंबयोरनादित्वात् कुतस्तत्कालं द्रष्टृत्वव्य
वस्थित्यनुपपन्नमिति तेनाह नचेति तथा च नान्योन्याश्रय इति भावः भवत्वेवं द्रष्टा जीवः सादिरना

दिस्तु तर्हि जीवस्याविद्यावत्त्वेन द्रष्टृत्वं न तस्य परेणाभेदसौकर्यात् नचाभेदेऽपि बिंब
प्रतिबिंबव्यवस्थया सर्वज्ञत्वेन द्रष्टृत्वयोरुपपत्तिरिति वाच्यं वैषम्यात् तत्र हि पूर्वसिद्धे उपाधौ प्रतिबिं
बंभावानंतरं प्रतीयमानयोर्मलिनत्वस्वच्छत्वयोर्व्यवस्थोपपत्तिर्युक्ता इह तु द्वैतस्य स्थापितत्वेन
स्योपाधितया तदनुप्रवेशेन बिंबप्रतिबिंबभावकल्पनायां ततः पूर्वं द्रष्टृव्यवस्थापकानुपपत्तेः नचा
नादिसिद्धाज्ञानप्रतिबिंबस्याप्यनादित्वात्ततः पूर्वमिति पर्यनुयोगानुपपत्तिरिति वाच्यं अनादिसिद्ध
ज्ञानद्रष्टृत्वस्यानादिसिद्धस्यैव वक्तुमशक्यत्वात् नचासौ तत्कुशक्यः नच साक्ष्येव तथा तस्य सर्वज्ञस्याप्यवि
द्याविरहेण न द्रष्टृत्वानुपपत्तेः नच सर्वज्ञस्याप्यविद्याद्रष्टृत्वे नाविरोधः स्वभिन्नाविद्याद्रष्टृत्वेन पर
(मात्मनोऽज्ञानत्वप्रसंगात्)

दिर्वा सादिश्चेत्तत्राह अनादिसिद्धेति तथाच जीवो द्रष्टा न स्यादित्यर्थः ननु
जीवादन्यः पर एवानादिसिद्धो द्रष्टास्तु तत्राह नचेति अनादिसिद्धो द्रष्टा वक्तुं न शक्यत इत्यर्थः न
नु कथं द्रष्टृत्वाभावः साक्षित्वायत्तत्वादिति नेत्याह नचेति साक्षी किं परो वा जीवो वा आद्यं दूषयति तस्ये
तस्येति साक्षी किं स्वाविद्यादि पश्यति जीवाविद्यादि वा नाद्य इत्याह सर्वज्ञस्येति द्वितीयं दूषयति
नचेति तर्हि जीवब्रह्मणोर्भेदः किं वास्तवः उताऽवास्तवः नांत्य इत्याह स्वभिन्नेति स्वभिन्नस्याऽवि
द्यात्तद्रष्टृत्वेनेत्यर्थः स्वस्याऽविद्या नास्ति सर्वज्ञत्वात् स्वभिन्नोऽन्योऽविद्याश्रयो नास्ति अतः स्वभिन्ना

द्वितीयावित्याह अनादेरित्यादिना संबंधिज्ञानाधीनमिति तथाच विशेषणीभूत संबंधिनोपि तत्त्वज्ञाने
तुच्छत्वात् संबंधस्याज्ञानतत्वमित्यर्थः तृतीयं दूषयति नचेति ॥ ॐ नमः परमात्मने ॥ श्रीरामचंद्राय नमः

संबंधः किमलब्धसत्ताकस्य वस्थितिमात्रार्थं संबंधिनमपेक्षते उत लब्धसत्ताकः आद्यं दूषयति लब्धसत्तेति द्वितीये यदि
सत्तालाभः किं हेतोरुत्तरहेतुनैरपेक्षेण आद्ये अनादित्वपक्षक्षतिः द्वितीयं दूषयति हेत्वनपेक्षत्व इति आत्मनि
तयादर्शनात् इत्यर्थः ननु ज्ञानं नाम ज्ञानप्रागभावः स च ज्ञानानुपलब्ध्या गृह्यते इति कथं तदसिद्धिरित्याशंका
दूषयति नचेति ग्रहशब्देन किं वृत्तिर्विवक्षिता किं वा स्वरूपचैतन्यं नाद्यः वृत्तेरज्ञानमुखत्वग्रहत्वानुपपत्तेः द्वितीयं
दूषयति नित्योपलंभेति नित्योपलंभात्मनोनुपलब्धिरसुकेत्यर्थः अज्ञाननिराकरणमुपसंहरति तथा
चेति तन्निराकरणस्य प्रकृतोपयोगमाह कथं तदिति एतत्पूर्वपक्षनिषेधं प्रतिजानीते मेवमिति विरो
ध इति हेतुः स्वरूपप्रमाणोपाधिमन्यथा स्वरूपविषयप्रमाणप्रसंगविरोधः अज्ञानस्य प्रमाणानिरसनीयत्वा
त्तत्प्रमाणप्रसंगो विरुद्धः स्यादित्यर्थः शंकाव्याख्यातुं भूमिकामाह कथमिति अज्ञानांगीकर्तॄन्प्रति यदिदं

लब्धसत्तास्फूर्तिकस्यैव स्थित्यपेक्षणात् हेत्वनपेक्षत्वेऽन्तरानपेक्षा स्थितिकत्वाच्च नचाज्ञानस्य ग्रहप्राग
भावरूपस्य ग्रहानुपालंभादुपलंभ इति वाच्यं नित्योपलंभरूपस्यात्मनोनुपलंभानुपपत्तेर्भावरूप
जगदुपादानस्य चाज्ञानस्याभावरूपत्वानुपपत्तेश्च तथा चाज्ञानस्यैवाभावात् कथं तज्जगत्कारणत्वे
नोपन्यस्यत इति मैवं प्रसंगस्याज्ञानपूर्वत्वादात्मापेक्षवृत्तियोगिधीः अस्वरूपभाविनी पूर्वीविरोधः स्यादि
तोन्यथा कथमज्ञानसिद्धिरिति वदन् प्रष्टव्यः किमयं अज्ञानस्वरूपविषयकः प्रश्नः किं वा तत्स्वरूप
दोषः तत्स्वरूपसाधकप्रमाणप्रश्नपर्यायः आद्ये अज्ञाने स्वरूपे प्रश्नानुपपत्तेः प्रश्नात्पूर्वमज्ञानस्व
रूपसिद्धेरन्यथा प्रश्नाभावात् ज्ञेयवाज्ञानस्वरूपसिद्धमिति कोत्र प्रश्नः ननु सामान्यज्ञानाद्विशेषजिज्ञासा

पूर्वपक्षी वदति अज्ञानसिद्धिः कथमिति सदित्यर्थं वदन् सिद्धांतिना प्रष्टव्य इत्यर्थः प्रष्टव्यमाह किमयमित्या
दिना स्वरूपसाधकं स्वरूपबोधकमित्यर्थः आद्यमज्ञानस्वरूपविषयकप्रश्नपक्ष मन्य दूषयति आद्य इति
अयमर्थः प्रश्नो हि वाग्व्यवहारविशेषः व्यवहारश्च व्यवहर्तव्यज्ञानसाध्यः व्यवहर्तव्यं चात्राज्ञानस्वरूपमि
ति तज्ज्ञानमावश्यकं तथा चाज्ञानस्वरूपस्य त्वांप्रतिसिद्धत्वात् अतोऽज्ञानस्वरूपसिद्धयेव वृथा प्रश्न इति न
नु नाज्ञानस्वरूपसामान्यजिज्ञासया प्रश्नोयं येनायमुपालंभः स्यात् किंतु तद्विशेषजिज्ञासयेति तत्राह नचेति
कुत इति तत्राह उक्तेति वैयर्थ्यादित्यर्थः अज्ञानस्वरूपसिद्धिरेवमस्त्वपते साचेत्सामान्यतः सिद्धा किं विशेष
ज्ञानेनेत्यर्थः यद्वा सामान्यप्रतीतिरेव विना विशेषमपर्यवसन्ना तोऽपि विशेषमपि ते कथित वर्तीतिद्वयात्तज्जिज्ञा

ॐ

द्वितीयमनूद्य दूषयति संबंधेति संबंधस्य किं स्वात्मानं कल्पयति किं वा संबंधिनाविति द्वितीयं पक्षं द्विविधा विकल्प्य
क्रमेण दूषणमाह आत्माश्रयेति संबंधश्चेत्स्वात्मानं कल्पयति तदात्माश्रयः संबंधिमध्येपि किमज्ञानक-
ल्पयति साक्षी वा नाद्य इत्याह अन्योन्याश्रयेति अज्ञानं लब्धसत्ताकं सत्संबंधं जनयति जनिते च संबंधे लब्धसत्ता-
कं भविष्यतीत्यन्योन्याश्रय इत्यर्थः साक्षिपक्षं प्रतिषेधति कूटस्थेति उपपन्नपयस्य मौलिकरोति द्विधर्मिणमिति
न्यायात् कूटस्थत्वहानिरित्यर्थः अथैतद्दोषपरिहाराय यो धुपरक्तत्वा ज्ञानसंबंधं करोतीति साक्षीत्यत आह अ-
संगत्वेति अज्ञानेन हि साक्षिणः संबंधे न स्वतूपलभत्ते अलब्धसत्ताकं च नोपाधिं जनयति तथा च येनोपहितः
स· साक्षी उपाधिः पारमार्थिक इति तत्संगित्वे संगत्वहानिरित्यर्थः अत्रैव दूषणांतरमाह अनिर्मोक्षेति तत्त्वसाक्षा-
त्कारादज्ञाने नष्टेऽभवे च न स्यादिति विशेषाद्वान्यत् तथा च येनोपहितः साक्षी स उपाधिः परमार्थस्तस्यापा-

संबंधसंबंधिनामन्यतमस्य कल्पकत्वे आत्माश्रयान्योन्याश्रयकूटस्थत्वहान्यसंगत्वहान्यनिर्मोक्षप्रसंगा-
नोपपत्त्यर्थं प्राप्तेः न चाविद्याध्यासवत्तत्संबंधाध्यासस्याप्यनादित्वेनाविद्यादिहेतुजन्यत्वेपि तज्ज्ञत्वतथा
तन्निवृत्तौ तन्निवृत्तिः स्यादिति वाच्यं तस्यानादित्वेपि निरपेक्षस्य साक्ष्यधीनत्वात् ज्ञानस्याज्ञानानपेक्षत्वे तयोरन्त-
त्वानुपपत्तेः न च संबंधिज्ञानाधीनं संबंधज्ञानं लोके दृष्टमिति वाच्यं तस्य प्रत्यक्षादिसिद्धस्य तत्सापेक्ष-
त्वेपीह संबंधिनोप्यज्ञानस्य साक्षिसंबंधसापेक्षस्फूर्तिकत्वेन वैपरीत्यात् न च संबंधः स्वाश्रयत्यर्थे संबंधि-
नमपेक्षत इति वाच्यम् ॥

धेरुक्तविधया पारमार्थिकत्वात् तन्निवृत्तेर्नाथस्यायामपि तादृग्ज्ञानसंबंधहे-
तोस्सद्भावादनुच्छिन्नः संसारः स्यादित्यर्थः अथैतद्दोषपरिहाराय ज्ञानसंबंधाध्यासोऽनादिरिति तर्हि अनादि-
भावत्वादात्मवन्निवृत्तिर्न स्यात् न च निवृत्तौ अनादिभावत्वं न प्रयोजकं किं त्वविद्यातत्त्वानधिकरणत्वं संबं-
धश्च निवर्तते अविद्यात्तत्त्वादिति प्रकित्वापि विहरति नचाविद्येति उपाधेः साधनव्यापकत्वे पूर्वोक्तहेतुमा-
ह तस्येति किमिदमज्ञानतंत्रत्वं किमज्ञानजन्यत्वं उताज्ञानभास्यत्वं अथाज्ञानाधीनस्थितिकत्वं न प्रथम-
द्वितीयावित्याह अनादेरित्यादिना संबंधिज्ञानाधीनमिति तथा च विशेषणीभूतसंबंधिनोपि नतज्ज्ञानहे-
तुत्वात् संबंधस्याज्ञानतंत्रत्वमित्यर्थः तृतीयं दूषयति ॥ नचेति ॥ ॐ नमः परमात्मने ॥ श्रीरामचंद्राय नमः

अस्मिन्न्[illegible]णाद्याचार्यस्य प्रतियोगिसिद्धिज्ञानाधीनज्ञानत्वेन सिद्धिपदार्थं विचारयितुं सिद्धान्ती प्रवर्त्तते ननु केयमिति साक्षिसिद्धत्वेनेति अयमर्थः अहमज्ञ इति ज्ञातृत्वमनुभवत्वादिसिद्धा सा च न तावत्स्वप्रकाशमहिम्नाऽज्ञानस्य जडत्वात् नापि प्रमाणात् लिङ्गाद्यप्रतिसंधानजन्यत्वेनानुमानादेरभावात् प्रत्यक्षादिति चेत् तत्किं बहिरिन्द्रियजं उत मनः बहिरिन्द्रियाणामनंतरप्रवृत्तेर्नाद्यः मनस्त्वेन न स्वज्ञानमात्रं स्फुरति किंत्वहमवछिन्नं तदाहमिति विशेषणांशः शुद्ध आत्मा अहंकारविशिष्टो वा अहंकारोपाधिको वा नाद्यः स्वच्छस्य स्वप्रकाशत्वात् द्वितीये अहंकारात्मकस्य मनसोऽपि मनोवेद्यत्वमित्यतीन्द्रियत्वहानिः आत्माश्रयस्य न तृये अहंकारसाकारवृत्तावप्रतीतिर्न स्यात् उपाधेस्तु स्यात्तथा विषयकोटावप्रवेशात् तथापि तदाकारवादत्वे साकारवादप्रसंगात् सुषुप्तौ मनसोऽसत्वेऽपि अज्ञानप्रतिभासात् मनसस्तद्धर्मीत्वकारणत्वानुपपत्तेश्च

ननु केयं सिद्धिः उत्पत्तिर्ज्ञप्तिर्वा नाद्यः अनादेस्तदभावस्य सत्वात् न द्वितीयः साक्षिसिद्धत्वेन तदभावात् मैवं अज्ञानस्य साक्षिसिद्धत्वे साक्षिणोऽसंगत्वप्रसंगात् संबंधं विना चाप्रकाशकत्वात् न च पारमार्थि कसंबंधाभावेऽपि कल्पितसंबंधोऽस्त्येवेति वाच्यम्॥

तस्मात्पक्षविशेषणात्साक्षिमेयाज्ञानमिति धर्मिणो ज्ञानस्य सिद्धिरेवेति तदसिद्धिरसिद्धेति साक्षिवेद्यत्वमज्ञानस्य निरस्यति मैवमिति साक्षी किं स्वसंबद्धं प्रकाशयति उतासंबद्धं आद्यमपसिद्धान्तप्रसंगेन दूषयति अज्ञानस्येति तथा चासंगो नहि सज्जते इति श्रुतिविरोधप्रसंग इति द्वितीयं दूषयति संबंधं विनेति प्रदीपादेः संबद्धस्यैव प्रकाशकत्वदृष्टेरिति हेतुसमुच्चयार्थश्चकारः ननु संबंधग्रहणाज्ञानेन साक्षिणोऽभ्युपेते किं काल्पनिकः किं वा वास्तवः नान्त्यः अतत्त्वमर्थविशेषणत्वात् न हि कल्पितः सर्पः प्रदीपेन भास्यते न वा तेन संबंधः प्रदीपस्य पारमार्थिकः अथ संबंधमात्रमंग तर्हि कल्पितः सोऽस्त्येवेति सिद्धान्तिशंकामनूद्य दूषयति न चेति संबंधकल्पनं किं सादिरनादिर्वा सादिश्चेत् तर्हि कल्पकं संबंधं तत्संबंधिभ्यामन्यत्प्रयुक्तेतदेव नाद्यः संयोगसंबंधिनोऽन्यत्र संबंधोपादानत्वात्

ॐ

ननुसादेरध्यासस्यानृतत्वाभावेऽपि कार्यत्वाद्भवतु तत्सामग्र्यपेक्षा अध्यासमात्रमज्ञानमनादीति किंतत्रसामग्री
करिष्यतीत्याशंक्याह नचेति बाधकेऽन्वेयमध्यासत्वं नचाज्ञानेबाधकमस्तीतिनाज्ञानमध्यस्तमित्यर्थः
अज्ञानेबाधकमाशङ्कते विद्येति किंविद्यानिवर्त्यत्वंबाध्यत्वमुतकल्पितत्वं तद्विद्यानिवर्त्यत्वंबाध्यत्वंपूर्वज्ञानस्योत्तर
ज्ञाननिवर्त्यस्यबाध्यत्वात्स्यादित्यभिप्रेत्याह नेति द्वितीयंदूषयति अन्योन्येति विकल्पितत्वासिद्धेज्ञानबाध्य
त्वेज्ञानबाध्यत्वेचकल्पितत्वमित्यन्योन्याश्रयइत्यर्थः ननुपूर्वोक्तदोषाः किमज्ञानस्यस्वरूपमुपलपंति

नचानादिरयमध्यासः अध्यासत्वासिद्धेः विद्याबाध्यत्वात्तत्सिद्धिरितिचेन्न अन्योन्याश्रयात्
नचैतेदोषावस्तुनोवस्तुत्वापहारकाः कल्पितस्यचाज्ञानस्यकिमेतेकुर्युः स्वतएवतस्यावस्तु
त्वाभावात् अतएवोक्तमलंकारोह्ययमस्माकंयद्युक्तिप्रमाणाभ्यांदुर्घटत्वंसुघटत्वेकल्पितत्वं
दुर्घटंभवेदितिवाच्यं कल्पितत्वस्यबाधाप्यसिद्धत्वात्॥ धर्मिणएवादिसिद्धेः॥ श्रीरामचंद्रायनमः

उतवस्तुत्वं नाद्यः अहमज्ञइतिप्रतीतिसिद्धस्याज्ञानस्वरूपापलापायोगात् नद्वितीयः इष्टापत्तेरितिसिद्धां
तिमतमनूद्यदूषयति नचेत्यादिना अज्ञानस्यकल्पितत्वेसिद्धेदोषैरपि तदेवसंपाद्यतइतिस्यादे
वेष्टापत्तिः नचकल्पितत्वंसिद्धमिति कथमिष्टापत्तिरिति नचवाच्यमित्यत्रहेतुमाह कल्पितत्व
स्येति ननुतेनैवदोषास्तर्हिविद्यायांकल्पितत्वंसाधयिष्यंतीतितत्राह धर्मिणएवेति सिद्धेधर्मिणिदो
षैस्तत्कल्पितत्वंसाधनीयंनाद्यापिधर्म्यज्ञानंसिद्धं अहमज्ञइतिप्रतीतेर्ज्ञानाभावविषयत्वादित्यर्थः॥ ॥

नन्वज्ञानं यदि निरूपणापथमवतरेत्तदावनुतदोषापादानं वा निमित्तमात्रत्वादेव नास्ति च वक्ष्यमाणयुक्तेरित्याशंकते नन्विद
मिति अनवस्थादीति अनवस्था च तत्स्या चक्रादी चानवस्थादयस्तेषां प्रसंगादित्यर्थः अनवस्थायात्मादिभूताव
न्योन्याश्रय चक्रकाख्यो दोषोऽज्ञानान्तरान्वेषणे अन्योन्याश्रयः तृतीयाज्ञानस्वीकारे चक्रकं चतुर्थे अनवस्थे
त्यर्थः यद्वानन्ताज्ञानस्वीकारस्तदा स्यादयमनन्ताऽज्ञानपरंपरावगाहिनी संवित्स्यात् न च सास्तीति प्रमाणाभावे
आदिपदेन गृह्यते ब्रह्माविद्याकारणमिति पक्षं दूषयति न द्वितीय इति किमन्योपहितं ब्रह्माविद्याकारणं मुतस्वु
द्धं नाद्यः उपधानस्याविद्यातत्कार्यअन्यतरस्याविद्यातः प्रागसत्वात् द्वितीयं दूषयति ब्रह्मणइति कूटस्थत्वा
दित्यर्थः कारणत्वमंगीकृत्यापि दूषयति अनिर्मोक्षेति शुद्धं ब्रह्माज्ञानकारणं चेत्तर्हि मुक्तस्यापि संसारः स्यात्

नन्विदं अज्ञानकार्यं विकार्यं वा आद्ये किमस्य कारणं अज्ञानं ब्रह्म वा नाद्यः तेनैव तज्ज्ञानने आत्माश्रयात्
अज्ञानान्तरानुसरणे त्वनवस्थादिप्रसंगात् न द्वितीयः ब्रह्मणो कारणत्वात् अनिर्मोक्षप्रसंगा
च्च द्वितीये त्वनादिभावस्यानिवृत्तिप्रसंगः ब्रह्मवत् न च कल्पितत्वाकल्पितत्वाभ्यां विशेषः कल्पनाया
(मप्यभावेन कल्पनानुपपत्तेः ।।

सारकारणमज्ञानस्य सामग्री सत्वेन दृष्टत्वेराव प्रकत्वादित्यर्थः अनादीति विमतमज्ञानं न निवर्तते अनादि
त्वे सति भावत्वाद् ब्रह्मवदित्यर्थः घटादावनैकान्तिकत्वपरिहाराय अनादीति विशेषणं प्रागभावे व्यभिचारप
रिहाराय विशेष्यं अज्ञानमिथ्यात्वं तु पाधिमाशंक्य निराचष्टे नचेति साधनव्यापकत्वादिति हेतुमाह क
ल्पनेति सादृश्यं पूर्वसंस्कारो दोषश्चेति त्रयं कल्पना सामग्री तदत्राज्ञानकल्पने नास्ति अज्ञानं यदि क
ल्पितं तर्हि आत्मन्येव तत्कल्पितमित्यात्मा अधिष्ठानं न चात्माज्ञानयोः सादृश्यमस्ति निरवयवत्वात्
न चापूर्वसंस्कारो दोषो वास्ति तयोरज्ञानपूर्वकत्वे नाज्ञानात्प्रागसिद्धेरित्यर्थः ।। श्री रामचंद्राय नमः

ॐ

ॐ

ननु परिचितमधिकारणत्वं किंनिमित्तं निर्वक्तिनिःप्रयोजनत्वात् तत्राह ब्रह्मेति अन्यार्थत्वं स्पष्टयति एकमेवेत्यादि
ना तस्याद्वयत्वेन ननु सर्वेषां वेदांतानां ब्रह्मपरत्वं ब्रह्मपरत्वं समन्वयार्थः तर्हि वेदांतैकदेशस्याज्ञानकारणपरत्वे कथं
नापसिद्धांतस्तत्राह नचेति किमर्थं तर्हि श्रुत्योच्यते इति तत्राह तस्येति कारणत्वस्येत्यर्थः अयं भावः चिर
दात्मनो नानादुःखित्वप्रकाशपत्यादिरूपेण प्रतिभासो भ्रमस्तन्निमित्तं चेन्नाज्ञानकारणवाद इत्यर्थः न
जीवात्मनि दुःखं विषयकरणादोषात् भ्रमः संविदि स्यादपि तु भवति मोहात् केवलादेवमेव भगवति परमात्मन्यपि
द्वितीये विचित्रा ह्ययमन्तिरियमस्तमानिरज्ञानहेतुरिति किंनिमित्तमुख्योपादानकारणत्वं श्रुतेः प्राच्याख्यति

ब्रह्मकारणश्रुतेरन्यार्थत्वाच्च एकमेवाद्वितीयमिति श्रुतेरद्वितीयत्वं तावद्ब्रह्मणः सिद्धं तत्र कथं संभाव्य
तामिति कार्यकारणयोरभेदस्तावल्लोकसिद्धः ब्रह्मापि जगत्कारणमिति कथमसंभावना स्यादित्य
द्वितीयसंभावनाबुद्धिमात्रप्रयोजनत्वात्तस्याः नचाज्ञानमपि जगत्कारणं श्रुत्या विवक्षितं तस्य भ्रम
निमित्तमात्रत्वेनैवोक्तत्वात् कार्यकारणवादस्य वेदांतबहिर्भूतत्वात् विवर्तवादस्यैव वेदांतवादत्वात् किं
किंजगतः कारणमिति पृष्टे प्राप्ताप्रतिभानिमित्तमात्रप्रयोजनतयाऽज्ञानं कारणमित्यभिहितत्वाच्च॥

कल्पितमकल्पितं वा णपं

मित्तमात्रपरत्ताकल्प्यत इति तत्राह कार्येति सदसतोः कार्यत्वानिरूपणात् व्यापारवत्कारणत्वव्यापारस्या
कार्यत्वे सदाकार्यप्रसक्तेः कार्यत्वेऽनवस्थाप्रसक्तेः कार्यकारणभावस्य कल्पितत्वेन प्रमाणायोग्यत्वात् तत्त्वे अकल्पिते
वाद्वैतापत्तेर्वेदांतवादबहिर्भूतः कार्यकारणवाद इत्यर्थः यद्वा कार्यकारणवादेऽस्मारंभवादस्य परिणामवाद
स्य वा प्रसक्तेस्तस्य चानिष्टत्वाद्वेदांतवादबहिर्भूत एव स इत्यर्थः कस्तर्हि वेदांतवाद इति तत्राह विव
र्तेति एकस्य तत्त्वादप्रच्युतस्य पूर्वविपरीतासत्यानेकरूपावभासो विवर्तः नन्वेतस्याकल्पितायां मायां
तु प्रकृतिं विद्यादित्यादिवाक्ये प्रकृतिशब्दाविरुध्यत इत्याशंक्योपादानत्वबोधकवाक्यस्य गत्यंतरमाह
किंजगत इति॥

शुक्त्याः रजताकारप्रतीतेर्विवर्तः

विद्येव:

श्लोकं व्याचष्टे दृश्यत्वादीति जगतोऽकारणमित्यन्वयः अत्र विद्यानामविद्यायास्त्वभावः सचनजगदुपादानं तत्कार्य
स्वभावत्वात्तत्राह अनिर्वचनीयेति सदसद्विलक्षणेत्यर्थः जगदुपादानत्वसिद्धयेऽविद्यां विशिनष्टि अनादीति न
नु तथापि जगतः सत्वेन प्रतीतेः सद्विलक्षणाऽविद्या कथं तदुपादानं तत्राह अनिर्वचनीयस्येति तत्र प्रमाणमाह
दृश्यत्वादीति विमतं सद्विविक्तं दृश्यत्वात्परिच्छिन्नत्वात्समतवदित्यर्थः अपरोक्षत्वाच्च नासत् ततः सदसद्वि
लक्षणमनिर्वचनीयं जगदित्यर्थः तथानिर्वचनीयस्य जगतोऽनिर्वचनीयमज्ञानमेवोपादानं युक्तं कार्यका
रणभावयोस्तुल्यरूपत्वादित्यर्थः एवकारव्यावृत्त्यमाह नब्रह्मेति ननु श्रुत्या चेत्कारणता बोध्यते कथमात्मा

दृश्यत्वाद्यनुमानसिद्धाऽनिर्वचनीयस्य जगतोऽनाद्यनिर्वचनीयाविद्यैव कारणं न ब्रह्म तत्त्वस्य कूटस्थस्य का
र्यकारणविलक्षणत्वात् तदेतद्ब्रह्मापूर्वमनपरमनंतरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरितिश्रुतेः क
थं नहि ब्रह्मणो जगत्कारणत्वं श्रुतौ प्रसिद्धं जगद्भ्रमकारणाधिष्ठानत्वेन कारणोक्तोपचारात्॥ ॥ ॥

नहिलक्षणत्वमाह तदेतदिति तदेतद्ज्ञानादिविषयं जगद्ब्रह्मैव नत्वतोऽन्यदपरमस्तीत्यर्थः अपूर्वमकार्यं न
विद्यते अपरं कार्यं यस्य तदनपरमकारणमित्यर्थः नसामान्यं ब्रह्मेत्याह अनंतरमिति नहि विशेषइतिवाह
अबाह्यमिति अव्यावृत्तानुगतमित्यर्थः तस्यपरोक्षत्वं निरस्यति अयमिति अपरोक्षमित्यर्थः आत्म
नः संसारित्वव्यावर्तनायाह ब्रह्मेति आत्मानं विशिनष्टि सर्वानुभूरिति सर्वात्माचिदात्मत्वादनुभू
रिति सर्वात्माचिदात्मत्वादनुभूरिति इतिशब्दः पूर्वपरामर्शार्थः तस्य पूर्वोक्तं विज्ञानं कर्तव्यमिति वे
वेदान्तात्तदुल्लंघने संसारानर्थप्रसक्तिः तत्करणे चात्मनः कृतकृत्यतेत्यर्थः कूटस्थत्वात्करत्वस्य
चक्रत्वानिषिद्धत्वात् कारणश्रुतेर्जगदुपादानाज्ञानाधिष्ठानत्वेनाप्युपपत्तेर्न ब्रह्मकारणं किंत्वज्ञानमे
वेत्यर्थः॥

अथैतद्दोषपरिहारार्थं धर्म्यभेदवादको धर्मस्यभेदकमिथ्यास्वरूपभेदादन्यः स्वीक्रियते तर्हि स किं भिन्न इति।
आद्यं दूषयति यदीति स्वरूपभेदादन्यश्चेत् धर्मभेदस्तर्हि निःस्वरूपः स्यात् भिन्नद्विधाभूतस्य चाश्रयत्वानुप
पत्ते निराश्रयत्वप्रसङ्ग इति न निरूपणापद्मम इत्तीत्यर्थः निराश्रयत्वमुपपादयति नहीत्यादिना द्वितीयं दूषय
ति अभिन्नत्वे इति किंच पटघटप्रतियोगिको भेदो घटस्य स्वरूपं धर्मो वा आद्ये संप्रतियोगिकभेदस्य घटस्वरूपत्वे
भेदस्य घटाद्वैतप्रसंगः घटधर्मत्वे पटोपि घटधर्मत्वाभिधानात् किंच स्वरूपस्य भेदत्वे संप्रायायाप्युच्छेदप्रसंगः इत्या
दिदोषमभिप्रेत्य भेददूषणमुपसंहरति तस्मादिति सर्वथेति स्वरूपभेदपदयोरित्यर्थः किंचाविद्यतप्रपंचस्य

अज्ञोकारपत्ते
कारणत्ववादिनां गतिमाह अधिष्ठानत्वे
ति जगदुपादानमायाश्रयत्वमात्रेणेत्यर्थः

वस्तुस्वरूपातिरिक्तस्य तस्य निःस्वरूपस्य निराश्रयस्यासिद्धिरेव नहि भिन्नाश्रयत्वमाश्रयो भवति अ
न्यथा घटोपि घटो जलाधारः स्यात् अभिन्नेत्वाश्रये भेदो विरोधादेव निवर्त्तते तस्मादलमनेन
नात्मविचारेण सर्वथाप्यस्वद्वादेरात्मानात्मभेदगोचरत्वं नास्तीति सिद्धं यदुक्तं जगत्कारणवि
षयश्रुत्योरज्ञानब्रह्मगोचरयोर्मिथो विरोध इति तन्न ब्रह्मणो नाज्ञागज्जन्मब्रह्मणो कारणत्वतः
(अधिष्ठानत्वमात्रेण कारणं ब्रह्म गीयते॥ ॥

साक्षिमात्रसिद्धस्य प्रमाणायोग्यत्वात् तत्प्रतियोगिकभेदस्य कल्पितत्वान्न पारमार्थिकाद्वैतहतिः न
च प्रपंचस्य ब्रह्मकारणत्वं अविद्योपादानत्वप्रतिपादकवाक्यविरोधात् तर्हि ब्रह्मकारणत्वप्रतिपा
दकवाक्यानामुभयमपि कारणमिति यदुक्तं तदनूद्य दूषयति यदुक्तमित्यादिना तन्नेति नेति प्रतिज्ञा
यां हेतुमाह ब्रह्मेति अज्ञानमेव जगदुपादानमित्यर्थः ननूभयत्र कारणत्वप्रतिपादकवाक्यसद्भावे कथ
मयं नियमस्तत्राह ब्रह्मण इति अविकारित्वादित्यर्थः सदेव सोम्येदमग्र आसीदित्यादिवाक्यानां ब्रह्म

त्तया तिरिक्तानुभवात्

द्वितीयं द्वेधा विकल्प्य दूषयति तेषां चेति विशेषणविशेष्यसंबंधानां प्रत्येकं विशिष्टत्वे केवलदंडेऽपि विशि
ष्टव्यवहारस्स्यात् न च सास्ति केवलस्य दंडस्य तद्व्यवहाराजनकत्वात् एवं विशेष्यसंबंधयोरप्यूह्यं समुदायः कि
मेतेभ्योऽतिरिक्त एव एत एव वा आद्ये दूषणं पूर्वमुक्तं द्वितीये प्रत्येकं तद्व्यवहारापत्तिः तर्हि पूर्वोक्तदोषा
पत्त्या विशेषणविशेष्ययोस्संबंध एव विशिष्टमित्यत आह नचेति किं विशेषणादिव्यावृत्तः संबंधो विशि
ष्टमुत तत्तदुपलक्षितः आद्यनिरासे हेतुमाह विशेषणेति अपिशब्दो विशेषणादिदृष्टान्तार्थः द्वितीयं दू
षयति विशेषणेति तद्व्यवहारो विशिष्टप्रयुक्तव्यवहार इत्यर्थः नहि देवदत्तगृहप्रयुक्तो व्यवहारो गृहोपल
क्षितकाके दृश्यते किंच स्वरूपं भेद इति वदन्नप्रष्टव्यः किमस्य स्वरूपप्रतियोगिकः उत स्वरूपप्रतियोगिकः

तेषां च प्रत्येकसमुदायाभ्यां विशिष्टव्यवहाराजननात् न च संबंध एव विशिष्टं[1] विशेषणावि
शेष्ययोस्तद्व्यवहाराभावप्रसंगात् न च वस्तुस्वरूपं भेद इति वाच्यं किंतु अपि वाच्यं तस्य विदारणा
त्मनो वस्तुस्वरूपनाश स्वरूपत्वात् तात्त्वतः प्रतियोगिनोरभेदासंभवात् नहि परविदारणं

१ ५ विशेषणविशेष्यसंबंधा इत्यत्र संबंधेपि तद्व्यवहारादर्शनात् ४ ओरू उपादि १ (पर स्वरूपं ।। ।।

तत्त्व१ दैॅ

नाद्यः निःस्वरूपस्यानुक्तत्वेन तत्प्रतियोगिकस्य भेदस्यानुक्तत्वापत्तेः द्वितीयं दूषयति नचेति अयमर्थः
स्वरूपप्रतियोगिको भेदः किं प्रतियोगिनपरत्वमपेक्ष्य तद्धर्मिणः नाद्यः इत्याह नाशेति तत्र हेतुः तस्येति विद्
विदारणेऽत्यन्तमितरेत्यर्थः एतदेव स्वरूपयति नहीति नहि द्वितीयः स्वरूपत्वस्य स्वप्रतियोगितावच्छेदकत्वेन
तदनधिकरणस्य धर्मित्वे निःस्वरूपत्वापत्ताश्रयत्वादाश्रयानुपपत्तेः अथ स्वरूपभेदेन स्वरूपत्वं प्रतियोगिता
वच्छेदकं किंतु वैधर्म्यस्वरूपभेदस्य सर्वत्र वैधर्म्यव्याप्तत्वादिति चेन्न वैधर्म्ये हि तद्वृत्तित्वे सति तदितरा
वृत्तित्वं न च तत् रूपशब्दार्थभेदज्ञानाधीनज्ञाने प्रतियोगितावच्छेदके ज्ञानाधीनं च भेदज्ञानं तथा चान्योन्याश्र
यइति ।।

उ

वे॰ मु॰ टी॰
८१

ननु कथमपि प्रपंचभेदः प्रामाणिकश्चेत्तावतापि कथं विशिष्टसिद्धिरित्याशंक्याह नचेति भेदस्तावदतिरि-
क्तस्यैव नस्वीक्रियते ब्रह्मात्मकत्वेन स्वप्रकाशत्वात् प्रपञ्चादिविषयत्वनिषेधाच्च नभेदस्य प्रत्यक्षस्वरू-
पत्वेनापि प्रामाणिकत्वेनत्यर्थः सर्वप्रत्यक्षवेद्यत्वमुपहितत्वमेव तत्पुरुष इति भावः विशिष्टस्वरूपमेव नहि भे-
दोस्तु तत्रोक्तदोषाप्रसंगात् प्रसंगादित्याशंक्य द्वितीयमनुवदति द्वितीयइति विशिष्टस्वरूपं भेद इति
तिपक्षेपीदं विवेचनीयं विशेषणविशेष्ययोर्भेदे सति विशिष्टं स्वरूपांतरं विशेषणादिभेदात्स्यात्तद
तिवक्तव्यं उत विशेषणादिभेदाभावविशिष्टस्वरूपं भेद इति वक्तव्यमिति विकल्प्याद्यमनुवदति वि-
शेषणेति आद्यं पक्षमंगीकारयित्वा दूषयति नचाद्यचेति विशेषणविशेष्यभेदो विशिष्टस्वरूपोपपादकः

नचतदप्युपपद्यते नचद्रक्ष्यागद्यते नैववाचा नमनसैव तपसा कर्मणा वेत्यादिश्रुतिविरोधप्र-
संगात् द्वितीये विशेषणविशेष्ययोर्भेदविशिष्टं स्वरूपांतरं भेद इति वाच्यं तथाच तेनाप्यन्योन्या-
श्रयादिदोषे वदुस्तरः नचयस्याभेदेनाविशिष्टस्वरूपासिद्धि तथापि विशिष्टं स्वरूपं प्रत्यक्षा-
दिगोचरः तस्यापि शुद्धवस्तुस्वरूपवन्निर्धर्मकत्वात् नहि रूपादिविशिष्टे रूपादयः संति तच्च
विशिष्टं नाम किंचिदस्त्यस्ति विशेषणविशेष्यतत्संबंधातिरिक्तस्य तस्याननुभवात्॥

किं विशिष्टं भेद एव उत भेदांतरं आद्ये आत्माश्रयः द्वितीये अन्योन्याश्रयः अथ विशेषणविशेष्यभेदोप-
पादकस्तृतीय एव विशिष्टभेदः स्वीक्रियते तदा चक्रकं चतुर्थे पुनरनवस्थाइत्यर्थः द्वितीयपक्षं दूषयति अ-
भेदेचेति विशेषणविशेष्ययोरभेदेऽन्यतरपरिशेषाद्विशिष्टस्वरूपासिद्धिरित्यर्थः विशिष्टस्वरू-
पात्मकभेदस्य प्रामाणिकत्वं नस्यादिति हेत्वंतरमाह नचेति किंच विशिष्टस्वरूपं किल भेदः तत्र
विशिष्टं किं विशेषणादिभ्योऽन्यदुतानन्यत्॥ ॥ ॥आद्यं दूषयति॥ नचेति॥॥

शिव
हरे

65

ततश्च सर्वस्य सर्वभेदोच्छेदात्सर्वाद्वैतमेव तत्त्वमस्यादिवाक्यावगम्यमित्यभिप्रायः सिद्धान्तमुपसंहरति अत इति यत्तु
पूर्वपक्षे स्वरूपभेदः प्रत्यक्षादिगोचर इति तद्विरोधेऽप्यवेदान्तप्रामाण्यमिति तद्दूषयितुमनुवदति यद्वेति अ
असद्विषयत्वेनेति पराञ्चि खानीति श्रुतेः प्रत्यक्षादेरनात्मविषयत्वमित्यर्थः स्वरूपस्य सद्रूपत्वेनात्मत्वात्तत्र
तादात्म्ये भेदे प्रत्यक्षादिप्रवृत्तिर्युक्तेति भावः ननु सर्वप्रत्ययवेद्यं स्वरूपमिति भवतो मतं तत्कथं तस्य प्रत्य
क्षाद्यविषयत्वमित्याशंक्य तदुत्तरमाह स्वरूपस्येति स्वरूपस्य शुद्धत्वमुपाध्यसंसृष्टत्वं विशिष्टत्वमुपाधिसंबंधक
त्वं स्यादिति शुद्धस्वरूपमेव भेद इति पक्षस्यार्थः व्यवहारेति अयमर्थः ब्रह्मणस्तावत्स्वाभाविको धर्मोऽस्ति स्वविका
रित्वभावत्वात् औपाधिकस्तूपाध्यसंसृष्टेन संभवतीति शुद्धपदमहिम्ना निर्धर्मकत्वं वक्तव्यत्वेन प्राप्तं तथा च व्य

अतः अस्याभिप्रायपरिज्ञानविजृंभितमेतद्यत्तादात्म्यभेदेनाद्वैतक्षतिरिति यच्च स्वरूपं भेदः प्रत्यक्षादिगोच
र इति तदसत् तुच्छं प्रत्यक्षादेरसद्विषयत्वेन स्वरूपागोचरत्वात् स्वरूपस्य भेदत्वानुपपत्तेश्च कुत इति चेत्
शृणु किं शुद्धं सर्वधर्मविनिर्मुक्तं स्वरूपं भेदः किं विशिष्टं आद्ये व्यवहारहेतुत्वमपि तस्य नास्तीति वक्त
व्यं तथा च सर्वव्यवहारानास्पदं सर्वधर्मविनिर्मुक्तमस्थूलमनण्वादिशास्त्रसिद्धं सदात्मकं ब्रह्मैव नामां
(तदेव प्रत्यक्षादिगोचर इत्युक्तं स्यात् ॥ ॥ ॥

वहारविषयत्वमपि नास्तीति वक्तव्यं तथा हि व्यवहारो हि
अभिवदनं चाभिज्ञा वा ताः धर्ममात्राद्येव प्रवृत्तिः तदभावे कथं स्यात् स्वप्रकाशत्वादेव न द्विती
यः न तेऽव्यवहार्यं नादं स्वरूपं वक्तव्यमिति अत्रैव किंतत्तत्राह तथा चेति न च स्थूलमित्यत्र नञः प्रसज्या
र्थकत्वाद्भावरूपता ब्रह्मणः स्यादित्यत आह सदात्मकमिति कल्पितस्य स्थूलत्वादेरधिष्ठानभेदेना
सत्त्वादसद्भावस्वभावत्वात्सदात्मकं ब्रह्मेत्यर्थः नामांतरेणेति भेदः प्रत्यक्षादिगोचर इति वदता भेदस्यो
क्तस्वरूपात्मकब्रह्मानतिरेकात् ब्रह्मैव भेद इति संज्ञांतरेण प्रत्यक्षादिगम्यमित्युक्तं स्यात् तथा च नाद्वि
व्यापत्तिरिति भावः

अवस्थानां तत्कर्तृत्वस्य प्रत्यगात्मनि ब्रह्मणि च न गतत्कर्तृत्वादेरध्यस्तत्वनिश्चयस्य फलमाह तत इति ततो गुरुमु
पसर्पतीति अन्वयः तत्र कर्तृत्वादिप्रपंचस्य कल्पितत्वज्ञानानंतरमित्यर्थः ननु गुरूपसत्त्यर्थं निश्चयार्थं स चेद्
तद्विधया ज्ञातः किं तदुपसर्पणेनेत्यत आह संदिहान इति संदेहे हेतुमाह शुद्धयोरिति ननु तत्त्वंपदार्थयोर्भेद एव प्र
माणं दृश्यते नाहमीश्वर इत्यादित्यत आह लक्षणयोरिति को वा लक्षणयोरित्यत आह शुद्ध इति शुद्धत्वमुपपादयति
निरस्तेति प्रत्यक्षादेरनात्मविषयत्वादात्मभेदग्राहकत्वं न युक्तमिति भावः ननु तदुपजीव्यभेदनानात्मसंबंधस्या
नात्मधर्मत्वमिति शुद्धयोर्न भावादभेदपरं वाक्यं न स्यात् वा भविष्यतीति तत्राह अभेद इति युक्ते लर्कत्वेन स्वातंत्र्येण
प्रमाणत्वान्नाभेदस्य मापकत्वं न स्यादिति ननु प्रमाणादर्शनमसिद्धं अधीतवेदस्य चाधिकारादिति तत्राह संदि
हान इति यद्यपि गृहीतपदपदार्थसंगतिनाधीतः शब्दोऽर्थप्रत्यायक एव तथापि असंभावनाग्रस्तविषयत्वात्तत्रापि
अप्रत्ययः प्रतिष्ठां न लभते इति न तत्र प्रमाणत्वेन व्यवह्रियत इति भावः एतेन नित्यानित्यवस्तुविवेक इत्यधिका

ततः शुद्धयोस्तत्त्वंपदार्थयोर्लक्षणयोर्निरस्तानात्मसंबंधयोरभेदे अभेदे वा प्रमाणमपश्यन् संदिहा
नः संसाररोगराजानुचरगर्भवासाद्यनेकरोगसमुद्भूतदुःखव्रातानुभवात् सातिशयोद्वेगः अस्तलोकद्व
यमपि सुखं विषमिव मन्यमानस्तरति शोकमात्मविदिति श्रुत्या संसारदावानलप्रशमनं तत्संताप
शमनं नाम तां चिन्मात्मविद्यामजानन् ततः परमज्ञानसमुद्रपारदृश्वानं परमकारुणिकं गुरुमुप
सर्पति तेन च गुरुणा तत्त्वंपदार्थयोरभेदे तत्त्वमस्यादिवाक्येन नित्यनिर्दोषेण बोधिते स्वयमेवाद्वैतं तत्त्वमा

रिविशेषणमर्था त्रिरूपितं इदानीं वैराग्यमधिकारिविशेषणं तदनंतरमाह संसारेति ननु तथापि गुरूपसदनस्य
संसारनिवृत्तिहेतुत्वात् न चान्यार्थं वैविद्यादित्यादिश्रुतेः संसारनिवर्तकज्ञानहेतुत्वं गुरूपसदनस्येति कोच्य
आत्मज्ञानस्य तन्निवर्तकत्वे प्रमाणाभावादित्याशंक्याह तरतीति ननु स्वर्गसाधने याग इति ज्ञानवानपि
न सर्वो वैदिको यागे प्रवर्तत एवेति कुचित्संभवतीत्यत आह परमिति परमं परिपूर्णं ब्रह्मात्मैक्यं तदपरोक्षज्ञानेच्छुः त
या च यस्येच्छा स प्रवर्तते तत्र अन्य इति भावः श्रोत्रियं ब्रह्मनिष्ठमिति श्रुतिमाश्रित्य गुरुं विशिनष्टि अपरोक्षेति उ
पसर्पतीत्यत्र शास्त्रोक्तविधिनेति शेषः गुरुकृत्यमाह तेनेति वाक्यप्रमाण्यमुपपादयति नित्यनिर्दो
षेति यद्यप्यस्मिन्नंते वेदस्यापि कल्पितत्वान्न नित्यत्वं तथाप्यबुद्धिपूर्वत्वात् उत्पत्तावन्यत्वान्नित्यत्वो
पचारः आत्मबुद्धेरपि साक्षात्त्वं दर्शयति स्वयमेवेति साक्षात्कृत्येत्यनेन तत्प्रमाणं ताप्रावरकाज्ञानं स...

सदनमत्र पपत्तेत

वे॰सु॰टी॰
७९

कथं तर्हि नित्यः कारणं कार्यं स्यादिति शंकते किं तर्हीति कारणं तत्स्य सत्वान्नास्ति कारणं कार्यमिति परि
हरति यथा योग्यमिति स्वसिद्धांते यादृक् यादृक् कारणं भवितुं योग्यं परमाण्वादि तादृगस्येत्यर्थः
तत्र तत्र संरंभस्तावदारब्धः महत्वे सति द्रव्योपादानत्वात् कपालादिवदिति त्रसरेणोः कार्यत्वसिद्धा
एवं तदवयवेष्वप्यूह्यं तथाच विवादाध्यासितं कार्यद्रव्यं त्रसरेण्ववयवारब्धं स्वपरिमाणादल्प
तरपरिमाणारब्धं कार्यद्रव्यत्वात् संमतवदिति य एवं द्व्यणुकपरिमाणापेक्षयाल्पन्यूनपरिमाणो
द्व्यणुकारंभकः स एव परमाणुर्जगतो मूलकारणमिति वैशेषिकादयो मन्यंते एवं प्रधानादि

किं तर्हि जगत्कारणमिति चेत् यथा योग्यं परमाण्वादिकमेव तस्मादनात्मभेदप्रत्यक्षादिसिद्धे
जगत्येके कथमद्वैतसिद्धिः तदयं संग्रहः आत्मभेदप्रमित्यापि तद्वैतं न प्रसिध्यति अनात्मभेद
संसिद्धेः प्रत्यक्षादेः प्रमाणतः मैवं श्रुत्यभिप्रायापरिज्ञानात् नहि तत्वमस्यादिश्रुत्या प्रत्यगा
त्मानं प्रपंचस्यापयित्वा शुद्धं प्रत्यगभेदावबोधनं इति श्रुत्यभिप्रायः ।। श्रीरामाय नमः ।। ।।

यावद्योऽप्युद्ध इति भावः प्रपंचस्य परमाण्वादिजन्यत्वे प्रकृतोपयोगमाह तस्मादिति यस्मात्सत्योपा
दानस्य सत्यता पृथिवीकार्यस्य पृथिवीत्ववत् सत्यं च परमाण्वादि ततस्तदुपादानप्रपंचोपि सत्य
एव तस्मादनात्मप्रतियोगिके भेदप्रामाणिके सति कथं सर्वाद्वैतमित्यर्थः एवमनात्मभेदं पूर्वपक्षेउ
पपाद्य तन्निराकरणं प्रतिजानीते मैवमिति ननु किमिति श्रुत्यभिप्रायापरिज्ञानं अत्यर्थाभि
ज्ञेन त्वया संसारधर्मेभ्यो निष्कृष्य तत्कर्तृत्वादिभ्यो निष्कृष्टेन त्वत्र संसारधर्मादीनां पृथगवस्थि
त्यभिधानादिति तत्राह ।। नहीति ।। ।। ।। ।। ।। ।। ।। ।। ।। शिव

ननु यथा प्रपंचस्य ब्रह्मकार्यत्ववादिभ्यः स्फूर्तयः संति तथाऽज्ञानकार्यत्ववादिभ्योपीति किं कृते न चाज्ञानेति तत्र हेतुः
मृत्युनेति साभासाज्ञानं मृत्युः तेनेदमिति तदिति बीजावस्थं जगदुच्यते एतिह्यप्रयोगे हेतुः इदमिति व्याकृतावस्थं
तदिदं पदयोः सामानाधिकरण्यात्परोक्षापरोक्षावस्थस्य जगतः एकत्वमवगम्यते तदिदं जगद्व्याकृतं साभासा
ज्ञानात्मकमेवासीदित्यर्थः ईदृगिति ईदृक् परमेश्वरो मिथ्याभिमानेन न तु परमार्थतः पुरुरूपो वहुरूप ईयते ग
म्यते इत्यर्थः ननु मृत्युः व्याकृतादिशब्दाः नाज्ञानमात्रवाचकास्तेषां महाजालोपस्थापकत्वादित्याशं
क्य साक्षात्तमआदिपदानि किंतु वाक्यमुदाहरंति सर्वं खल्वित्यादिना प्रकृतिरुपादानं तामित्यर्थः कार्य
कारणयोः साम्यादित्यभिप्रायः नासदासीदिति असद्भावः सद्भावः तदुभयमपि नासीत् तमः एवासीत्
तमः शब्दावरणप्रधानाज्ञानस्य वाचक इति प्रकाशयदितीयावत् पूर्वोक्तार्थं श्रुतेरनुग्राहिकां स्मृतिमप्याह
मायामात्रमिति उक्तमर्थं तत्तत्रीयेऽप्यतः अत्रेदं विषयवाक्यमामनंति स यत्र प्रस्वपिति इत्युपक्रम्य न तत्र

नन्वज्ञानकार्यत्वमपि वक्तुमशक्यं मृत्युनैवेदमावृतमासीत्तद्धेदं तर्ह्यव्याकृतमासीत् इंद्रो मायाभि
भिः पुरुरूप ईयते मायां तु प्रकृतिं विद्यात् नासदासीन्नो सदासीत्तम आसीदित्यादिश्रुतिभ्यः मा
यामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वादिति न्यायाच्च एवं तर्हि श्रुतीनां परस्परविरोधात्तामभय

रणानवधारणादित्यादि तत्र संशयः किं प्रबोधवत् स्वप्नेपि पारमार्थिकार्यक्रियासम। (अधिकारणमल
र्थीसृष्टिरुत मायामयी प्रातीतिकस्तत्र माभासेनाहृतिः किं तावत्प्राप्तं पारमार्थिकीति कुतः श्रुतिप्रामा
ण्यात् अथ रथान् रथयोगान्पथः सृजत इति स्फुटमेव रथादीनां सृष्टिः स्वप्ने श्रुतौ येन तत्र स्वप्नस्फुटत्वप्र
मात्वात् पारमार्थिकोऽयं सृष्टिरिति पूर्वपक्षे सिद्धांतयति मायामात्रमित्यादिना तु शब्दः पूर्वपक्षं व्या
वर्तयति नेतदस्ति स्वप्ने सृष्टिः पारमार्थिकीति कीदृक् तर्हि सृष्टिस्तत्राह मायामात्रमिति माये
वसृष्टिः पारमार्थिकगंधोऽप्यस्तीत्यर्थः कुतः कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् नहि कार्त्स्न्येन पारमा
र्थिकवस्तुधर्मेणाभिव्यक्तं स्वरूपं स्वप्न इति अतएव स्वप्नदृष्टिश्रुतिर्न पारमार्थिकीं सृष्टिमाह ननु तत्र
रथादिसृष्टिरणत्सृष्टिश्रुतिविषयाणां रथादीनां स्वप्ने निषेधात् न तत्र सृष्टिः पारमार्थिकी किं च

ननु जन्यत्वमेव जन्यस्य मायिकत्वसमर्थकं मिथ्यात्वप्रपंचस्य मायिकत्वेन मिथ्यात्वं स्वाप्निकरूपितं न तच्च प्रत्यक्षादिकं
नश्वर्यं तेन मायामात्रं सिद्धत्वात् कल्पितत्वप्रतियोगिकभेदस्याधिकल्पितत्वेन प्रत्यक्षाद्यविषयत्वाच्च ततः
प्रत्यक्षादिबलेनानात्मभेदोऽनृतत्वस्य कोऽशंकत इति सिद्धान्ती शंकते नन्विति ज्ञानकार्यत्वेर जन्यत्वस्या
न्निष्पत्याद्वैतदेव प्रपंचस्यासिद्धं ब्रह्मकार्यत्वश्रवणात् ब्रह्मणश्च सत्यत्वेन तत्कार्यप्रपंचस्यापि सत्यत्वाविघा
तात् तथा च सत्यप्रतियोगिकभेदस्यापि सत्यत्वात्प्रत्यक्षादिविषयत्वं युज्यते इति प्रपंचभेदस्यात्मनि प्रा
प्त एवेत्यभिप्रायेण पूर्वपक्षी सिद्धान्तिमतं दूषयति ननु ब्रह्मेत्यादिना ननु श्रुतिः प्रपंचस्य ब्रह्मकार्यत्वं प्र
तिपादयन्ती अपि न तत्त्वा न तस्य कार्यं कारणं च विद्यते न ब्रह्मपूर्वमनपरमित्यादि विरोधादिति
तत्राह चक्षुः इति गतिसामान्यन्यायेनाभ्यासस्य तात्पर्यग्राहकत्वाच्च तस्य प्रकृते सद्भावात् स्वार्थे
एवं श्रुतितात्पर्यं युज्यते उदाहृतविरोधिवाक्यस्य स्वस्य देहद्वयाभावप्रतिपादकत्वेनाप्युपपन्नेरिति
नन्वज्ञानकार्यत्वं प्रपंचस्य पूर्वमुक्तं तत्कथं प्रत्यक्षाद्यनुरोधेन भेदाग्राणं का इति चेन्न तस्यैवासिद्धेः ब्रह्म
कार्यत्वस्य चक्षुषः श्रवणात् सदेव सोम्येदमग्र आसीत् यतो वा इमानि भूतानि जायन्ते येन जातानि जी
वंति तस्माद्वा एतस्मादात्मनः आकाशः संभूत यथाग्नेः क्षुद्रा विस्फुलिंगाः एवमेतस्मादात्म
नः सर्वे लोकाः सर्वे देवाः सर्वे एत आत्मनो व्युच्चरन्ति इत्यादिश्रुतिभ्यः जन्माद्यस्य यत इति न्यायाच्च
भावः चक्षुःश्रवणमुदाहरति सदेवेति इदं परिदृश्यमानं जगदग्रे सृष्टेः प्राक् स्थूलरूपपरित्यागेन स
देवासीत् हे सौम्य परिदर्शनेत्यर्थः एवमिति यथैकस्मादग्नेः क्षुद्रा अवयवा विस्फुलिंगा विविधं ना
नाव्युच्चरन्ति उत्पद्यन्ते एवमेतस्माद्विज्ञानमयस्य प्राक्प्रबोधाद्यत्स्वरूपं तस्मादात्मनः सर्वे देवाः प्राणा
अधिष्ठातारो अग्न्यादयः लोकाः कर्मफलानि आत्मनः उपाधिसंपर्कजनितप्रबुध्यमानविशेषात्मा
न इत्यर्थः ब्रह्मणो जगत्कारणत्वेन केवलं श्रुतिसिद्धं किं तु युक्तितोऽपीत्याह जन्मादीति अस्य जगतः
प्रत्यक्षाद्युपस्थापितस्य जन्मस्थितिभंगं यतः सर्वज्ञात्सर्वशक्तेर्भवति तद्ब्रह्मेति सूत्रार्थः अत्राय
मधिकरणरचना यतो वा इमानीत्यादिवाक्यं किं न ब्रह्मलक्षणमुताहो लक्षयतीत्येकस्योभयहे
तुत्वसंभवासंभवाभ्यां संदेहः श्रुतेरनुमानानुगुण्यादेकस्योभयहेतुत्वादृष्टान्ताभावेनाशक्यानुमानत्वात् एके

तद्रूपयति नवेति पदार्थमात्रेऽनुगतत्वेनावश्यकत्वादिति हेतुमाह स्वरूपभेदस्येति ननु भेदव्यवहारोपपादकत्वेन
भेदादीनां तुल्यत्वं तत्कथं स्वरूपभेदस्यावश्यकत्वमिति तत्राह इतरयोश्चेति अन्योन्याभाववैधर्म्ययोरङ्गीकारेऽपि
न प्रयोजकत्वेनेति तत्तीयाद्यपत्यभावे तथा च तदुपेत्याङ्गीकारो व्यर्थः तत्र हेतुः व्यभिचारादिति सर्वत्राननुगतत्वादि
त्यर्थः ननु व्यभिचारेऽपि व्यवहारप्रयोजकं किं न स्यादिति तत्राह एकाकारेति यथा घटोऽयं घटोऽयमिति व्यवहारोऽनु
गतं घटत्वसामान्यमेव प्रयोजकं न व्यक्तिरननुगतत्वादन्यथा जातेरसिद्धिप्रसंगात् तथा चानुगतव्यवहारे प्रयो
जकमनुगतमेवेति नियतं एवं स्वरूपभेदस्य भेदव्यवहारविषयस्यानुगतस्य सम्भवे नाननुगतमन्योन्यधर्म्या
दितद्व्यवहारप्रयोजकं न युज्यते इत्यर्थः ननु स्वरूपभेदस्यानभेदे व्यवहारहेतुता स्वरूपस्यैव भेदात्मनित

तत्र स्वरूपभेदस्यावश्यकत्वात् इतरयोश्च व्यभिचारात् भेदव्यवहाराप्रयोजकत्वेनाङ्गीकारेऽपि
त् एकाकारव्यवहारस्यैकरूपविषयसाध्यत्वनियमात् न च स्वरूपभेदपक्षे स्वस्मादपि स्वस्य भेदः
स्यादिति वाच्यं स्वस्य प्रतियोगिकोटिनिवेशेनास्य धर्मिणो विरहात् धर्मिकोटिनिवेशे वा प्रतियो
योगिनोऽभावात् न च भेदस्वरूपयोः परस्परं तन्मात्रेणान्यतरपरिशेषापत्तिः भेदस्य स्वरूपानतिरेका
त् न च स्वरूपभेदः किं भिन्नो भेदव्यवहारप्रयोजकोऽभिन्नो वेति विकल्पावकाशः उपस्थितवस्तुमात्रस्य ध
र्मिप्रतियोगित्वाभावेन तादात्म्ये भेदव्यवहारयोजीयमानत्वात्॥ ॥ॐ नमः शिवाय नमः परम॥

द्व्यवहारदर्शनात् अन्यथा स्वस्मादपि स्वस्य भेदः स्यादिति नेत्याह न चेति स्वरूपमितरसापेक्षं भेदव्यवहा
रहेतुरिति प्रागेव निवेदितं न तु स्वस्मादपि स्वस्य भेदापत्तिरिति तत्राह स्वस्येति भेदस्य धर्मिप्रतियोगिघटितत्व
नियमादित्यर्थः ननु स्वरूपभेदयोरभेदे किं स्वरूपं भेदे प्रविशति स्वरूपे वा भेद इति नाद्यः भेद इत्येव व्यवहारः स्या
न्न स्वरूपमिति न द्वितीयः भेदाकारप्रतीतेरभावप्रसक्तेस्तत्राह न चेति सत्यमितरपरिशेष इति तर्हि किं
परिशिष्यते स्वरूपमेवेत्याह भेदस्येति कथं तर्हि भेदव्यवहारः इति चेन्न धर्म्यादिसापेक्षस्य स्वरूप
स्यैव तदाकारव्यवहारहेतुत्वादित्यसकृदावेदितत्वात् इममेवार्थं प्रगटयितुं परकीयचोद्यमुत्थाप्य

त्तान्त्वेः

स्वरूपाद्भिन्नमस्त्येव नच तस्या स्वरूपत्वापत्तिः घटभिन्नस्य घटान्तरस्या घटत्वादर्शनादित्यर्थो तस्यासेन हेतुमाह घ
टादिति ननु घटाद्वृत्तस्य भेदेप्य घटत्वादर्शने किं भेदान्तरं प्रयोजकं किं वा घटस्वरूपभेदस्य प्रतियोगितावच्छेद
कभेद इति स्यायमन्यथा दूषयति नचेत्यादिना उक्तदोषेणेति धर्मिप्रतियोगिभेदानां ग्रहदृत्तस्त्रोक्तदोषेणात्य
र्थः द्वितीयमनूद्य दूषयति नचेति अनात्मस्वरूपाणां वैधर्म्यव्याप्तत्वेन तत्स्वरूपभेदत्तदेवप्रतियोगिता
वच्छेदकमिति तेद्व दात्मनोननिः स्वरूपत्वापत्तिरिति हेतुमाह अनात्मेति तथा द्वितीयपदे इत्यापत्ति च

भेदस्य रिति भावः ननु किं स्वरूपमेव भेदः उक्तेसोपि नाद्यः इतस्यापि भेदत्वे दोषाभावात् तथाहि भिन्नधर्मिणि
भेदो वर्त्तते इत्येव स्वीक्रियते नचान्योन्याश्रयादिदोषः स्वरूपभेदभिन्नधर्मिणि धर्मभेदस्थितेः स्वरूपभेद

घटाद्वृत्तस्य भेदेप्य घटत्वादर्शनात् नच घटादेकस्माद्वृत्तान्तरे वैधर्म्यमस्त्येवेति वाच्यं स्थितस्यापित
स्योक्तदोषेणभेदत्वानंगीकारात् नचवैधर्म्यसत्त्वेव स्वरूपभेद इति वाच्यं अनात्मस्वरूपाणामपि वै
धर्म्यव्याप्तत्वात् यत्तु केश्चिदुक्तं यथायथं तत्तत्पमेव भेदः यथा घटादेः स्वरूपमन्योन्याभावो वैधर्म्यं च
सामान्यादौ च द्वयमेव वैधर्म्याभावात् अभावे स्वरूपमेव इतरासंभवादिति॥ ॥ ॥ ॥

स्य चेतरानपेक्षत्वात् न केवलं स्वरूपमेव भेदः किंतु सर्वेष्वन्योन्याभावादयो यथायोग्यं भेदा इति कस्यचित्क
ल्पनामुत्थापयति यत्त्वित्यादिना घटादौ भेदत्रयं विविच्य दर्शयति स्वरूपमिति वैधर्म्यमसाधारणोध
र्मो घटत्वादि सामान्यादावित्ति द्रव्यत्वादित्रयं तावन्न सामान्यसमवायवृत्ति द्रव्यादिमात्रवृत्तित्वात् न
सामान्यं सामान्ये समवाये वा वर्त्तते तयोर्निःसामान्यत्वात् समवायस्य सामान्यवृत्तित्वेपि द्वित्वादवै
धर्म्यत्वात् तस्मात्स्वरूपभेदोन्योन्याभावाश्च द्वावेव भेदौ सामान्यादावित्यर्थः अभावो न भावाश्र
य इति न तत्र वैधर्म्यं नापि तत्रान्योन्याभावः अभावे भावानंगीकारात् तस्मात्तत्स्वरूपमेव भेद इ
त्यर्थः॥

नचवाच्यमितिप्रतिज्ञायां हेतुमाह अतिरिक्तेति ननु स्वरूपमपि भेदो युक्तिबाधितः भिन्नं नाम भेदाधिकरणं
नचाभेदे आधाराधेयभाव इष्यते स्वरूपं भिन्नमिति प्रतीतिश्च सर्वजनसिद्धा अतः कथं स्वरूपं भेद इति तत्राह नचेति
ननु स्वरूपभेदशब्दयोः प्रवृत्तिनिमित्तं भिन्नमस्ति न वा न चेत् स्वरूपं भेद इति सहप्रयोगो न स्यात् पर्यायाणां तद्दर्श
नादिति यदुक्तं दूषयति नचेत्यादिना स्वरूपपदं निरपेक्षत्वं निमित्तमादाय प्रवर्त्तते स्वरूपभेदशब्दस्तु प्रति
योग्यादिसापेक्षत्वमिति न पर्यायतेति हेतुमाह सव्यवहार इति स्वभेदशब्दः स्वरूपशब्दश्चातत्त्वप्रयुक्तो व्य
वहारः स व्यवहारस्तस्मिन्नित्यर्थः ननु स्वरूपभेदशब्दयोः प्रवृत्तिनिमित्तभेदो न युक्तः स्वरूपभेदयोरैक्ये
तन्मात्रवाचकपदयोः प्रवृत्तिनिमित्तभेदस्यायुक्तत्वादित्यत आह नचेति तत्र हेतुः एकस्मिन्निति ए
कस्मिन्नपि देवदत्ते पितृपुत्रशब्दप्रयुक्तव्यवहारप्रवर्त्तमानानां पित्रादिशब्दानां पुत्राद्यपेक्षत्वस्य प्रवृत्तिनिमि

अतिरिक्तभेदागोचरत्वेपि स्वरूपभेदगोचरस्य दुरपह्नवत्वात् नच स्वरूपं भिन्नमिति प्रतीत्यनुपपत्तिः रा
होः शिरः आत्मनश्चैतन्यमितिवदुपपत्तेः नच भेदस्वरूपशब्दयोः पर्यायत्वापत्तिः स्वव्यवहारे प्र
पे॰ तत्त्वनिरपेक्षत्वाभ्यां विशेषात् नचाभेदे तदनुपपत्तिः एकस्मिन्नपि देवदत्तेपि तत्त्वादिव्यवहार
र्थं पुत्राद्यपेक्षादर्शनात् नच प्राग्प्राप्तविवेकेन सापेक्षत्वमेव भेदोस्त्विति वाच्यं तस्यापि स्वरूपानतिरे
कात् नच स्वरूपाद्यस्य भेदत्वस्यापत्तिः स्वरूपत्वापत्तिः अन्यथा स्वरूपमेवार्थोऽस्मिन्निति वाच्यम्॥ श्रीरामजी॥

तत्सापेक्षतायाः दर्शनादित्यर्थः ननु स्वरूपस्य निरपेक्षत्वेपि भेदशब्दस्य तत्र प्रवृत्ताविति सापेक्षत्वमावश्यकं तथा
च प्राग्प्राप्तविवेकात्तापेक्षत्वपदार्थो भेदशब्दवाच्योस्तु न स्वरूपं तस्य निरपेक्षत्वादित्यत्राह नचेति
तस्यापीति सापेक्षत्वस्यापीत्यर्थः यथा द्रव्यं व्यस्तमतः स्वरूपेणानिरपेक्षमपि द्रव्यत्वविशिष्टत्यादिपदेन व्यवह्रियमाणं
भिन्नरूपापेक्षं नहे भवति ननु द्रव्यादिपदवाच्यं द्रव्यादेरतिरिक्तं तेन तथाप्रकृतेपीत्यर्थः ननु स्वरूपाद्भिन्नम
स्तिनवा नाद्यः तस्य तिः स्वरूपत्वप्रसक्तेः सहत्वापत्तिः अन्त्य स्वरूपाद्भिन्नं नास्ति तर्हि स्वरूपमेकरसमेवेति
ननु यद्यपि स्वरूपप्रतियोगिकोनभेदस्तथापि स्वरूपमेव न रभिन्नं किं न स्यात् न पाञ्चकुतः स्वरूपमे
वाखंडमितिचेन्न स्वरूपभेदस्य प्रतियोगिनो निः स्वरूपत्वे भेदस्यापि तथात्वापत्तेः स्वरूपत्वस्य स्यादेव
नाद्यः = नद्वितीयः =

लिं.वि॰

ॐ

वे. मु. टी.
७६

धर्मिणि वर्तते तन्नाभिन्ने तत्रावर्तमाने तत्र भेदग्राहकस्य भ्रमत्वप्रसंगात् स भिन्नं नाम भेदाधिकर
णं तत्र चेद्भेदं गृह्णीयात् तज्ज्ञानं कथं न भ्रमः स्यात् यद्याद्यः तर्हि किं स्वेनैव भेदेन भिन्ने धर्मिणि स्व
यं भेदो वर्तते उत भेदान्तरेणाभिन्ने नाद्यः आत्माश्रयात् स्वभिन्ने स्वस्य वृत्तेः द्वितीयश्चेत् सोऽपि
भिन्ने धर्मिण्येव उत अभिन्ने इति विकल्पग्रस्त एव भेदस्य कल्पितत्वं द्वितीयश्चेद् भिन्ने चेदात्माश्रयः यदि
दनिरूपणार्थं स्वस्य मागतः तेन भिन्ने चेत् तदान्योन्याश्रयः अथैतद्दोषपरिहाराय द्वितीयभेद
स्य भिन्ने धर्मिणि स्थित्यर्थं तृतीयभेदस्वीकारश्चेत् तदा चक्रकं द्वयव्यवधानेन स्वस्यापेक्षणात्
अथ तत्रापि पूर्वदोषनिवृत्तये चतुर्थभेदः स्वीक्रियते चेत् तर्हि अनवस्था अन्यगत्यन्तराभावादनवस्था
श्रीयत इति चेत् तर्हि ते भेदाः किं क्रमेण धर्मिणि वर्तन्ते उत युगपत् क्रमेण चेत् तर्हि धर्मिणो
नादित्वप्रसंगः उत्तरोत्तरभेदेन पूर्वपूर्वभेदकार्यस्य धर्मिणि भिन्नव्यवहारस्यान्यथासिद्धेः पूर्व
पूर्वभेदस्य वैयर्थ्येन प्राक्तनलोपप्रसंगश्च युगपच्चेत् तर्हि भिन्ने भेदस्थितिरिति पक्षवन्निःश्रेयेन
दोषपरिहारायैकविशिष्टे परस्थितिराश्रीयत इति चेत् तर्हि स्वविनिगमकः एतद्भेदविशिष्ट एत
द्भेदस्थितिरित्यत्र नियामकाभावात् किंचैवमिति भेदाः स्वीक्रियेरन् यदि भेदपरंपरावगाहिनी
काचित्संविदुदयमासादयेत् न चैतादृशीति प्रमाणाभावात् अनन्तभेदस्वीकारः अथैतत्स
र्वदोषपरिहाराय धर्मिप्रतियोगिनोर्भेदं च युगपदेव प्रत्यक्षमवलंबत इत्युच्यते तर्हि न तावत्त
रस्वरूपं स्वघटकतया भेदग्रहः तत्प्रतीतेर्विशिष्टावगाहित्वनियमात् ननु विशेषणविशेष्यभा
वेन तर्हि प्रत्यक्षं भेदं गृह्णातु तर्हि भेदावगाहिरूपैव प्रतीतिः विशेषणप्रतीतिरन्या काचि
त् नाद्यः कार्यकारणयोरेकत्वायोगात् न द्वितीयः विशेषणत्वेन ज्ञानस्य भेदज्ञानाधीनत्वा
त् स्वरूपेणाभासमानस्य भेदज्ञानाजनकत्वस्यावेदितत्वादित्यादि दूषणजातं संग्रहायाभिप्रयन्निति।

शिव.
७६

उपाराणं   पूर्वपक्षी =

प्रत्यक्षादेर्भेदगोचरत्वे युक्तिबाधमाशंक्य परो चष्टे नचेत्यादिना अयमर्थः किं प्रत्यक्षं भेदमात्रं गृह्णा
ति उत धर्मिप्रतियोगिभेदान् गृह्णाति नाद्यः धर्मिप्रतियोगिप्रतीतिमन्तरेण भेदस्य प्रत्येतुमशक्यत्वा
(दूती) त् द्वितीयेपि क्रमेण ग्रहणं किं वा युगपत् यदापि क्रमस्तदापि भेदं गृहीत्वा प्रत्यक्षादिधर्मप्रतियो
गिनौ गृह्णाति वैपरीत्येन वा यदापि युगपत्तदापि दंडी देवदत्त इतिवद्विशेषणविशेष्यतया गृह्णा   पुरुष =
ति उतं त्युल्लित्रयवत् परस्परासंसृष्टतयेति विकल्पसंग्रहाद्यादिपदं धर्मिप्रतियोगिभेदान्
प्रत्यक्षं गृह्णातीति द्वितीयपक्षो नोपपद्यते तथाहि तत्र क्रमपक्षे भेदग्रहःपुरः सरो धर्मिप्रति
योगिग्रह इति पक्षो न युक्तः भेदज्ञानं प्रति धर्म्यादिज्ञानस्य कारणत्वेनोत्क्रमग्रहणायोगात्

म घोति स्वाति संकेते =

नचानात्मस्वरूपगोचरत्वेपि प्रत्यक्षादेर्नभेदगोचरत्वं धर्मिप्रतियोगिभेदानां ग्रहे क्रम
यौगपद्यादिविकल्पग्रासात् वा आत्माश्रयान्योन्याश्रयानवस्थाप्रसंगोपाधिगमत्वाद्यनेक
स्मै है
अथ द्वितीयः तदापीदं विचारणीयं किं स्वरूपेण धर्म्यादिग्रहणं (दोषग्रासादिति वाच्यम्॥)
भेदनिरूपकं उत घटत्वादिना आद्ये धर्मित्वेन प्रतियोगित्वेन वा नाद्यः क्षीरनीरयोस्तादात्म्याप
न्नयोः स्वरूपेणाभासमानयोरपि तद्दीयभेदाग्रहात् नापि द्वितीयः घटत्वादिना प्रतियोगत्वादि
ग्रहस्य भेदापेक्षत्वेनान्योन्याश्रयात् अतएव न तृतीयः भेदज्ञानाधीनं प्रतियोग्यादिज्ञानं धर्मिभि
न्न [illegible] भेदनिरूपकस्य प्रतियोगित्वात् एवं धर्मिज्ञानस्यापि भेदज्ञानपूर्वकत्वमूहनीयं तज्ज्ञाना
धीनं च भेदज्ञानं प्रसिद्धमिति कथं नान्योन्याश्रयः किंच भेदः किं भिन्नो॥ ॥ ॥

ॐ

वे॰मु॰टी॰
७५

७७

असाधारणं परे तु दोषं हेतुत्वेनाह दृष्टांतेति अप्रमाणं नाम प्रमाणत्वात्यंताभावाधिकरणं प्रमाणा
न्तरं तु भयथापि घटादिकं सपक्ष एव निश्चितसाध्यवत्वात् अभेदग्राहकं च प्रमाणं तत्वमस्यादिवाक्यं
विपक्षः ताभ्यां व्यावृत्तेरित्यर्थः दृष्टांताभासानां हेत्वाभासेष्वेवांतर्भावादिति भावः ननु कथं दृष्टांता
भावः नाहमीश्वर इति जीवपरमात्मभेदग्राहकस्य प्रत्यक्षस्यैव विद्यमानत्वादित्याशंक्याह न हीति
किमिदं प्रत्यक्षं भेदमात्रगोचरयति आत्मविशिष्टं वा नाद्यः आत्मभेदग्राहकत्वासिद्धेः दृष्टांताभावस्य
तदवस्थत्वात् अथ द्वितीयः तत्रात्मपदेन स्वप्रकाशं संविद्रूपमात्मकं स्वरूपं गृह्यते उत कर्तृत्वादिवि

दृष्टांताः सिद्धेः न ह्यात्मपरमात्मनोर्भेदग्राहकमानमस्ति तयोः स्वयंप्रकाशत्वेन मानावि
षयत्वात् विशिष्टविषयस्य मानस्य विशेषणाभेदगोचरत्वेनान्यथासिद्धस्यात्मपरमात्मभेद
साधकत्वात् विशेष्याभेदग्राहकेन तत्वमस्यादिप्रमाणेन बाधितत्वात् न चानात्मभेद
(ग्राहकस्य प्रत्यक्षादेर्बाधकमस्ति

शिष्टं वा आद्यं निराचष्टे तयोरिति द्वितीयं दूषयति विशि
ष्टेति सविशेषणे हीति न्यायादित्यर्थः विशेष्याबाधमुपपादयति विशेष्येति तथा च दृष्टांतासि
द्धेरेवेति भावः किं चाह न विश्वमित्यनात्मप्रतियोगिकभेदग्राहकं प्रत्यक्षं तच्च नाप्रमाणं विप
रीतार्थगोचरप्रमाणाभावात् ततो बाधितमप्रमाणत्वानुमानमिति हेत्वंतरमाह नचेति
आत्मानात्मनोर्मिथो भिन्नौ विरुद्धधर्माक्रांतत्वात् द्रवकठिनवदित्याद्यनुमानसंग्रहायादिपदम्॥

श्रिः

इत्यमखंडैकरस्यात्मैक्ये वेदान्तानां समन्वयं निरूप्य तत्र प्रमाणविरोधं परिहर्तुं शङ्कामुत्थापयति नन्विति शंका
या: स्पष्टत्वेयोत्स्यानार्थं तत्त्वमस्यादिवाक्ये हेयमुपादेयं च तत्त्वं वदाह कर्तृत्वेत्यादिना कर्तृत्वादिविशिष्टस
बुभ्याचवस्यावैचुतत्वं त्वंपदवाच्यं जगत्कर्तृत्वादिविशिष्टं विपदार्थमुपदानेन च्छेदवाच्यं तत्राचार्येणादि
कारिणोपदिष्टं महावाक्यं श्रुत्वा सत्त्वं सार्थं संसारिणो: प्रमाणविरोधात्स्वरूपानुपपत्त्यात्वंपदार्थे वि
रुद्धं कर्तृत्वादि तत्पदार्थे च विरुद्धं जगत्कर्तृत्वादिरूपं तत्त्वज्ञानेभ्यो विरोधिरूपेभ्योनि: कथं सत्वं चित्सु
खात्मकं शुद्धमखंडैकरसं जीवब्रह्मणोरैक्यं बोधयतीति प्रतिपादितमित्यर्थ: बोध्यते इत्यत्र महावाक्ये
नेतिशेष: भवत्वेवं प्रतिपादनं तथापि कथं तत्र विरोधाशंकेत्यत्राह तथाचेति ननु कथं भेदोनति

ननु कर्तृत्वभोक्तृत्वसुखित्वदुःखित्वाद्यनेकसंसारधर्मेभ्यो निःकृष्टस्य प्रत्यगात्मनो वस्तुत्व
यानुगतस्य शुद्धस्य चिदंशस्य परमात्मना जगत्कर्तृत्वादिभ्यो निकृष्टेनाकाशादिष्वनुस्यूतेन
शुद्धेन परिपूर्णसच्चिदानंदस्वभावेनाभेदो लक्षणया बोध्यत इति प्रतिपादितं तथाच सर्वेनति
राकृत: स्यात् आत्मनात्मभेदस्य नदवस्थत्वात् नचात्मपरमात्मनोर्भेदग्राहकप्रमाणवदना
त्मभेदग्राहकस्यापि प्रत्यक्षादेरप्रामाण्यमेवेति भाव:

भेदो टि

राकृत: जीवब्रह्मभेदस्योक्तयुक्त्या निराकृतत्वादित्यत्राह अनात्मेति भेदपदमनात्मभेदपरमित्यर्थ: यद्य
पि ब्रह्मस्यान्तर्यानुगतस्याकाशादिष्वनुस्यूतेनेति विशेषणमहिम्ना विजातीयभेदोपि निराकृत एव तथापि
चारिणां मृत्तद्घटादेरादिवत्कल्पितत्वान्नास्तीति केचित्प्रसत्यमिति श्रुते: कार्यस्याकाशादेर्मिथ्यात्वात्
तन्मूलतिर्यागिकभेदस्यापि मिथ्यात्वात् तथापि विशेषणतात्पर्यमविद्वुष: शंकामुत्पत्त एवेत्यभि
प्राय: ननु विमतमनात्मभेदग्राहकमप्रमाणं भेदग्राहकत्वादात्मभेदग्राहकवदित्यत्राह नचेति।।

पदयोस्तत्वमसीति वाक्यनिष्ठयोः एकार्थत्वांगीकारेण परिहरति एकार्थत्वेपीति यद्यपि पदयोरेकार्थत्व
मेव तथापि पदद्वयं स्वीकर्त्तव्यमिति शेषः नचैकपदज्ञानमेवाभेदविषयं भेदकृदज्ञाननिवृत्तये तच्छेदकेनैव
पदेन तन्निवृत्तेः किं पदांतरेणेत्यत आह वाक्येति प्रमाणज्ञानं हि भेदभ्रमं निवर्त्तयति न विषयतोभिव्याप्ता
नं तच्चज्ञानं नैकस्मात्पदात्पदमात्रस्य प्रमाहेतुत्वाभावात् ततो भेदभ्रमनिरासिज्ञानजनकतया वाक्यत्वसंपत्तये
पदांतरमपेक्षणीयमेवेत्यर्थः नचैकार्थत्वे पर्यायशब्दवद्वाक्यत्वानुपपत्तिः प्रवृत्तिनिमित्तभेदात् भोक्तृ
त्वादिकं हित्वं पदे प्रवृत्तिनिमित्तं सर्वज्ञत्वादि च तत्पदार्थे इति न पर्यायत्वापत्त्या वाक्यत्वहानिरिति ननु पद
द्वयप्रयोगेण वाच्योपस्थितये तस्य निःप्रयोजनत्वात् किंतु लक्ष्योपस्थितये सा चैकपदात् सिद्धा

एकार्थत्वेपि वाक्यप्रमाणजन्यस्यैव ज्ञानस्य भेदभ्रमनिवर्त्तकत्वात् नचैकपदवैयर्थ्यं तेन विना विरोधाभावे
न लक्षणायां वेदवाक्यार्थस्य प्रतिपादयितुमशक्यत्वात् पदमात्रस्याप्रमाणत्वाच्च नच प्रधानवाक्ये ल
क्षणानुपपत्तिः इतरानुपसर्जनार्थप्रतिपादकत्वमेव हि प्रधानत्वं नोमत्तत्वं लक्षणया मुख्यया वेत्यस्य
देतत् नच न्यायविरोधः यत्र प्रतिपाद्यस्यार्थस्य शब्दशक्तिगोचरत्वं तत्र न्यायवार्त्तामात्।। ।। ।।

किं पदांतरेण पदस्यानुभावकत्वात् विषयाबाधाच्च प्रामाण्योपपत्तिरित्यभिसंधिं निरस्यति नचेति
नहि विना घोषनिवासवाचिपदप्रयोगं गंगापदं तीरं लक्षयति मुख्यार्थेनुपपत्त्यभावात् तथाच
तत्पदस्य तंपदसन्निधाव स्याने विशिष्टमेव तदुपस्थितेस्ततनावैकरसमिति व्यर्थावेदन्तदुक्तिः स्यान्
तस्माल्लक्षणायाएव तदर्थलाभाय पदांतरप्रयोग इत्ति नैवपर्थ्यमिति हेतुमाह तेनेति यदुक्तं पदमप्य
नुभावकमिति तन्निरस्यति पदमात्रस्येति पदमप्यधिकाभावात्स्मारकान्न विशिष्यत इति न्यायादि
त्यर्थः यदुक्तं प्रधानवाक्ये न लक्षणामर्हतीति तन्निरस्यन् दृषयति नचेति तथाच सत्यामपि लक्षणा
यां नोक्तप्रधानत्वहानिरिति भावः न्यायविरोधपरिहारे हेतुमाह यत्रेति तस्माल्लक्षणायात्तत्वमस्या

दिमहावाक्यं प्रत्यग्ब्रह्मणोरैक्यमखंडैकरसं बोधयतीति न
यतो वाचो निवर्त्तंत इति वाक्येन विरोध इति भावः।।

प्रमाणव्यवहाराभावः सात्त्वभावे स्यात् कथं अनधिगतार्थगंतृ हि प्रमाणं तत्कार्यं स्य प्रमाणविषयत्वेन संमतस्यान
धिगतत्वं कुतः सिद्धं किं प्रमाणाद् उत भ्रमाद् उत स्वतः अन्यतो वा आद्यं निरस्यति अज्ञातस्येति अप्रमाविषयस्येति
हेतुगर्भविशेषणं प्रमाविषयत्वायोगस्येत्यर्थः एतदेव स्फुटयति प्रमाणेनेति प्रमाणस्य स्वविषयाज्ञाननिवर्त्तकत्वा
दित्यर्थः तथात्वेऽपि तद्वादिनं प्रतिबाधकमाह तथात्वे चेति वैयर्थ्यमुपपादयति प्रमाणेनेति अतिप्रायो ह्यज्ञानेति
वृत्तिः सा चेत् अप्रमाणात् किं तेनेत्यर्थः विषयावभास एव प्रमाणफलमिति चेन्न सत्यं ज्ञानलक्षणाऽऽव
रणो विषयावभासायोगादिति अज्ञातत्वे न प्रमाणाविषयत्वमित्यर्थः भ्रमादज्ञातत्वसिद्धिं परास्यति भ्रमसिद्धस्येति

अज्ञातस्याप्रमाविषयस्य साक्षिव्यतिरेकेणासिद्ध्यभावात् प्रमाणासिद्धत्वेऽज्ञानस्य निवृत्तिर्न स्यात् तथात्वे
वाप्रमाणवैयर्थ्यात् प्रमाणकृताज्ञातिप्रायाभावात् भ्रमसिद्धस्य प्रमाणविषयत्वे विरोधात् तथा च प्रमा
णप्रवृत्तेः पूर्वमेवाज्ञातत्वेन साक्षिणा साधितमेव प्रमेयं प्रमाणं विषयीकरोतीति युक्तं अनेनात्र विप्र
तिपत्तिः तथा च सुरेश्वरः प्रमाणमप्रमाणं वा प्रमाभासस्तथैव च कुर्वन्त्येव प्रमां यत्र तदसंभाव
(नाकुतः न च पदयोरेकार्थत्वानेकार्थत्वविकल्पः॥

अज्ञातत्वसिद्धेर्भ्रमत्वं विषयाज्ञानस्य बाधादेवाज्ञे
तथा च तादृशे प्रमाणं कथं प्रवर्त्ततां विषयासत्त्वादित्यर्थः नापि स्वतः जडत्वात् तत्त्वं चानात्मत्वात् अन्य
तश्चेत् स एव साक्षीति प्रसिद्धः साक्षीत्याह तथा चेति एतेन निष्प्रयोजनत्वेऽप्यापाततः साधितं ततः बोधितं
प्रमाणान्यथानुपपत्त्यासिद्धः साक्षीन विप्रतिपत्तिर्महतामित्युपसंहरति अत इति अत्रार्थे आप्तवाक्य
मुदाहरति तथा चेति अत्र प्रमाणस्य साक्षिसाधकत्वमुक्तं तथा मिथ्याज्ञानसंशयज्ञानं च न प्रमाण
त्वसिद्धमिति विरोधात् तदात्मकवृत्तेर्जडत्वात् तस्य प्रकाशतानभ्युपगमात् स्वस्यैव भानस्य विचार्यमाणत्वात्
तस्मात् साक्षिण एव तयोः सिद्धिरित्यर्थः कुर्वन्त्येव प्रमामत्रेति वार्त्तिकपाठः तदसंभावना साक्षिणोऽसं
भावेन॥

तथाहि

वे॰मु॰टी॰

८३

निषेधति उताहो न तद्वर इति ४ तथाहि ४

मुक्ता यतो वाचो निवर्तंत इत्यादिश्रुतिविरोधात् संप्रदायविरोधाच्च यथाहुः न त्वं पदार्थविषयो न यएव
योऽयं सत्यादिवस्तुनि न तत्र विशेषकल्पः सत्यादिप्रायः विशेषाः सर्वस्मात्स्वदृशमागेषु लावण्याकृ
तिरपीहतुल्येति मैवं न तावत् श्रुतिविरोधः साक्षाभिधावृत्तिं निषेधंति शुद्धे ह्यविद्यातत्कार्योऽनुपरक्ते
पीति साक्षेत्वानिष्टापत्तिः शुक्तेव स्यार्थांशुद्धे व्रत्मणि पदप्रवृत्तेरनभ्युपगमात् उपाध्युपरक्तेपीति चेत्
न तत्रादोषात् कथं तर्हि शुद्धचिन्मात्रलक्ष्यत्वं तत्र प्रयोपस्थितिरिति चेत् उपाधेस्तटस्थतयाऽभिधेयको
टावप्रवेशान शुद्धस्याचित्स्वरूपत्वात्किं करस्य स्वतत्वमसीति पदहयलक्ष्यस्य सत्यादिपदेभ्य उपस्थितिसंभवा
त् यथा धेनुपदं गोत्वोपहितव्यक्तिशक्तमपि गोत्वं न तटस्थतया वाच्यकोटावप्रविष्टमिति धेनुशब्दात्
व्यक्तिविशेषएव तिष्ठते न गोत्वमिति न तदिति न श्रुतिविरोधः यच्च संप्रदायविरोध इति सत्यं तैरपि संप्र

न च साक्षिणि विप्रतिपत्तिः सर्वप्रमाणव्यवहारोच्छेदप्रसंगात्

दायविद्भिः श्रुतिविरोधपरिहारायैव वेदांतपदेषु लक्षणाश्रीकृता स विरोधोस्मदुक्तप्रकारेणापि चे
त्परिहर्तुं शक्यते किमिति लक्षणाश्रयणं मुख्ये संभवति लक्षणाया अन्याय्यत्वात् न चैवं तेषामज्ञता प
त्तिः उपायस्योपायांतराऽदूषकत्वात् तेषामपि श्रुतिविरोधपरिहारस्यैव प्रयोजनत्वात् स च य
थायथोपपद्यते तथा तथायुक्तिः कल्पयितव्येति तेषामभिप्रायादिति सर्वमनवद्यं यदाचार्या
नेमकं तदुपरक्तं चैतन्यं साक्षीति तदाऽज्ञानमुपाधिं तिरस्कृत्य शुद्धमेव चैतन्यं त्वंपदलक्ष्यं साक्षि
पदाद्युक्तस्यायेनोपतिष्ठत इति बोद्धव्यं इमं च सर्वमभिप्रायं प्रकटयितुमाचार्यैनान्नोपाधिइत्यादिवा
क्ये सामान्यस्य व्यक्त्यपेक्षत्वादुपाधिपदस्याने व्यक्तिपदे दातव्येपि यत्तस्तदुपेक्षोपाधिपदं प्रयुक्त
मिति तत्तो विषय उपाधेरन्यत्र वाचकोटावप्रवेशावदिहापि शुद्धमेव सत्यादिपदवाच्यकोटौ प्रविशति ना
ज्ञानादीति नास्मदीयमाचार्यमुपालंभमर्हतीति ननु कः साक्षी न तावत्परः तस्यासंगेन साक्षि

८१

जातेर्निःप्रयोजनत्वमुपपादयति अनुगतेति अनेकोपाधिषु संवद्धः तत्पाद्यकोपाधिष्वनुगतव्यवहारोपपत्तौ दृष्टान्तमाह प्रति
विंवेष्विति यथा दशसु जलपात्रेषु दश चन्द्रप्रतिविंवाः प्रतीयन्ते तत्राप्ययं चन्द्रोऽयं चन्द्र इत्यनुगतव्यवहारः स च न च
न्द्रत्वजातिकृतः तत्र व्यंजकाभावेन चन्द्रत्वजात्यनभ्युपगमात् उपाधीनां चाननुगतत्वात् सर्वोपाधिष्वनुगताया च
न्द्रव्यक्तेस्तयैव तत्रानुगतव्यवहारः क्रियते तद्वदत्रः कलशाद्युपाधिष्वभिव्यक्तायाश्चेतनव्यात्मकस्य व्यक्तेस्तयैव
तत्रानुगतव्यवहारः संपाद्यत इति व्यर्थो जातेर्जातिस्वीकार इति एतेन सत्तावादिजातिरपास्ता ननु स
त्यादिपदे लक्षणयोपस्थितावपि त्वंपदलक्ष्योपस्थितिः कुत इति न च सत्यादिपदादेव तदुपस्थितिः ब्रह्मपदसामा
नाधिकरण्यापादितेति तत्राह त्वमर्थस्विति त्वंशब्दस्य लक्ष्योऽर्थ इत्यर्थः आदिपदं प्रत्यगादिग्राह्यमाह उक्तविधयेति अ
ज्ञानान्यनेकानि साक्षित्वानि चित्प्राधान्येन साक्षिपदवाच्यानि साभासाज्ञानेषु व्यक्तिस्थानीयेषु संवद्धा चेतनस्य

अनुगतव्यवहारस्यानुगतव्यक्तेरेवोपपत्तेः प्रतिविंवेष्विवेत्यवत् त्वमर्थस्तूक्तविधया साक्ष्यादिपदेन वक्तुं शक्य
एव॥

व्यक्तिस्तदवच्छेदकत्वेन घटत्वादिवद्वाच्या तथा च साक्षिपदाच्चैतन्यस्यास्य मुपस्थितिसंभवात् त्वंपदेऽपि न मूकत्तन्य
र्थः नन्वेवं सत्यज्ञानसाक्ष्यादिपदैरनेकव्यक्तिस्थानीयसविशेषोपाधिसामान्यस्थानीयब्रह्मचैतन्यस्योपस्थि
तौ कथं तत्त्वंपदलक्ष्ययोरखण्डत्वसिद्धिरिति चेन्न तदेतन्नैयायिकनीत्या पशुना यजेतेत्यत्र पशुपदात्त्विन्नयोप
स्थितेरविशेषेऽपि योऽपनयोपधा गसाधनत्वं यथा पशुव्यक्तेरेव न जातेः तथा प्रकृतेऽपीति न किंचिदनुपपन्नं
मीमांसकस्यैतन्नोद्यमेव न संभवति जातिमात्रस्यैव पदार्थत्वात् तथा च व्यक्तिस्थानीयसाभासोपा
धिसंवंधिब्रह्मचैतन्यस्यैव सामान्यस्थानीयस्य सत्यादिसाक्ष्यादिपदैरुपस्थितेस्तत्त्वमस्यादिवाक्यं
तदाश्रयकमेवाखण्डार्थे पर्यवसितमिति ननु तथापि सत्यादिसाक्ष्यादिपदानां तत्त्वमादिपदलक्ष्येषु
हेमुख्ययाभिधयावृत्त्यावृत्तिर्न॥

ननुकल्पितसंबंधमूलकलक्षणयापि कल्पितलाक्षणिकत्वेन स्यात्तथा च तन्मूलवाक्यार्थसाक्षात्कारोपि क
ल्पितः स्यादिति शंकते कल्पितेनेति तद्देतत्कानिष्टमित्युपहासव्याजेनाह नोद्वेरिति ननुपदाभ्यां लक्षोप
स्थितिरस्ति न वा नास्ति चेन्मूकत्वेति यदुक्तं तद्दूषयति नचेति सत्यादिपदाद्ब्रह्मलक्ष्यस्योपस्थिति
रिति हेतुमाह पदार्थेति ननु सत्यादिपदं ब्रह्मण्यभिधया प्रवर्त्तते लक्षणया वेति विकल्प्योभयथापि दू
षितं तत्र लक्षणया सत्यादिपदानां ब्रह्मणि वृत्त्यनंगीकारेण तत्पक्षे दोषस्य परिहरणीयत्वमाह तत्रचे
ति ननु सत्यादिपदमभिधया ब्रह्मणि प्रवर्त्तते इति पक्षो न युज्यते तत्त्वमस्यादिपदे घटितत्वया प्रसक्तेरि
ति चेन्न भोक्तृत्वकर्तृत्वापरोक्षत्वादिविशिष्टे त्वंपदस्य शक्तिग्रहात् त्वंपदश्रवणात्तादृशस्यैवोपस्थितेः ए

कल्पितसंबंधेन लक्षणा पारमार्थिकी न स्यादिति चेन्नोच्छेर्वाच्यम् अद्वैतविरोधेनैव द्वैतासत्य
त्वेप्यद्वैतवादिनः सिद्धान्ताविरोधस्यातिस्पष्टत्वात् नच लक्ष्यपदार्थे मूकताप्रसंगः पदार्थप्रति
पादकविज्ञानमानंदं ब्रह्मेत्यादिनैव तत्पदार्थप्रतिपादनात् तत्र च लक्षणाभावान्नानवस्थाः
नच ज्ञानत्वसामान्यादिवैशिष्ट्यनिर्धर्मकलक्ष्यपदार्थोसिद्धिः नानोपाधिसंबद्धव्यक्तावतिरिक्तं

वं तत्पदेपि बोद्धव्यं नन्वेवं सत्यत्वज्ञानत्वादिमति सत्यादिशब्दप्रवृत्तेर्न ततो लक्ष्यं शुद्धब्रह्मात्मैक्यं प्रतीये
तेति नेत्याह नचेति तत्र हेतुः नानेति अयमर्थः ज्ञानशब्दस्य हि न तावज्ज्ञानव्यक्तौ शक्तिग्रहः आ
नंत्यव्यभिचारदोषात् ज्ञानत्वसामान्यवतीषु व्यक्तिषु चेत् तत्किं नियतपदार्थवादिमतमेतत्
जातिमात्रपदार्थवादिनो वा उभयथापि ब्रह्मणो वाच्यत्वासिद्धेः तथाहि सामान्यं हि नानाव्य
क्तिष्वनुगतं तास्वेवानुगतव्यवहारहेतुः स्वीक्रियते तच्च ज्ञानत्वसामान्यं ब्रह्मणोनभिन्नं नानाभिन्ने
षूपाधिषु ज्ञानत्वव्यक्तित्वेन स्वीकृतेषु संबद्धानुगतायां व्यक्तिः व्यज्यतेऽनयेति व्यक्तिः चैतन्यं तत्तदुपस्थ
तद्भिन्नस्य सामान्यस्यानभ्युपगमान्निष्प्रयोजनत्वात् ततश्चोभयमतेपि ज्ञानत्वस्थानीयं शुद्धं ब्रह्मै

इहत्विति तत्वमस्यादिवाक्ये वृत्त्यंतरेण लक्षणावृत्त्येत्यर्थः तदुपपत्तेः प्रत्यग्ब्रह्मणोरैक्यपरत्वोपप
त्तेः तत्वमस्यादिभिर्न प्रमाणांतरबाध इति शेषः प्रमाणांतराबाधफलमाह मुख्यार्थेति ततो लक्ष
णासिद्धेरिति भावः प्रमाणांतरविरोधेन मुख्यार्थानुपपत्त्यनुसरणे विपक्षे बाधकमाह अन्यथेति शु
द्धस्य सर्वासंगिनो ब्रह्मात्मैक्यस्य लक्षणत्वप्रयोजकरूपाभावान्न तत्र लक्षणेति पूर्वोक्तमनूद्य दू
षयति न चेति वाक्ये लक्षणामधिकारी कल्पयति तत्कल्पनं च तत्त्वतादात्म्यकारोत्तरं प्राग्वा नाद्यः

न च मानांतरस्य वेदेन बाधितत्वान्नानुपपत्तिः नहि बाध्यमित्येव बाध्यते किंतु स्वविषयसि
द्ध्यन्यथानुपपत्त्या इहतु वृत्त्यंतरेणापि तदुपपत्तेर्मुख्यार्थेऽनुपपत्तिरेव अन्यथा सर्वत्र लक्ष
णोच्छेदप्रसंगः लोकेपि निश्चितप्रामाण्यपरवल्लक्षणा तथा च तत्राह प्रवाक्यविरोधेन वि
रोधिमानांतरस्य बाधितत्वादनुपपत्त्यभावाल्लक्षणा न स्यात् न च लक्ष्यस्यार्थस्यासंगस्य
स्य वाच्यार्थेन संबंधानुपपत्तिः स्वतोऽसंगस्याप्यविद्यातः करणाद्युपाधिसंसर्गस्याविद्या
ध्यारोपितस्यादिबंधपरिकल्पितसवित्तरित्तमः संसर्गवदु
वैयर्थ्यात् अन्योन्याश्रयापत्तेश्च सा तादात्म्य
रोत्तरं कल्पना कल्पनोत्तरं च तादात्म्यादिति लक्षणाप्रयोजकत्वेन वाक्यार्थप्रतीतौ का
रणत्वात् द्वितीयश्चेत्तर्हि वाच्यसंसर्गानुसंधानमाह स्वतइति अयमर्थः अविद्योपाधिकं चैतन्यं तत्प
दवाच्यं अंतःकरणोपाधिकं चैतन्यं च त्वंपदवाच्यं ताभ्यां लक्ष्यस्य प्रत्यग्ब्रह्मैक्यस्य तत्तादात्म्यका
रात् प्रागवस्थायामविद्यायाविरोधाभावेन सत्त्वात्तत्कल्पितः संबंधोपि वर्तत इति तदुपाधिकैकत्वे
न लक्षणेति॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

वे·सु·टी· ७१ ९५

एकमेवदेशिनं सिद्धान्तिमुदयापदाहान्यलक्षणानिरासपक्षमुपसंहरति अन्यदिति पूर्वोक्तलक्षणानुपपत्तिहे
तुरस्मिन्नितार्थेन तः शाब्दः अखंडार्थपरत्वं हि पदयोर्लक्षणां विना नैवसिध्यत्यंतत्माचार्यः पूर्वपक्षं निषेधति अशोच्य
ते इति महावाक्यनिष्ठपदे लक्षणाभावः किंतु मुख्यार्थानुपपत्त्यभावादखंडार्थेतात्पर्याभावाद्वा आद्यं निषेधयति विरु
द्धयोरिति संसार्यसंसारिणोरभेदस्य प्रत्यक्षादिविरोधाद्योग्यतयावेदेन प्रमापयितुमशक्यत्वान्मुख्यार्थस्यानुपप
न्नत्वान्नन्मूलकलक्षणास्यादेवेत्यर्थः द्वितीयं निराचष्टे नहीति अखंडैकरसे तात्पर्यग्राहकषड्विधलिंग
स्यचातिप्रसिद्धत्वात्तात्पर्याभावान्मलक्षणाभाव इत्यर्थः ननु पूर्वापरविरोधे पूर्वदौर्बल्यं प्रकृतिवदिति न्यायेन

अभेदलक्षणया परिपूर्णसच्चिदानंदप्रत्यगात्मावबोधनमनुपपन्नमिति अशोच्यते विरुद्धयोरभेदो हि न वेदे
न प्रमीयते अनन्यगतिकत्वेन मानांतरप्रबाधनम् २ यदत्रोक्तं मुख्यार्थानुपपत्त्यभावान्नलक्षणेति तन
न्न विरुद्धस्वभावयोर्जीवपरमात्मनोरभेदस्य प्रमाणबाधितत्वात् नहि विरुद्धयोरभेदः क्वचित्प्रमाणेन

ब्रह्मात्मनोरैक्यसिद्धये सर्वभेदग्राहिमानबाधस्यावश्यंवक्तव्यत्वाच्च संसार्यसंसारिभेदग्राहिमानं बाधित्वैव
तयोरैक्यं वेदो बोधयतु ततः कथं मुख्यार्थानुपपत्तिरितिचेत्तत्राह अनन्येति परिपूर्णब्रह्मात्मैकरसार्थसि
द्धये यत्सर्वमानांतरस्य बाधनं तदनन्यगतिकतया यत्र कथमपि प्रमाणांतराबाधेन स्वार्थसिद्धिर्भवति त
त्र तद्बाधोनोचितः तथा च मानांतरमनवबाध्य तदनुरोधेन तु मुख्यार्थानुपपत्तिमालोच्य वेदो लक्षणया प्र
त्यग्ब्रह्मणोरैक्यमवबोधयतीति सिद्धान्तलक्षणोत्पत्तिः पूर्वपक्षमनूद्य दूषयन् श्लोकं व्याचष्टे यदत्रोक्त
मित्यादिना ननु विरुद्धयोरप्यभेदोऽस्तु किं को दोषः इति तत्राह प्रमाणेनेति॥ ॥ ॥ ॥

शिव· ७१

प्रतिरूपशाद्रूस्यदर्पणमुखादेरारूढस्यकथमन्यार्थकथनंतत्राह भवतीति तर्हिदर्पणमुखमसत्यमेवेतितत्र
जीवोपिकथंसत्यइतितत्राह तथापीति तदेवमुखमितिप्रत्यभिज्ञानुरोधाद्बिंबप्रतिबिंबयोरभेदेसतिबिंबात्म
कत्वात्प्रतिबिंबमसत्यंकथंस्यादित्यर्थः आभासस्तूपाधिगतत्वं तत्रनजीवः किंतुजीवधर्मः जीवस्त्वाभासवि
विशिष्टाचिदेवततोनासत्यइतिभावः तदुक्तं उपाधिरंतःकरणंत्वमर्थेजीवत्वमाभासनतत्रतत्त्वम् तदन्वितापचित्प्रति
बिंबमेवमनन्वितांतामिहबिंबमाहुरिति २ आभासनमाभासइत्यर्थः ननुप्रतिबिंबस्वरूपोजीवोबिंबमेवचेत्तत्क
थंतर्हिबिंबप्रतिबिंबस्वरूपंचेतिभेदव्यपदेशात्मकोव्यवहारइतिशंकते कथमिति एकत्वेपिभेदव्यवहारस्योपा
ध्यन्वयव्यतिरेकानुविधायित्वान्नशंकेतिहेतुमाह एकस्मिन्नेवेति भेदाभेदमतमुदास्यैवकारः नत्वेकस्मि

भवतुवाप्रतिबिंबस्तथापिनासत्यः प्रत्यभिज्ञानेनबिंबप्रतिबिंबयोरभेदग्रहात् कथंतर्हिभेदव्यवहारः एक
स्मिन्नेवस्वरूपेसर्वकल्पनारहितेमुखचंद्रादौबिंबप्रतिबिंबस्वरूपमितित्रिविधव्यवहारस्योपाध्यनुप्रवि
ष्टत्वारोपानंतरंदर्शनात् तस्मात्त्वमस्यादिवाक्येबाधायांसामानाधिकरण्यमितिकल्पनावेदवाह्या ॥

न्नित्यमुक्तं तस्यानेकरूपत्वंचात्मकल्पात्तत्राह सर्वेति अज्ञानप्रभावादनेकरूपत्वेपिस्वरूपंवस्तुतःकल्पनारहित
तमित्यभिन्नमेवतदित्यर्थः जीवस्यानाभासत्वेसिद्धमर्थमुपसंहरति तस्मादिति यद्वाभवतुसत्योजीवस्तथापि
सामानाधिकरण्यंबाधायांकिंनस्यादित्याशंकामुपसंहारव्याजेनपरिहरति तस्मादिति बाधविरोधेव
सत्यमितिकथंसत्यस्यबाधइत्यर्थः ननुकिमितीयंकल्पनावेदवाह्यावैदिकैरेवैकदेशिभिःस्वीकारादि
तिनेत्याह तत्त्वान्वेति ॥ ॐनमःकमलदलनयनाभिरामाय ॥ श्रीरामचंद्रायनमः ॐहनुमतेनमः

ॐ वे॰ मु॰

उ॰ वे॰ मु॰

७.

द्वितीयं निराचष्टे नचेति दुःखहेतुर्जीवोपादानकं उपादाननाशश्चोपादेयनाशहेतुरिति आत्मनाशात् दुःख
निवृत्तिरिति भयति दुःखाभावः पुरुषार्थः तत्साधनमात्मनाशो वितत्थेति नचेत्यन्वयः तत्र हेतुः कस्येति किं
दुःखाभावकृत्यैव पुरुषार्थः आत्मीय इति नाद्यः शत्रुदुःखाभावस्यापि तत्त्वापत्तेः न द्वितीयः आत्मनो नष्ट
त्वात् कस्य पुरुषार्थः स्यादित्यर्थः आत्मबाधमंगीकृत्य तत्रापदेशो मोक्षाद्यनुपपत्तिरुक्ता संप्रत्यसत्यत्वा
भावान्न बाधकृत्युपपादयति नचेति असत्य इति छेदः कल्पितो न चेत्यर्थः सत्यत्वग्राहकमानाभावाद्वा जीवो
ऽसत्यः उत युक्तिबाधाद्वा असत्यत्वावेदकप्रमाणसद्भावाद्वा आद्यं पराचष्टे अनेनेति ननु जीवपरमात्मनोरभे
दमात्रं प्रतीयते न जीवसत्यत्वं तत्कथं जीवः न कल्पितः इत्याशंक्यासत्यं ज्ञानमित्यात्मपदार्थनिर्वचनसिद्धमा

नच दुःखनिवृत्त्या दुःखाभाव एव पुरुषार्थः कस्यायं पुरुषार्थः स्यात्स्वस्यैव बाधितत्वात् नच जीवात्माऽ
सत्यः अनेन जीवेनात्मनेति सत्येन परमात्मना अभेदश्रवणात् नान्योतोऽस्ति द्रष्टेत्यादिनाभेदप्रति
षेधाच्च नच स्वतोऽसंसारिस्वभावस्य परमात्मनः संसारिस्वभावरूपतानुपपत्तिः अविद्याद्युपा
धिसंबंधान्नभो नीलिमवदुपपत्तेः नच रूपं रूपं प्रतिरूपं बभूवेति वाक्यादाभासरूपत्वं जीवस्येति वा

त्मस्वरूपमाह सत्येनेति तथा च स(त्यं) तत्र हि तत्तन्मनुष्यत्वाद्याक्रांत तत्तच्छरीरसादृश्यपरस्येव प्रतिरू
त्यात्मनो जीवस्यासत्यत्वं बाधितमित्यर्थः ननु भेदग्राहिणि प्रत्यक्षे सत्यभेदश्रुतिरुपचरितेत्याशंक्य दूषणांत
रमाह नान्योतोऽस्तीति भेदस्य पारमार्थिकत्वे तन्निषेधो न स्यादित्यर्थः सत्यत्वे जीवस्य युक्तिविरोधमुक्त्वा प्रति
ज्ञापत्ति नचेति जीवाऽसत्यग्राहिप्रमाणसद्भावपक्षं निराचष्टे नच रूपरूपमिति नच वाच्यमिति प्रतिज्ञायां
हेतुमाह तत्र हीति तत्तन्मनुष्यपशुपक्ष्यादिशरीराणि द्विरावृत्तरूपपदार्थः तच्छरीरसादृश्यं प्रतिरूप
शब्दार्थः यथा मुद्राप्रतिमुद्रान्यायेन मुद्रासादृश्यमेव प्रतिमुद्राशब्देनोच्यते तस्यार्थांतरं तथा प्रतिरूपशब्दे
न रूपसादृश्यमेवोच्यते नाभास इत्यर्थः यथाहुः देहे देहे प्रविष्टः सन् देहाकारतामगादिति॥ = ॥

87

शिव.

७

ननु जले न गगनस्याभासः नीरूपत्वादेव कथं तर्हि जलनिष्ठतया तत्प्रतीतिः तद्वर्त्तिनां सवितृकरादीनामारोप्या

दिति गृहाण ततो न चिदाभासो जीव इति न त्वत्यल्पेऽगाधे च जले महाकाशप्रतीतेरुपरिवर्त्तिगगनाभासस्या

कामेनापि स्वीकारात् नहि विनोपरिवर्त्तिमहाकाशच्छायां तत्परिमाणमहत्वभ्रमो जले संभवति तस्मात्

त्स्यैव जले गगनाभास इति कथं न चैतन्याभासो जीव इति युक्तिसिद्धं चिदाभासं जीवं कृत्वापि साधयति रूपंरू

पं प्रतीति उपाधिमुपाधिं प्रतीत्यर्थः प्रतिरूपः प्रतिभासः प्रतिच्छायेति यावत् ननु संसारिणो जीवस्य बाधेपि ना

त्मनो मुक्तिरुपपन्ना बाध्यसंसारस्य समूलस्यानर्थात्मनोऽनुच्छेदादिति नेत्याह तथा चेति स्वरूपानंदावभासा

ऽवकारकाऽज्ञानानंदे रिदं सर्वमित्यादिवाक्येन बाधितत्वान्निरावरणानंदात्मा मुक्तित्वेनावतिष्ठत इति चैतन्या

रूपं रूपं प्रतिरूपो बभूवेति श्रुतेश्च तथा चेदं सर्वं यदयमात्मेति शास्त्रात् सर्वस्याज्ञानतत्कार्यस्य बाधे केवलानंद

रूपः परमात्मैवापवर्गेऽवशिष्यत इति न किंचिदनुपपन्नं तन्न बंधमोक्षयोर्वैयधिकरण्यापत्तेः मोक्षा

र्थिप्रवृत्त्यनुपपत्तेश्च नह्यन्यस्य मोक्षार्थमन्यो यतते न वा स्वनाशः पुरुषार्थः ।। ॐ नमो नारायणाय ।।

भासपक्ष एव श्रेयानिति अविद्योपाधिं चिदाभासं जगज्जडविलक्षणं जीवं बाध्यमित्याकुलानाचार्यो निषेधति तन्नेति

भोक्तात्मा वा जीव एव अहं सुखीत्यादिप्रतीतेः स्वसमवेतसुखसाक्षात्कारस्य च भोक्तृत्वात् भोक्तृत्वं च न कर्तृत्वं वि

प्र नाऽकर्तुरभोक्तृत्वात् कर्तृत्वं च न मात्रज्ञत्वं विना सर्वो जानाति ततः इच्छति ततः करोति इति सर्वजनीनत्वात् ततो

नवविधापि बंधो जीवस्यैव तद्बाधे न जगदुपादानाज्ञानबाधे न च परमात्मनोऽपवर्गो निरावरणसुखात्मनावस्थि

तिर्मुक्तिरिति बंधमोक्षयोर्वैयधिकरण्यप्रसंगे हेतुमाह बंधमोक्षयोरिति किंच यदि जीवबाधः तदा श्रवणादौ

कः प्रवर्ततां मोक्षार्थीति चेत् कस्य मोक्षमिच्छ[illegible]तीति परस्य स्वस्य वा नाद्यः विरोधात् नह्यन्यप्रयोजनायान्यो

यतत इति क्वचिदपि दृष्टपूर्वमित्याह मोक्षार्थीत्यादिना स्वस्य चेत्तर्हि स्वनाशो वा पुरुषार्थः दुःखनिवृत्तिर्वा आ ख

द्ये निरावष्टे नेति स किं स्वतः पुरुषार्थः उत पुरुषार्थसाधनं नाद्यः सुखदुःखाभावे तत्त्वादिति वा[illegible] ॥

ॐ

वे॰सु॰टी॰
६९

नन्वेवमपि नैकार्थता परमात्मपदं यद्यपि चिदात्मन उपस्थापकं सत्त्विति: तथापि त्वंपदं जीवाभावोपस्थापकं तथा च भिन्नार्थयोरैकार्थ्यं इति ;कुत इति चेत् अभावस्याधिष्ठानस्वरूपानतिरेकात् ननु मास्तु भयपदे लक्षणा तथापि ब्रह्मपदस्य शुद्ध:परिहारो निर्विशेषशक्तस्य शुद्धोपस्थितौ लक्षणापेक्षत्वादिति चेत् न सत्यादिपदादिवत्तत्पदादपि शुद्धस्यैवोपस्थिते: ननु तथापि तत्त्वमसि वाक्ये जीवबाधो न युक्त: तत्त्वाद्बाधस्याश्रीवत्वविधानात् तत्पदार्थस्य च पूर्वनिर्दिष्टत्वेनानुवादार्हत्वात् ननु तर्हि अयमात्मा ब्रह्मेति वाक्ये कागतिस्तत्र जीवस्यैव बाधप्रतीते: तर्हि विनिगमनायां न हेतुरिति यदि जीवपदलक्षणा ब्रह्मण एव बाधमाशंक्येत तत्तदा शास्त्रं प्रतारकवाक्यवदपुरुषार्थं जीवस्वरूपतात्पर्येकमप्रमाणं स्यात् इति सिद्धान्तिशंकामनूद्य दूषयति

नचानयोर्मध्ये एकस्य बाध इति विनिगमकाभावे यदि परमात्मन एव बाधमाशंकेत तदा शास्त्रमपुरुषार्थे जीवे पर्यवसितमिति न प्रमाणं स्यादिति वाच्यं सत्यं ज्ञानमनन्तं ब्रह्मेति मंत्रवर्णात् ब्रह्मण: सत्यत्वेऽवधारिते परिशेषाज्जीवस्यैव संसारिणो बाधात् ननु कोयं जीव: चैतन्यं जडो वा आद्ये ब्रह्मैवेति बाधानुपपत्ति: द्वितीये घटादिवद्भोक्तृत्वानुपपत्तिरिति चेन्न नैष दोष: चैतन्याभासत्वेन तस्य प्रसिद्धजडाजडविलक्षणत्वात् नच नीरूपस्य चैतन्यस्याभासानुपपत्ति: नीरूपस्यापि गगनस्य स्वच्छजले आभासदर्शनात्॥

नचेत्यादिना ब्रह्मपदार्थस्वरूपप्रमाणसत्यादिवाक्यविरोधान्नाविनिगमोऽत्र वाज्जीवावशेषंशंकेति हेतुमाह सत्यमिति ननु किं चिदात्मैव जीव उत तदन्यो जडो वेति दूषयितुं विकल्पयन्नाशंकते नन्विति भोक्तृत्वेति भोगस्य चिद्धर्मत्वादित्यर्थ: जीवो न ब्रह्म अस्वप्रकाशत्वात् घटवत् नापि जड: भोक्तृत्वात् व्यतिरेके घटवदेव तस्माज्जडाजडविलक्षणोऽनिर्वचनीयो जीव इति सावधार्हपवेति परिहरति नैष इति चैतन्याभासत्वेनेति चैतन्यलक्षणराहितोऽस्वयंप्रकाशत्वात् भोक्तृत्वाच्च चैतन्यवदाभासमानत्वाच्च चैतन्याभास इति चैतन्यछायेत्यर्थ: ननु चैतन्यस्यारूपत्वात् छायात्मा जीवो न युज्यते न हि नीरूपस्य वायो: छाया क्वचिद्दृष्टेत्यत आह नचेति तत्र हेतु: नीरूपस्यापीति॥ श्रीरामो जयतु॥

शिव॰
६९

89

भवतु महावाक्यस्य प्रधानत्वं किं ततस्तत्राह तथा चेति ननु को विशेषो यत्रानुपपत्तिस्तत्रैव लक्षणेति तत्राह तत्रेति प्र
धानगुणतया उत्तरव्याख्यानाय गुणवाक्य एव लक्षणा युज्यते न प्रधानवाक्य इत्यर्थः ननु विद्वत्त्वाविशेषादत्राप्यस्तु
लक्षणेति तन्न्यायविरोधादित्याह गुणेति अत्रैकदेशिनो वदंति तत्त्वमस्यादिवाक्ये लक्षणानिराकरणं तन्नानिष्टं त
त्तस्याऽङ्गीकारादित्येकदेशिमतमुत्थापयति अत्रेति कथं तर्हि वेदांतवाक्ये सामानाधिकरण्यं भिन्नप्रवृत्तिनि
मित्तयोः पदयोरेकस्मिन्नर्थे प्रवृत्त्यभावात् नहि विना लक्षणां जीवपरमात्मनोरैक्यं संभावयितुमपि शक्यमिति
सिद्धांतिमतं दूषयति नचेति सामानाधिकरण्यमेकं यद्वा जीवं सामानाधिकरण्यानुपपत्तिरुक्तास्तेनोक्त

×ब्रह्मशब्दाभ्यां तद्वाचके पदे लक्ष्येते तयोः ×६

तथा च प्रधानवाक्य एव कथं लक्षणा तत्राऽसमवेतार्थत्वेन तत्रैव सा युक्ता गुणत्वन्यायकल्पनेतिन्यायात्
अत्र केचित् तत्त्वमस्यादिवाक्ये लक्षणास्येवतावन्नांगीक्रियते नच विरुद्धयोर्जीवपरमात्मनोः समानाधि
करण्यानुपपत्तिः रज्जुसर्पयोरिव एकस्य बाधेनापि तदु

र्थः अन्यथोपपत्तिहेतुमाह रज्जुसर्पयोरिवेति सर्पोर
ज्जुरिति तावत्पदद्वयात्मकं वाक्यं तत्रैकविभक्त्यंतमेकार्थं च विधत्ते सर्पानुवादेन रज्जुविधानात् तद्विधानं च
सति सर्पस्वरूपेण बाधयते व रज्जु तथा च सर्पस्वरूपं सर्पपदेनानुवादव्याजेनापबाध्य रज्जुस्वरूपमात्रमव
शिष्टमित्येकमेवार्थ इति तद्वृत्तिपदद्वयं यथा सामानाधिकरण्यं तथा त्वमिति पदेन जीवमपबाध्य तत्पदेनावशि
ष्टब्रह्ममात्रप्रतिपादनादुभयोः पदयोरेकार्थवृत्तित्वात्सामानाधिकरण्यमुपपन्नमित्यर्थः ॥ ॥ ॥

९०

द्वितीयमनूद्य दूषयति नचेति ननु लक्षणार्थे किमिति मूकतालक्षणाया अदोषत्वात् तदुक्तिसंभवादिति तत्राह नत्वा
पीति लक्षणोपस्थापकं पदं लक्षणाथापनावर्तते नलक्ष्योपस्थापकपदेनापि भवितव्यं एवं तत्रतत्रापीत्यपन
वस्थेत्यर्थः किंच नत्वमिति पदयोर्लक्ष्यमेकं भिन्नं वा आद्ये इतरपदवैयर्थ्यं एकेनैव पदेन लक्षणया प्रत्य
क्तत्वस्तादात्म्यरूपलक्ष्यसाक्षात्कारस्य सिद्धेरित्याह किंचेत्यादिना ननु किमिति इतरपदवैयर्थ्यं उक्त
साक्षात्कारस्य प्रमाणत्वसिद्धये ऽपेक्षितवाक्यत्वनिर्वाहकत्वादित्याशंक्य हेत्वंतरमाह पादार्थेति पदयोर
कार्थत्वे पदार्थांतरत्वाभावेन संसर्गरूपवाक्यार्थज्ञानेन स्यादिति तुल्यार्थक त्वात् पर्यायतापदयोः
स्यादिति तेन तस्मिन् पदे प्रयुक्ते ऽपि वाक्यत्वं न स्यादित्यर्थः ननु यद्यपि सामान्याकान्नालक्ष्यमेकं तथापि त

नच सर्वथाऽनभिधेयो र्थो लक्ष्यत इति दृष्टं लक्ष्यपदार्थे मूकताप्रसंगात् तत्रापि लक्षणायां लक्षणा
नवस्थाप्रसंगात् किं चपदाभ्यामेको र्थो लक्ष्यते अर्थद्वयं वा नाद्यः एकपदवैयर्थ्यप्रसंगा
त् पदार्थवाक्यार्थयोरविशेषाऽऽपत्तेश्च विशेषेवा अखंडो वाक्यार्थो न स्यात् अत एव न द्वितीयः लक्ष
णाभावप्रसंगाच्च नहि विरुद्धयोरभेदानुपपत्त्या कृतालक्षणाभिन्नयोरभेदे पर्यवस्यति किंचवेदां
(तेन तत्त्वमस्यादिवाक्यमेव प्रधानमितरत्सर्वं तदुपकरणमेव
न्तेषु विशेषमादाय पदांतरप्रवृत्तेरपर्यायत्वा

त् कथं न वाक्यतेति तत्राह विशेषेवेति सामान्यविशेषसंसर्गित्वेऽखंडरूपत्वहानेरित्यर्थः लक्षणावैयर्थ्यं
द्वितीयपक्षाधिको दोष इत्याह लक्षणेति ननु किमिति लक्षणाभावः भिन्नयोरपि तयोरभेदं लक्षणया
करिष्यति वेद इति तत्राह नहीति तात्पर्यवृत्त्या बोधने पर्यवसानं प्रमाणं हि नोत्पादकं किंतु स्थितिज्ञा
पकं न च भिन्नयोरभेदो वास्तवोस्ति इति लक्षणयापि वेदः किं बोधयेदित्यर्थः तत्त्वमस्यादिवाक्यल
क्षणाभावे हेत्वंतरेणोपपादयितुं भूमिकामाह किंचेत्यादिना अयमर्थः भूतायभव्यमुपदिश्यते इति
हि वेदांतमर्यादा तत्ता वेदांतप्रमाणे तत्त्वमस्यअयमात्माब्रह्मेत्यादिमहावाक्यानि सर्वप्राणिषि सत्तचित्सु
खात्मकात्मस्वरूपप्रतिपादकतया प्रधानवाक्यत्वं प्राप्नुवंति तदितरश्रवणादिवाक्यानि तदपेक्षितार्थस

पदैकत्वाद्वाक्यार्थाभावप्रसंगात्॥

पं॰

लौकिकवाक्यं स्वार्थबोधने मानांतराऽविरोधमपेक्षत इति युज्यते लौकिकत्वाविशेषात् वेदस्त्वपौरुषेयत्वात्स्वतः
तिस्वार्थविरोधिमानांतरं बाधिष्यते तत्तान्न स्वार्थानुपपत्तिरिति नैकदेशलक्षणेति पूर्वं निषेधे हेतुमाह श्रुतीति ननु
यथाकथंचिदपि प्रमाणांतरबाधेन यदि स्वप्रामाण्यमुपपद्यते किमिति विना प्रयोजनमितरप्रमाणबाधनमिति तत्राह
अन्यथेति अखंडमसंसर्गिपदं द्वितीयं सजातीयविजातीयस्वगतद्वैतरहितं तदेव च प्रत्यक् सर्वांतरमात्मेति यत्र
बोधनं लक्षणयापि तदपि न स्यात् सकलसजातीयादिभेदावबोधकप्रत्यक्षादिभिः प्रमाणैर्विरोधात् ततः प्रमाणां
तरबाधनं श्रुतेरावश्यकमिति पूर्वमेव मुख्यार्थविरोधिप्रमाणं बाध्यतां न लक्ष्यार्थांतरपरत्वमित्यर्थः किंचाभिधे

श्रुतिविरोधेन भेदग्राहिप्रमाणस्यैवाप्रामाण्यात् अन्यथा लक्षणयाऽप्यखंडाद्वितीयप्रत्यगात्मबोधनं न स्यात्
सकलभेदग्राहिप्रत्य क्षादिविरोधात् तथा च मुख्यार्थेनानुपपत्तिः न च शक्यलक्ष्ययोः संबंधः
लक्ष्यस्यात्मनोऽसंगत्वात् न चासंगेन किंचित्संबध्यते न चासंबद्धो लक्ष्यते तथादर्शनात् ॥ ॥ ॥

याऽविनाभूते प्रवृत्तिर्लक्षणेष्यते इति वृद्धानां लक्षणास्वरूपविदां स्थितिः शक्यसंबंधिन्येव लक्षणा न चात्र शक्य
संबंधिताऽसंगात्मनोऽसंसर्गित्वात् तस्यैव च तत्त्वलक्ष्यत्वात् न तत्र लक्षणेति हेत्वंतरमाह न चेत्यादिना ननु यद्यपि
लक्ष्यमसंसर्गि तथापि विशिष्टवाच्यं संसर्गीति तद्देवलक्षणावलात् संलक्ष्यतामिति नेत्याह न चेति संबंधस्यो
भयनिष्ठत्वादेकस्यासंबंधित्वे इतरमात्रनिरूप्यसंबंधायोगादित्यर्थः तथेति स्वार्थासंबंधिनी लक्षणायाऽदर्श
नादित्यर्थः किंच लक्ष्यं चिन्मात्रमभिधेयं न वा अभिधेयं चेत्तर्हि तदभिधानप्रवृत्तिवत्स्वचिदात्मनि तत्त्व
मित्यादिपदप्रवृत्तेः किं लक्षणया ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ॐ

लक्षणामङ्गीकृत्याखण्डात्मैक्यसाक्षात्कारे तत्त्वमस्याद्यागमस्य करणत्वमुक्तं तत्र लक्षणामङ्गीकृत्याखण्डात्मनि
शब्दप्रवृत्तिमाक्षिपति नचेति अयुक्तत्वे हेतुः भागेति अयमर्थः न तावदिह लक्षणा जहत्स्वार्था एकदेश
स्यात्मनः परिग्रहात् नाप्यजहत्स्वार्था [illegible] परोक्षत्वादिधर्मत्यागात् नाप्युभयरूपा भागेत्य
एकदेशे लक्षणाया शब्दप्रवृत्त्या एकदेशस्य शुद्धचित्स्वात्मकस्य परिग्रहे स्वीकारे पदद्वयसमानाधिकरण्यबला
त् श्रुतस्य परोक्षापरोक्षसंसार्यसंसार्यभेदस्य परित्यागप्रसङ्गादिति ननु सामानाधिकरण्यबलात्प्राप्तोऽपि प
दार्थयोरभेदो विरुद्धत्वादयोग्य इति तदनुपपत्त्याऽर्धं त्यजति पण्डित इति न्यायेन विरुद्धांशत्यागेनावि
७ रुद्धांशस्य प्रामाण्याय लक्षणा तु तत्त्वमस्यादिवाक्ये को दोष इति शंकित्वा दूषयति नचेत्यादिना नच [illegible]

ननु तत्त्वमस्यादिवाक्ये लक्षणैव नयुक्ता भागलक्षणाया एकदेशपरिग्रहे श्रुतार्थपरित्यागप्रसं
गात् नच पदयोरेकविभक्त्यन्तनिर्दिष्टयोः समानाधिकरणपदपरामर्शानंतरं पदार्थयोरभेदो वा
क्यार्थस्तावत्प्रतीयते साच विरुद्धस्वभावयोः संसार्यसंसारिणोर्जीवपरमात्मनोर्न संभवतीति
मुख्यार्थानुपपत्त्या लक्षणा युक्तेति सांप्रतं श्रुतिसिद्धेऽर्थेऽनुपपत्त्यभावात् न च विरुद्धस्वभावयोर्भे
दग्राहिमानांतरविरोधेनाविरुद्धयोरंशयोरभेदो बोध्यत इति वाच्यम् ॥ श्रीरामाय नमः नमो

सांप्रतमित्यन्वयः समानाधिकरण्यस्वरूपमाह पदयोरिति द्विवचनमविवक्षितं वैय्यधिकरण्यं व्यावर्तय
ति एकेति अत्र भिन्नप्रवृत्तिनिमित्तयोरित्यपि बोद्धव्यं अन्यथा पर्यायपदेष्वेकविभक्तिकेषु सामानाधिकरण्य
प्रसंगात् वेदोक्तं गृहीतुं वयं समर्था न तं पर्यनुयोक्तुं कथमेवमयं वदतीति स चेद्वेदोऽसंसारिसंसारिणोरभेदं
ग्राहयति तर्हि स नानुपपन्न इति न तदनुपपत्त्या लक्षणेति हृदयार्थः ननु लोकवेदाधिकरणन्यायेन वेदो
पि लौकिकवाक्यविधयैव स्वार्थं ग्राहयति लौकिकं च वाक्यं प्रमाणांतरविरोधं विनैवार्थबोधकं विशि
ष्टयोर्भेदस्य च नाहमीश्वर इति प्रत्यक्षादिसिद्धत्वात्तयोरभेदमुपेक्ष्य शुद्धचिन्मात्राभेदं लक्षणया बोधयि
ष्यति वेद इति शंकामपाकरोति नचेति ॥ ॥ ॥

संवादार्थयथार्थज्ञानं मनसा जन्यते नैव च चक्षुरादिना जन्यते न दोषयोरन्यतरप्रामाण्यमनधिगतार्थत्वाभावात् अथ एतद्दोषपरिहाराय शब्दः परोक्षतया बोधयति न प्रामाण्यमिति तद्विषयसंवादादप्रामाण्यमिति अभिप्रेत्य हेतुमाह अपरोक्षतयेति ननु तत्त्वमस्यादिवाक्यं परोक्षज्ञानं जनयदपि अपरोक्षाकारमेव ज्ञानं जनयिष्यति तदाकारस्य ब्रह्मण्यपि सत्त्वात् न च तर्हि संवादादप्रामाण्यं धारावाहिकबुद्धिवदप्रामाण्यापत्तेरित्याशङ्क्य परोक्षतया वेदनेत्युक्ते वेदान्तश्रवणजन्यस्य चन्द्रपरोक्षासंवादादप्रामाण्यं धारावाहिकबुद्धिवत् अन्यथा पर्वतोऽग्निमानिति प्रतिज्ञावाक्यात् परोक्षाकारज्ञानमुत्पादयितुमलं न स्यात् परोक्षाकारमात्रज्ञानजनकत्वस्वभावात् अन्यथा पर्वतोऽग्निमानिति प्रतिज्ञावाक्यात् परोक्षाकारज्ञानजननमेव शब्दस्वभाव इति तदुक्तं सुरेश्वराचार्यैः स्वभावतो वह्न्यावयविनाकारप्रसंगः स्यात् परोक्षाकारज्ञानजननमेव शब्दस्वभाव इति तदुक्तं सुरेश्वराचार्यैः स्वभाव

वह्निः

अपरोक्षतया वेदनानवबोधनात् वाक्यजन्यसाक्षी तत्त्वमस्यादिवाक्योपपत्ता नचलौकिकविषयत्वं मुख्यबाधकाभावात् नचश्रुतिविषयत्वेऽपि समानो दोषः लक्षणाया अनवबोधनात् ॥ ॥ ॥ ॥ ॥

खिलं वाक्यं संसर्गात्मकमेव हि परोक्षत्वाच्च तथा वस्तु बोधयति स्वतः इति आत्मसाक्षात्कारस्य मनःकरणकत्वे श्रुतिविरोधश्च दुर्वार इत्याह वाक्यजन्येति नन्वेतद्वाक्यमसंसृष्टमनोविषयमित्युक्तमिति तत्रेत्याह नचेति लक्षणाप्रसक्तेः सा च मुख्यसति बाधके युक्ता नान्यथेत्यर्थः नन्वागमकरणत्वेऽपि तस्य समानो दोष इति नेवेदान्तविज्ञानसुनिश्चितार्था इत्यादिश्रुतिप्रमाणाद्वेदान्तकरणत्वे ब्रह्मसाक्षात्कारस्य प्रतीयते यतो वाचो निवर्तन्त इति वाक्याच्च तन्निषेधः प्रतीयते एवं विरोधे किं प्रामाण्यमन्यतरस्य स्यात् उभयवाक्यार्थसमुच्चयस्वीकारो वात्र्यवस्था वा विकल्पस्य क्रियायामेव संभवान्नोपन्यासः नतावदन्यतरप्रामाण्यं उभयोरपि वेदवाक्यत्वेन तुल्यत्वात् न वा तदर्थसमुच्चयः विरुद्धयोस्तदयोगात् तस्माद्व्यवस्थया परिहर्तव्यो विरोधः निषेधवाक्यमभिधावृत्त्या प्रवृत्तिं तत्र निषेधयति वेदान्तगम्यत्वानुवादवाक्यानि लक्षणया तत्र प्रवृत्तिमनुजानन्तीति न कोऽपि विरोध इति शंकोत्तराभ्यामाह नचेत्यादिना ॥ ॥

तत्रागमस्य करणत्वे सामर्थ्यमुपपादयति नन्वेति ननु शब्दोपि न क्वचित्साक्षात्कारकरणत्वेन क्लृप्तः कथं तत्कर
णं तत्राह लौकिकस्येति न च तत्रेन्द्रियकरणं सन्निधितस्मिन् दशमत्वापरिज्ञानात् तद्व्यतिरेकेणाधुनमस्मि वा
क्याद् दशमोऽस्मीति साक्षात्कारदर्शनात् न च तत्परोक्षज्ञानं अस्मीति प्रतीतेरपरोक्षाकारत्वात् ततो व्यभिचारान्नेन्द्रियं
तत्र करणमिति ध्येयं तन्नायं प्रकारः नन्वेवं शब्दस्वभावविरोधः स्यादित्याशंकते प्रमाणेति प्रमाणस्य प्रमेयोपजीवा
कत्वेन तदनुरोधेनैव स्वभावो न स्वतन्त्रः कश्चित्स्वभाव इति नेति पूर्वपक्षनिषेधे हेतुमाह प्रमेयेति परोक्षज्ञानजन
कस्वभावत्वमसिद्धमिति भावः कीदृक् तर्हि प्रमेयस्यात्मनः स्वभाव इति तत्राह प्रमेयस्य चेति अपरोक्षत्वं कदा

तच्चेतराविषयत्वे प्रतीतिमात्रविषयत्वे समंजसमन्यथा प्रमाणान्तराव्यावर्तकत्वे विशेषणवैयर्थ्यात् लौ
किकस्य दशमस्त्वमसीत्यादेरात्मन्यपरोक्षज्ञानजनकत्वस्यैव दृष्टत्वात् प्रमाणस्वभावहानिः स्या
दिति चेन्न प्रमेयानुसारित्वात् प्रमाणस्वभावस्य प्रमेयस्य च नित्यापरोक्षत्वात् न च ज्ञानगतो धर
्मोऽपरोक्षत्वं यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तर इत्यात्मनोऽप्यपरोक्षश्रवणात्॥ ॥ ॥

चिद्घटादावपीत्यतिव्याप्तिं विशिनष्टि नित्येति अपरोक्षैकरसस्येत्यर्थः ननु प्रमेयं न परोक्षैकरसं न वा परोक्षैकरसं एकदे
व वह्न्यादौ पुरुषभेदापेक्षयानुमितिसाक्षात्कारविषयतयोभयरूपत्वप्रतीतेः न च विरुद्धं रूपद्वयमेकदैकत्र सं
भवति ततोन प्रमेयस्य स्वाभाविकोऽसौ धर्मः किं तु ज्ञानविशेषोपाधिकाविति शंकित्वा दूषयति न चेति यत्साक्षा
दिति अव्यवहितं स्वरूपमुच्यते तद्व्यवहितत्वं गोरांश्रोत्रव्रस्यादावप्यस्तीति तन्निवृत्तये विशिनष्टि अपरो
क्षादिति अगौणमित्यर्थः आंतरत्वमिन्द्रियमनः प्राणादेरप्यस्तीति तद्व्यावर्त्तनाय विशेषयति सर्वेति ततश्च श्रु
तिसिद्धमपरोक्षत्वं ब्रह्मस्वरूपं नत्वौपाधिकमित्यर्थः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तर्हि वह्न्यादौ उभयं विरुद्धमेकदा स्यादिति शंकितं दोषं परिहर्तुमपरोक्षस्वरूपजिज्ञासामुत्थापयति किंत
दिति अपरोक्षस्वरूपमाह वस्तुत इति साक्षात्कारिज्ञानविषयत्वं कदाचिदेवकारः कथं तर्हि विरोधपरि
हार इति तत्राह तदेति वस्तुत्वर्थे विश्रान्तं पर्यवसन्नं प्रमातर्येवाव्यवहितत्वस्य पर्यवसाने हेतुमाह यावदि
ति तथा च वह्न्यादौ परोक्षत्वमेव मुख्यं गौणत्वऽपरोक्षत्वं आत्मसन्निधानकृतत्वात् ततो नोभयमेकदावि

मि॰ रुद्धमिति भावः ननु यथा घटादावनात्मनि आत्मापरोक्षैकरसे ऽपरोक्षत्वं गौणमपि वर्तते इति तदादायैव द्वयप्र
प्रमाणकत्वं तथा प्रमातर्यपि गौणं परोक्षत्वमादाय शब्दः प्रवर्ततां इति नेत्याह तथा चेति गौणमपि परो
क्षत्वमात्मनि न संभवति आत्मव्यवहितत्वस्यात्मनि कल्पयितुमशक्यत्वात् तथा च प्रमाणं भवन् वेदो विपरी

किं तदपरोक्षत्वमिति चेत् वस्तुतः प्रमात्रव्यवहितत्वमेव तच्च प्रमातरि विश्रान्तं यावद्यावत्प्रमातुर्विप्र
कृष्यते तावत्तावत्परोक्षत्वोत्कर्षदर्शनात् तथा चापरोक्षस्वभावे आत्मनि परोक्षज्ञानं जनयन् वे
दो भ्रान्तिमेव जनयेत् अन्यथास्थितस्यान्यथावबोधनात् मोक्षसाधनीभूतस्य चात्मसाक्षात्कारस्य
मनोजन्यत्वे व्यभिचारिकरणजन्यतयाऽप्रामाण्यप्रसंगः नच वेदमूलतया प्रामाण्यम्॥ ॥ ॥

तं स्वरूपं कथमनुभावयेदनुभावयन् वा कथं प्रमाणं स्यादित्यर्थः इममेवार्थं व्यतिरेकेणाह अन्यथेति ए
वं स्वपक्षं साधयित्वा परकृते दोषमतं आगमस्य परोक्षज्ञानजनकत्वादिति वाक्यस्थैवकारेणास्माभिरु
क्तभावेन प्राक्निराकृतं इदानीं तद्गतहेत्वंतरमाह मोक्षेति प्रमाव्याप्तं प्रमाणमिति तार्किकाः संगिरंते
मनस्य न प्रमाव्याप्तं तस्योपलब्धिमात्रहेतुत्वात् ततो व्यभिचारिमनसो नात्मसाक्षात्कारकरणत्वं नत्वेवात्त
ज्जन्यसाक्षात्कारो भ्रमः स्यात् नचैतद्युज्यते सविलासाज्ञाननिवर्तकत्वात् नहि भ्रमोऽज्ञानं निवर्तयत्यति
प्रसंगादित्यर्थः ननु यदि मनोमात्रं चेदात्मसाक्षात्कारं जनयेत्तदा स्यादेव तत्र भ्रमत्वाशंका नचैवं तत्त्वमस्या
दिवाक्यजन्यज्ञानसंततिसहायं हि मनस्तत्साक्षात्कारकरणं तथा च मूलप्रमाणशब्दसंवादादप्र
प्रामाण्यशंकानिरास इति मतं निषेधति नचेति॥ ॐ नमः कमलदलविपुलनयनाभिरामाय॥ ॥

श्राद्धज्ञानेनेति विशेषणस्य प्रयोजनमाह नचेत्यादिना आगमार्थकृतिविरोधमाशङ्क्य निराचष्टे नचेति किमेतदेकदे
शिनां चोद्यं वृत्तिस्थितस्यचेतिनाथ इत्याह आगमेति द्वितीयपक्षे हेतुरयमिति तदेवं मनस आत्मसाक्षात्कारकरणस्य सत्वा
न्नतदभाव इति एकदेशिनामहापूर्वपक्षोनिरस्तो संप्रत्ति परमसिद्धान्त्येकदेशिमतं निषेधप्रतिजानीते तत्रेति ननु दृष्टपते
न यथा वुत्थामनसैवेदमाप्तव्यमित्यादिश्रुतेरुक्तप्रकोष्ठमनसस्तत्त्रकरणत्वं युज्यते तत्कथं त्वयानिषिध्यत इत्यत आकि
ञ्चानत्वे हेतुमाह आगमेष्वेवेति उक्तार्थकानि वृन्त्यर्थमेवकारः अयमत्राशयः मनस आत्मसाक्षात्कारकरणत्वं ॥
यत्कल्प्यते तत्किं क्वचिच्चक्षुर्ज्ञानेनान्यगसाक्षात्कारेकरणत्वं दृष्टमिति श्रुत्वात्मसाक्षात्कारेपि लाघवात्त
दस्तित्युच्यते किंवा श्रुतिमात्रबलात् नाद्यः नद्वितीयः निरूपणात् तथाहि तत्रावद्वाह्यर्थे प्रत्ययोत्पत्तौ मनः करणं ।

नचभावनाधीनसाक्षात्कारस्य मनःपुत्रसाक्षात्कारवद्प्रामाण्य शाब्दप्रमाणमूलत्वे तविश्वासात् नचयतो
वाचो निवर्तन्ते अप्राप्य मनसा सहेति श्रुतिविरोधः आगंभ्यत्वेपितुल्यत्वात् तस्यवाक्यस्य लौकिकशब्दवैदि
कसंस्कारासंस्कृतमनोग्राह्यत्वनिषेधपरत्वात् तत्र आगमेष्पेयात्मन्यपरोक्षज्ञानजनकत्वात् तंत्वौ
पनिषदं पुरुषं पृच्छामीति श्रुतावात्मन्यवौपनिषदत्वविशेषणात् ॥ नमः कमलदलविपुलदलनय

नस्य वहिरस्वातन्त्र्यात् नाप्यन्तरङ्गः रवादिसाक्षात्कारे तस्य साक्षिमात्रवेद्यत्वात् नाप्यात्मसाक्षात्कारे तस्येदानी
तस्येदानीं विचार्यमाणत्वात् सोपाधिकात्मसाक्षात्कारे मनः करणत्वेन दृष्टमिति चेत् न उपाधिरत्र मनः क
रणं वा नाद्यः सुषुप्तावज्ञानोपाधिकआत्मनि साक्षात्कारेनस्यात् मनसस्तत्रासत्वात् न द्वितीयः आत्मा
श्रयात् आत्मनि साक्षात्कारायमनः प्रवृत्तावुपाधित्वेन स्वस्यैवापेक्षणात् अंतः कार्यमेवोपाधिरितिचे
न्न तत्राप्यंशतः आत्माश्रयात् अंतष्करणोपलक्षितत्वस्य विशेषणत्वोपलक्षणत्वाभ्यां निरूपणात् ना
पि श्रुतिमात्रबलात् श्रुतेः सहकारितामात्रपरत्वेन करणत्वाप्रतिपादकत्वादिति आत्मसाक्षात्कारेति
श्रुतेः करणत्वश्रौतलिंगमुदाहरन्ति तत्त्विति ॥ ॥ ॥ ॥ ॥ ॥ ॥

ततो नात्मसाक्षात्कारः श्रुतिजन्य इति स्थितं नन्वात्मसाक्षात्कारेणैव प्रयोजनं स यतः कुतश्चिज्जायतां श्रव
समानं च परोक्षमात्मज्ञानं मपरोक्षतया सम्पद्यते तथा च तादृक्ज्ञानाभ्यास एवात्मसाक्षात्कारहेतुरिति येमतं
तेतनन्मनं दूषयति नचेति तथाऽदर्शनात् परोक्षज्ञानाभ्यासस्यापरोक्षज्ञानजनकत्वादर्शनादित्यर्थः किंचा
यं ज्ञानं यथा नापरोक्षप्रत्ययमाधत्ते शाब्दत्वात् तथोत्तरज्ञानसंतानोऽपि न तदाधास्यति शाब्दत्वाविशेषादिति हे
त्वन्तरमाह उत्तरोत्तरेति अपिशब्दो हेत्वन्तरद्योतकः ननु किं साक्षात्कारककरणविचारेण साक्षात्कारस्यानिः
प्रयोजनत्वेनास्माभिरप्युपेक्षणीयत्वादित्येतन्नेत्याह नचेति नायं सर्प इत्याप्तवाक्यजन्यापरोक्षज्ञानादपि
भयकंपादिनिवृत्तेर्दर्शनात् किमपरोक्षज्ञानेनेति शंकितुरभिप्रायः अपरोक्षेति दिङ्मोहादेः सत्यपि

नच परोक्षमपि ज्ञानमभ्यस्यमानमपरोक्षं भवतीति युक्तं अनुमित्यादौ तथादर्शनात् उत्तरो
त्तरज्ञानस्यापि शाब्दत्वाविशेषात् नच मास्तु परोक्षज्ञानं अपरोक्षभ्रमस्याज्ञानतत्कार्यस्यानुच्छेदप्रसं
गात् तस्मान्नास्त्येवात्मन्यऽपरोक्षज्ञानं अत्रवदंति श्रवणाद्यभ्यासजनितशाब्दज्ञानसमुद्भू
तभावनाप्रचयमचिवमंतःकरणमेवात्म

परोक्षज्ञानिभ्रमानुच्छेदवदत्राप्यहंकर्ता भोक्तेत्याद्यपरोक्ष
भ्रमस्य विनात्मसाक्षात्कारमनुच्छेदः स्यादित्यर्थः नायं सर्प इति वाक्यादप्यपरोक्षमेव ज्ञानं जायते इत्यस्य दृष्टांतः
एवं पूर्वपक्षिसिद्धांतिमते साक्षात्कारस्यापेक्षणीयत्वे परोक्षत्वस्य स्वयं करणनिरूपणेन सामग्र्यभावे
फलाभावादिति न्यायेनार्थात्प्राप्तमात्मसाक्षात्काराभावमुपसंहरति तस्मादिति पूर्वपक्षानुभावेनैक
देशिमतेन समाधत्ते अत्रेति नतावत्करणाभावात्तदभावः अंतःकरणस्य तत्र करणत्वादित्याह श्र
वणादित्यादिना ननु नांतःकरणं तत्र करणं सत्यपि तस्मिन्नविवेकिनां ब्रह्मात्मसाक्षात्कारादर्शनादि
ति तत्राह भावेनेति यथा केवलस्य चक्षुषः प्रत्यभिज्ञाहेतुत्वाभावेऽपि पूर्वानुभवसंस्कारवासितं तत्तदे
कं प्रत्यभिज्ञाहेतु[illegible]रेवं केवलमनः श्रुत्यात्मसाक्षात्काराजनकमपि भावनाविशिष्टं तज्जनकं स्यादे
[illegible] भावना[illegible] विचारप्रयोजनकानुभवं भावनीयमिति अत्र [illegible]

ॐ

वे॰ मु॰ टी॰
६४

तस्य परमत्वमुपपादयति नचततइति आत्मलाभान्नपरंविद्यते आत्मकाम आप्तकाम इत्यादिश्रुतिसिद्ध
मर्थं हेतुत्वेनाह सर्वेषामिति आगमात्साक्षात्कृतेत्युक्तमुपश्रुत्यनन्तरं सहमानः शंकते नन्विति आत्मसाक्षा
त्कारोनशाब्दजन्यः साक्षात्कारत्वात् घटादिसाक्षात्कारवदित्यर्थः अत्र विपक्षे बाधकं वदन् पूर्वप्रतिज्ञायां
हेतुमाह इंद्रियजन्यस्येति ननुजन्यसाक्षात्कारत्वे इंद्रियकरणकत्वं नप्रयोजकं दशमस्त्वमसीति वाक्यजन्यसाक्षा
त्कारस्यापि दर्शनादितिशंकांपराकर्तुमेवकारः तत्रापि नशब्दो दशमसाक्षात्कारसाधनं किंतु शरी
रेंद्रियसन्निकर्ष इति इंद्रियजन्यत्वमेव साक्षात्कारे प्रयोजकमित्यर्थः नन्वयव्यतिरेकयोरुभयत्रापि तुल्य
त्वात् कथमिंद्रियमेव दशमसाक्षात्कारे हेतुर्न शब्द इति तत्राह शब्दस्यचेति तत्स्वाभाव्यंचापरोक्षज्ञान

नचततः परं कामयितव्यमस्ति सर्वेषांकामानामात्मप्राप्तिसीमत्वात् नन्वात्मसाक्षात्कारः श्रुतिज
न्यः कथं स्यात् इंद्रियजन्यस्यैव ज्ञानस्य साक्षात्कारत्वात् शब्दस्य च परोक्षज्ञानजनकत्वमेव युक्तमि
ति सांप्रतं कारणस्वभावस्यान्यथाकर्तुमशक्यत्वात् अपरोक्षयोग्येपि वह्न्यादौ शब्दादिना परोक्ष
ज्ञानस्यैव जननाच्च ॥ ४२ स्वाभाव्यात् नचापरोक्षे आत्मनि शब्दस्याप्यपरोक्षज्ञानजन [illegible]

हेतुत्वेनक्वाप्यदर्शनादिति इंद्रियस्यचापरोक्षज्ञानजनकत्वस्वाभाव्यंसमुच्चेतुंचशब्दः तथाचशब्दस्वभावा
देवनतत्रशब्दस्यकरणत्वंकिंत्विंद्रियस्यैवेतिभावः ननुवेदवाक्यप्रमाणेनतदास्याद्यादि यादृशआत्मातदा
कारंज्ञानंजनयेत् आत्माचापरोक्षः तदपरोक्षात्मसाक्षात्कारः श्रुतिजन्यइति अन्वयंदूषयति नचेत्या
दिना नचसांप्रतमित्यन्वयः तत्रहेतुः करणेति प्रमेयस्वभावापेक्षयास्वस्वभावस्याभ्यर्हितत्वात्तदन्यथाक
रणमशक्यत्वात् अयुक्तमित्यर्थः किंचब्रह्मणोपरोक्षत्वमात्रेणतद्विषयकज्ञानस्यापरोक्षत्वंनयु
क्तं अपरोक्षवह्न्यादिविषयशाब्दज्ञानस्यपरोक्षस्यैवोभयसंमतत्वादिति हेत्वंतरमाह अपरोक्षयोग्येपीति ॥

अज्ञानकृतविशेषमुपपाद्य ज्ञानकृतं तमुपपादयन्ति विद्वांस्त्विति पूर्वविशेषादेतस्य विशेषस्य व्यावर्त्तनाय तु शब्दः विद्वांस्तु पुरुषार्थरूपो भवतीत्यन्वयः पुरुषार्थत्वरूपमाह परिपूर्णानन्देति परिपूर्णत्वमुपपादयन्ति देशकालेति त स्य पुरुषार्थत्वप्रयोजकाभानहेतुज्ञानाभावमाह अज्ञानं बाधितत्वेति अज्ञानस्वरूपेणास्तदपि नानर्थाय सुषुप्तावि दर्शनादिति तत्राह कार्यं चेति बाधितत्वेति पदेनान्वयाय च शब्दः बाधितत्वाज्ञानं तत्कार्यं च कालत्रयेऽप्यात्मनि नास्त इति निश्चित्य पुरुषार्थो भवतीत्यन्वयः स्वात्मभाने नहि कथं भासकाभावादिति तत्राह स्वमहिम्नेति स्वप्रका शतयेत्यर्थः अज्ञानस्य कार्यस्य निवर्त्तने हेतुमाह अशेषेति सप्रवृत्तिनिवृत्तिसाधनमाह आत्मानं साक्षात्कृत्येति साक्षात्करणे हेतुमाह आगमेति एतेन श्रवणादिप्रवृत्तिवैयर्थ्यं परिहृतं स्वग्राह्यत्वं महावाक्यस्य निषेधति आचार्ये ति तस्याप्तत्वद्योतनाय विद्वदनुभवं संवादयन्ति स्वानुभवेति पदार्थज्ञानपूर्वकं वाक्यार्थज्ञानमिति निदर्शनाय तत्त्व

विद्वांस्तु तद्विरुद्धाकर्तृभोक्तृसंसारि जरामरणजन्मादिशून्यस्वप्रकाशसच्चिदानन्दपरिपूर्णस्वभावाशामाया यतीतास्थूलानणुनेति नेति सत्यज्ञानादिलक्षणं सर्वजगदधिष्ठानभूतमात्मानमागमाचार्यस्वानुभ वैकवाक्यतया साक्षात्कृत्याशेषदुःखनिदानमज्ञानं तत्कार्यं च बाधित्वा देशकालवस्तुपरिच्छेदशून्यपरि (पूर्णानन्दविग्रहः स्वमहिमप्रतिष्ठितः परमपुरुषार्थरूपो

दवाच्यमात्मस्वरूपमाह सर्वजगदिति अज्ञानवशात्स र्वजगदधिष्ठानत्वेन संपन्नमित्यर्थः इदानीं वास्तवमात्मनो लक्षणस्वरूपमाह नहि रुद्धेत्यादिना पूर्वोक्तक र्तृत्वादिपरामर्शार्थस्तच्छब्दः अत एवाह अकर्त्रित्यादिना अकर्त्रिति नैयायिकमतव्युदासः अभोक्तेति सांख्यस्य जरादिशून्यमिति देहात्मवादस्य स्वप्रकाशेति मीमांसकस्य सदिति साध्यमिति कस्य एवमितरपक्षेषु दृष्टेषु स्वमतमाह परिपूर्णेति तस्य पुरुषार्थत्वमुपपादयन्ति आनन्देति एतस्योपाधिकत्वं पराचष्टे स्वभावेति सर्व त्र हेतुसूचनाय पुनर्विशिनष्टि अप्राणनाद्यादीत्यादिना अकर्तृभोक्तृत्वे चासंसारित्वे हेतुः अप्राणनाद्यादीनिरासे देहात्मवादनि रासे हेतुः अस्थूलेति सद्रूपत्वे हेतुः सत्येति स्वप्रकाशत्वे हेतुः ज्ञानेति सुखरूपत्वे परिपूर्णत्वे च नित्यं विज्ञानमा नन्दमित्यादि हेतुसंग्रहार्थमादिपदम् ॥

एतेनकुष्ठाद्युपहतानांदुःखाऽसंस्पृष्टसुखान्मकामनयादेहत्यागरूपमरणोपहत्तुपपादनेनप्रयागादितीर्थम
रणप्रवृत्तिरपिव्याख्याता तत्रापिदुःखासंस्पृष्टसुखार्थितयैवदेहत्यागरूपमरणेप्रवृत्तिनीतस्तत्यागरूपदु
त्वाद एतेनेति ननुतथाप्यात्मानपुरुषार्थः मुक्तसंसारिणोरात्मनस्तुल्यत्वेनाविशेषप्रसक्तेर्मु
मुक्षोः ब्रह्मचर्याद्याश्रमेषुमुक्तिसाधनेषुप्रवृत्तिर्नस्यादितिप्राप्ते आत्मनएवेति यद्यप्यात्मामु
क्तसंसारिणोरविशिष्टएव तथापिस्वरूपसन्नसपुरुषार्थः किंतुस्वस्वरूपेणसाक्षात्कृतःज्ञा
तस्यैवनिधयादेःपुरुषार्थत्वस्यलोकेदर्शनात् नचसंसार्यात्मस्वरूपंवेत्तिविद्वांस्तुतद्वेत्तीतिविद्वां
संप्रत्येवतस्यपुरुषार्थत्वंनान्यंप्रतीतिनमुक्तसंसारिणोरविशेषप्रसक्तिरितिपरिहरतिनेत्यादिना न

एतेनकाम्यतीर्थादौमरणंव्याख्यातं मरणस्यापिदेहपरित्यागरूपत्वात् आत्मनएवपुरुषा
र्थत्वेमुक्तसंसारिणोरविशेषापत्तिरितिचेन्नज्ञानाज्ञानाभ्यांविशेषात् अज्ञानीहिभ्रांतःकर्ता
भोक्तासंसारीजरामरणधर्मा इत्येवमात्मानंजानाति॥ ॥

चात्मानंसर्वोपिवेत्तितत्कथंज्ञानाज्ञानकृतोविशेषइतितत्राह अज्ञानी हीति अज्ञानीहियतःइत्ये
वमात्मानंजानातितस्मादस्तिविशेषइत्यर्थःहेतोनान्वयः ननुसुखाद्यात्मास्वप्रकाशः कथंनसंसा
रिणःपरिस्फुरति अज्ञानेनतदंतस्यावृतत्वादित्याह अज्ञानीति अज्ञानस्याश्रयविषयैकस्योपपादि
तत्वादज्ञान्याअज्ञानविषयइत्यर्थः तर्हिसुखात्मकत्वमेवनभयात् विपरीतकर्तृत्वाद्यात्मनः कुतोभा
नंतत्राह भ्रांतइति अज्ञानवशादकर्त्राद्यात्मकर्तृत्वादिनाप्रतीयते किमज्ञानस्यदुष्करमितिन्यायादित्यर्थः
अज्ञानावस्थायांयथात्मैनात्मनोस्फुरणंतन्तमुक्तत्वमितिभावः॥ ॥ ॥ ॥ ॥

नन्वात्मा चेत्सुखैकमूर्त्तिस्तर्हि वैषयिकं सुखमपुरुषार्थः स्यात् हि सुखस्य सुखं पुरुषार्थोऽकाम्यमानत्वादिति पूर्वोक्तं स्मारयति यत्विति तत्वं सांसारिकसुखमपुरुषार्थ इति तर्ह्यात्मसुखमपि पुरुषार्थो न भवेत् सुखत्वाविशेषादिति तत्राह तस्येति यत्तु वादी सुखस्य सुखं पुरुषार्थो न भवतीति ब्रूते तस्य वादिनो मते सांसारिके सुखेऽभिव्यंजकस्य प्रयागादिविशिष्टेनुपादेयत्वे सुखत्वेन प्रयोजकं येनात्मसुखमपुरुषार्थः स्यात् किंतु विशिष्टतयाऽधर्माद्यनात्मत्वं आत्मत्वस्यैव पुरुषार्थत्वप्रयोजकस्य व्यवस्थापितत्वादित्यर्थः यद्वा सुखे तस्यापुरुषार्थस्येत्यर्थः वैषयिकसुखेनुपादेयत्वमनात्मत्वारोपात् पुरुषार्थत्वे आत्मत्वं ते

त्वस्यैव प्रयोजकत्वादित्युक्तं तत्रात्मत्वं चेत्पुरुषार्थत्वप्रयोज

ग

ज्ञानारोपनिबंधनादिति पाठांतरम् =१

यत्तु सुखस्य सुखं न पुरुषार्थ इति तस्य सुखेऽनात्मत्वारोपनिबंधनत्वात् न च कुष्ठाद्युपहतानां मरणानुपपत्तिः ततः एवात्मनः सुखस्वरूपत्वसिद्धेः नो हि मराम [illegible] आत्मा निदुःखकारणं देह इति तमुपेक्षन्ते न त्वात्मानं पारलौकिके सुखे कामदर्शनात् ॥ ॥ ॥

त्वादित्युक्तं तत्रात्मत्वं चेत्पुरुषार्थत्वप्रयोजकमिति यदुक्तं तत्परिहरति न चेति कुष्ठाद्युपहतानां मरणे प्रवृत्तानामपि नात्मत्यागे प्रवृत्तिर्मरणस्य देहत्यागरूपत्वात् कुष्ठाद्युपहतदेहस्य च सुखात्मनि दुःखहेतुदेहत्यागे न त्यागप्रवृ[illegible]र्नावोचितत्वात् केवलसुखात्मैव परलोके स्यामित्याद्युद्देशपदेहत्यागे प्रवर्त्तन्ते नात्मत्यागे अन्यथा तस्य नत्यक्तत्वात् दुःखाभावोपि कस्य स्यात् तस्मान्न तत्रात्मत्याग इति न चेति प्रतिज्ञार्थे हेतुमाह तत एवेति तेषां मरणे प्रवृत्तेरेवेत्यर्थः आत्मानुपेक्षार्थे हेतुः पारलौकिकेति ॥

ततश्चात्मत्यागे दुःखाभावमुद्दिश्य कुष्ठाद्युपहतानां प्रवृत्तिर्न स्यात् इष्यते च प्रवृत्तिस्तस्मादात्मत्वेन पुरुषार्थत्वप्रयोजकत्वम् इति ·

३

वे. सु. टी. एवं चात्मन एव पुरुषार्थत्वे सांसारिकसुखपरित्यागेनात्ममात्रोद्देशेन

एवं चात्मन एव पुरुषार्थत्वे सांसारिकसुखपरित्यागेनात्ममात्रोद्देशेन मुमुक्षूणां प्रवर्तमानानां लोकोत्तरत्वोपा
लंभः परास्त इत्याह नचेति लोकोत्तरत्वं चासिद्धं लौकिकैर्देवव्यासादिभिरेतस्यार्थस्यानुष्ठितत्वादिति
हेत्वंतरमाह महानुभावैरिति यच्चात्यंतानुमुमुक्षूणां श्रवणाद्यनुष्ठानं तेषां भ्रांतत्वं ज्योतिष्टोमादिकृति
मू॰ मूलाऽभिमतसुखसाधनयागाद्यनुष्ठानं रागवत्कुलेन तेषामनुग्रहस्यान्यथात्वाज्जद्विरोधिः श्रवणा
दिकृतीनां तु मत्याचार्यत्वादिस्त्र कं दूषयितुमनुवदति नचेति ज्योतिष्टोमादिकृतिनान्यथानभिज्ञत
यातेषां यथार्थज्ञानाभावेन भ्रांतत्वात् श्रवणादिविधितात्पर्यज्ञानवतामल्पानामपि प्रामाणिक
त्वान्मुमुक्षवो न भ्रांता इति दृष्टांतमात्रेणाह देहात्मेति तदभावाद्वक्त्रनुग्रहन्यायाभावादित्यर्थः यदपि

नचलोकोत्तरत्वोपालंभः महानुभावैर्देवव्यासवसिष्ठादिभिर्महाराजैश्च ऋषभादिभिरैहिका
मुष्मिकसकलसुखतत्साधनस्यात्मविपर्ययेणोपेक्षितत्वात् नचवक्त्रनुग्रहान्यायः देहात्मा
भिमानेन तदभावात् नचसुखरूपत्वेप्यात्मनः स्वसंबंधिसुखाभावादपुरुषार्थत्वं संबंधस्याप्या
भेदोद्देशकत्वात् सुखं स्वत्वेनमुपादेयं कथंमेप्रियतमश्चात्मन्यभेदेनश्च विशेषादिति कामयमा
नोभेदभ्रमस्य प्राबल्यादभेदं कर्तुमशक्नुवानः संबंधमात्रेणासंतुष्यति नचसंबंधः स्वतः पुरु
(पुरुषार्थः सुखदुःखाभावेतरत्वात्।।

पूर्वपक्षोक्तं सुखमात्रं स्वतंत्रं न पुरुषार्थ इत्यादि तद्दूषयति
नचेति सत्यं स्वसंबंधिसुखमुपादेयमिति तर्हि कथं स्वतंत्रसुखमुपादेयमिति तर्हि कथं स्वतंत्रं सुखमुपादेय
मिति आत्मनि सुखसंबंधमुद्दिश्य तत्सुखतादात्म्यस्यैवात्ममात्रत्वादिति हेतुमाह संबंधस्येति
इमं मे चार्थस्पृहयति सुखमिति संबंधापेक्षया तादात्म्यस्यांतरंगत्वद्योतनार्थः हि शब्दः कथं तर्हि लो
कः संबंधमात्रेणातुष्यति नह्यन्यदिच्छति अन्येन च तुष्यति अतिप्रसंगादित्याशंक्याह भेदभ्रम
स्येति सुखालाभेऽलेपि साधकत्वदर्शनादिभावः ननु किमनया गुर्व्या कल्पनया सुखसंबंध एव सा
कात्पुरुषार्थः किं न स्यादित्याशंक्य सुखाद्यन्यत्वान्न स्वसुखं पुरुषार्थः इति परिहरंति नचेत्यादिना

अज्ञानादात्मतादात्म्येन कल्पिते देहादेः सत्त्वाधिकरण
द्वितीये ज्ञानावस्थायां मात्मस्वरूपस्य च अविद्यावृत्तत्वेनास्फुरणात् । ... किंचापि सुखं गुणः आत्मा
तयाभेदेनैव प्रतीतेः भेदप्रतिपादनायोगादित्याह अविदुष इति एतेन भेदप्रतीतिविरोधः परास्तः । आत एवेति ननूक्तयुक्त्या सुखजन्य
गुणानित्यात्मनि ज्ञानवशादेव वदन्ति न वस्तुतः निर्गुणत्वश्रुतिविरोधादित्याह आत एवेति ननु तज्जन्यत्वप्रतीतिरसुखाद्युत्ववशा दुःखात्मस्वरू
तिः त्यादिप्रतीतेरन्यथोपपत्त्यात्मनः सुखरूपत्वे दुःखरूपत्वापि स्यात् तज्जन्यत्वप्रतीतिरसमत्वादित्यति प्रसंगं शंकित्वा दूषयति नचेति दुः
याभिव्यंजकत्वस्तुत्यादनेनान्यथासिद्धेरित्यादियुक्तेः समत्वादित्यति प्रसंगं शंकित्वा दूषयति नचेति दुः खस्येति किंच न युक्तिमात्रे
खस्याव्यभिचारित्वेनाव्यभिचार्यात्मस्वरूपत्वभावनायोग्यत्वादि नि हेतुमाह

दुःखस्य

अविदुषस्त्वध्यस्ताहंकारदेहादावेवात्माभिमानात् तत्र चात्मन उपसर्जनतयैव स्फुरणात् अत एवाज्ञान
सुखादिगुणा आत्मेति नार्किकाभ्रान्ताः न च दुःखेऽपीयं गतिः समा ... सुषुप्त्यादौ व्यभिचारित्वेन
तस्य स्वरूपत्वानुपपत्तेः प्रमाणाभावाच्च सुखात्मकत्वग्राहकश्रुतिविरोधाच्च तथा चात्मत्वमेव परं
मपुरुषार्थत्वाप्रयोजकं

वत्त्वसाधकं किंतु प्रमाणाम्लानि न चात्र प्रमाणमस्तीति हेत्वंतरमाह प्रमाणेति न केवलं मूलप्रमा
णाभावाद्युक्तेराभासत्वं किंतु प्रेयोविनादित्यादिश्रुतिविरोधादपीत्याह सुखेति ननु न सुखत्वं पुरुषार्थ
त्वप्रयोजकं दुःखाभावे व्यभिचारात् नापि दुःखाभावत्वं सुखे व्यभिचारात् नोभयं गौरवात् पुरुषार्थ
प्रावस्थानेकार्थत्वप्रसंगाच्च ततः कथमुभयं पुरुषार्थ इति चेन्न आत्मीयत्वस्यैव तत्त्वप्रयोजकत्वात् तस्य चो
त्रा॰ भयानुगतत्वादित्याह तथा चेति सुखदुःखाभावात्मकत्वे सतीति इत्यर्थः एवं च सत्यनुपादेयत्वानुमा
नेबाधोन्नीतः पक्षेतरत्वमुपाधिरित्यपि सूचितमित्यपि बोधव्यम् ॥ न॰ ॥ ॥ ॥ ॥

ॐ

वे॰मु॰टी॰ ननु दुःखाभावो न पुरुषार्थः असत्यपि तस्मिन् सत्यपि दुःखपाकादौ भोजनजन्यसुखलोभेन प्रवृत्तिदर्शनात् इति ...

ॐ

वे.मु.टी. ६१

ननु दुःखाभावो न पुरुषार्थः असत्यपि तस्मिन् सत्यपि दुःखपाकादौ भोजनजन्यसुखलोभेन प्रवृत्तिदर्शनात् इति शंक
ते दुःखाभावोपीति दुःखाभावत्वेन पुरुषार्थत्वप्रयोजकं सुखे व्यभिचारात् अन्यूनानतिरिक्तवृत्तेरेव प्रयोजकत्वादि
त्यतो नायं केवलशब्दः ननु दुःखाभावः किं पुरुषार्थ एव न भवतीति ब्रूषे उत सुखमपि पुरुषार्थ इति नाद्य इति परि
हरति नेति दुःखाभावबुद्धिरूपाशिष्टप्रवृत्तेस्सोपि पुरुषार्थ इत्यर्थः अथ सुखमपि पुरुषार्थ इति तर्हि तद्रूपतापि आ
त्मनि सुखसंपाद्येति सर्वथाप्यात्मा पुरुषार्थ इत्याह आत्मन एवेति ननु सुखं गुण इति वैशेषिकादयस्तत्क
थं रूपमस्यात्मनः स्वरूपमिति तत्राह नचेति सुखरूपत्वं प्राक् निरूपितं स्मारयन् हेतुमाह परमेति हेतुसाध्य
योर्व्यतिरेकव्याप्तिमाह असुखात्मेति न चात्मा न सुखं जन्यत्वाद्व्यतिरेके सुखवदिति पूर्वोक्तं दूषयितुं।

1.05

दुःखाभावोपि न केवलः पुरुषार्थः दृष्टदुःखेपि विषये भोग्यसुखलोभेन प्रवृत्तिदर्शनादिति चेन्न आत्म
न एव परमानंदरूपत्वेन सुखस्यापि सत्वात् न चात्र विप्रतिपत्तिः परमप्रेमास्पदत्वेन सुखरूपत्वस्य सिद्ध
त्वात् असुखात्मनि प्रेमादर्शनात् न च सुखे जन्यत्वात् जन्याजन्ययोरात्मसुखयोरभेदानुपपत्तिः जन्य
त्वासिद्धेः न च सुखं मे जातमिति प्रतीत्या तत्सिद्धिः शुभादृष्टवशादात्मस्वरूपसुखाभिव्यंजनयोग्या
न्तःकरणवृत्त्युदयेनाप्यथा नान्यथासिद्धेः न चाहं सुखमिति प्रतीत्यापत्तिः विद्वत्प्रतिज्ञापादनात्॥

जन्यत्वाभावो नास्ति=२

स्मारयति नचेति व्यतिरेकव्याप्तिभूमौ साध्याभावसत्वेपि हेत्वाभावासत्वेन व्याप्यत्वासिद्ध्या दूषयति जन्यत्वेति
यत्तु पूर्वपक्षे सुखे जन्यत्वसिद्धये प्रतीतिरुपन्यस्ता तामन्यथा स्थापयितुमाह नचेति प्रतीतेः सुखाभिव्यंजको
त्पत्तिविषयत्वेनान्यथासिद्धेः न सुखस्योत्पत्तिसिद्धिरिति नचेति प्रतिज्ञायां हेतुमाह शुभेति य
द्यात्मनः सुखाभेदः अहं सुखमिति प्रतीतिः स्यात् सा चेयमस्ति भेदप्रतीतेरेव विरोधिन्याः सत्वादिति पूर्वोक्तं
दूषयति नचेति सुखात्मनोस्तादात्म्यप्रतीतिरपि तादात्म्यावगाहिनी स्यादिति यदापादनं तत्किं विदुषः प्रत्य
विदुषः प्रति वा आद्य इष्टापत्तिरिति नेति प्रतिज्ञायां हेतुमाह विद्वांसमिति॥ ॥ ॥ ॥ ॥

शिव. ६१

ननु संसारनिवृत्तिः पुरुषार्थो न केवलं दुःखनिवृत्तिरिति तत्राह तस्येति एकविंशतिप्रकारदुःखनिवृत्तिः पुरुषार्थः
संसारोऽप्येतदात्मेत्यविरोध इति नन्वात्मैव चेत् दुःखाभावस्तर्ह्यात्मनोऽकार्यतयाऽसाध्यत्वात् कथं पुरुषार्थतापु
रुषेणैतदेवार्थ्यते यदसिद्धमिति शंकते असाध्यत्वादिति साध्यत्वं न पुरुषार्थत्वे प्रयोजकं किं त्विष्टत्वादिति
त्परिहरति साध्यत्वेनेति निरस्तत्वाच्छास्त्रकारेणेति शेषः नन्वात्मरूपदुःखाभावस्यानादित्वेन स्वतःसिद्धत्वा
त्तदुत्पत्त्यर्थं तत्साधनाय मुमुक्षूणां प्रवृत्तिर्न स्यात् सिद्धस्य साधनायोगादिति शंकते स्वतःसिद्ध इति मोक्षोद्देशेन
श्रवणादौ मुमुक्षुः प्रवर्तत इत्युच्यते किं वा ब्रह्मात्मसाक्षात्कारोद्देशेन वा नाद्यः श्रवणादेः साक्षान्मुक्तिहे
तुत्वे प्रमाणाभावादित्याह नेति द्वितीयेऽपि स साक्षात्कारः सिद्धो न वा आद्य आह ब्रह्मेति द्वितीयं प्रत्याचष्टे पूर्वमिति

तस्याशेषसंसारदुःखनिवृत्तिरूपत्वात् असाध्यत्वादात्मनोऽपुरुषार्थत्वमिति चेत् न साध्यत्वेन पुरुषार्थत्वस्य
निरस्तत्वात् स्वतःसिद्धदुःखाभावमुद्दिश्य मुमुक्षुप्रवृत्त्यनुपपत्तिरिति चेन्न ब्रह्मात्मसाक्षात्कारानन्तरं प्रवृ
त्त्यनुपपत्तेरिष्टत्वात् तत्पूर्वं तस्य चाज्ञातत्वात् पूर्वं तत्र पोढदुःखाभावरूपब्रह्मात्मनो साक्षात्कारेणैव सफल
त्वात् ज्ञानमपि न साध्यं वृत्तेरारोपितत्वात् चैतन्यस्यानित्यत्वादिति चेन्न अस्यापरोक्षवृत्त्यज्ञानेतरकालीनत्वा ॥१८

आत्मसाक्षात्कारेण मुमुक्षुप्रवृत्तिः फलवतीत्युक्तं तदसत् साक्षात्कारो वृत्तिर्वा स्वरूपचैतन्यं वा नाद्यः वृत्तेरारोपित
त्वेन मिथ्यात्वात् फलत्वानुपपत्तेः सत्यत्वे द्वैतापत्तेः न द्वितीयः तस्याजन्यत्वेनाफलत्वादिति शंकते ज्ञानम
पीति आत्मस्वरूपवदित्यपेरर्थः वृत्तेर्मिथ्यात्वज्ञानं बाधोत्तरकालं वा बाधात् प्राग्वा नान्त्य इत्याह नेति अप्रामा
ण्यस्य परतस्त्वाद्विना बाधं मिथ्यात्वस्य ग्रहीतुमशक्यत्वादित्यर्थः द्वितीये नानिष्टमित्याह अस्येति नहि वृत्तिः
स्वतः फलं किं त्वज्ञाननिवर्तकतया तच्चाज्ञाननिवर्तकत्वं मिथ्यात्वग्रहात्प्रागेव सिद्धमिति पश्चान्मिथ्यात्वग्र
होऽनुपयोगीत्यर्थः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

परिहरति अज्ञानेति स्वात्मनि दुःखौघमारोपयन्तीति संबंधः ननूक्तं सादृश्यं नास्तीति सत्यं किं सादृश्ये
नारोपव्यभिचारिणा कुत्र तर्हि दोषाद्यारोप इति अज्ञानादिति गृहाण। ननु ज्ञानमात्रं चेत् दुःखारोपे साधारणं कार
णं सुषुप्तेपि तर्हि दुःखारोपः स्यादिति चेन्न शरीरादिद्वारा तद्धेतुत्वात् इत्याह फणिफणेति उदासीनावस्थां
व्यावर्त्तयति रागेति प्रतिबद्धस्वात्मदृष्टित्वेन विशेषादर्शनमुपपादितं ननु यद्यत्र वस्तुतो नास्ति तत्तत्रा
रोपणीयं दुःखं च गुणत्वादात्मैकसमवेतमिति कथं तत्रैव तस्यारोप इति नेत्याह निर्दुःखेपीति दुःखात्यंता
भावाधिकरणेपीत्यर्थः गुणो भवत्वपि दुःखमनात्मनि समवेतं पादे मे दुःखमिति पादाद्याश्रयत्वेन प्रतीतेः अंतःक
रणधर्मत्वाद्वात्मनि तदत्यंताभावः केवलो निर्गुणश्चेति श्रुतिविरुद्धश्चात्मनि गुणसमवायः ततो निर्दुः
खत्वादात्मनि अज्ञानादिवशात् दुःखारोप इति युक्तमुक्तमिति अत एवाह आरोपयत्येव केवलमिति

अज्ञानफणिफणासमुद्भूतं देहाद्यभिमानविषं दंष्ट्राप्रवर्त्ति रागादिहलाहलविषज्वालाप्र
तिबद्धस्वात्मदृष्टिः सचित्तवित्तमोवत् निर्दुःखेपि स्वात्मनि रौरवाद्यनेकभेदभिन्ननरकव्रातसमु
द्भूतदुःखौघमारोपयत्येव केवलं आरोपितस्य चाभावो नाधिष्ठाना द्भिन्न इति निरिच्यते अधिष्ठानाद
भेदेनैवारोपितत्वात् भेदेन च तस्यासत्वात् असन्निषेधस्य च सत्वात् तस्मात् दुःखाभाव एव परमपुरुषा
र्थः ननु भवतु दुःखमारोपितं तथाप्यात्मानंदभाव एवेति यो मन्यते तस्याप्यात्मैव परमपुरुषार्थः॥ ॥ ॥

ति कुतस्तत्राह आरोपितस्य चेति आरोपितप्रतियोगिकाभावस्याधिष्ठानानतिरेके हेतुमाह अधिष्ठानेति अ
धिष्ठानमात्मकल्पितं न तावत्कल्प्यं तस्य स्वरूपत्वेनाकल्पितत्वात् किं रूपेण तर्हि जगतः कल्पितत्वमित्यापे
क्यात्मभिन्नमनात्मत्वं तद्रूपेण दुःखत्वादिनेत्यर्थः अस्तु सद्रूपात्मनो भेदेन दुःखाद्यारोपितं किं तत्तत्र
त्राह भेदेनेति सद्रूपादात्मनो भेदे सद्रूपं स्यादित्यर्थः अस्त्वसद्दुःखादि ततो किं तत्राह असन्नि
षेधस्येति अभावाभावस्य भावत्वादिति दुःखाभावः सद्रूप इत्यात्मा सदिति स्थितं ननु दुःखाभावात्मकत्वे
न पुरुषार्थत्वसाधने तत्त्वापसिद्धान्तः सुखात्मत्वरूपेणैव तस्य पुरुषार्थत्वादिति चेन्न मैवं न ष्टुष्यतु दुर्जन इ

ति न्यायादविरोधादिति शंकामुपसंहारव्याजेन परिहरति तस्मादिति॥

पूर्वपक्षेऽनुपादेयत्वस्यात्मनि साधनायतत्प्रतियोगित्वेनोपादेयत्वं यन्निरूपितं तत्तावदनुमोदते सत्यमिति तर्ह्यात्म
नुकूलमानेनानुपादेयत्वसिद्धमितिनेत्याह नत्वेति च त्वर्थे तत्तु अन्यानुपसर्जनत्वं विश्रान्तं अन्यादिदि[illegible]यतु खसाधनत्ता
वा सुखोपसर्जनं अहिकंटकादिपरिहारस्य दुःखाभावसाधनं सुखदुःखाभावयोश्चात्मा[illegible]वे सुखादिसाधन
जातमात्मन्येव विश्रान्तमित्यर्थः नहि कथं सुखादेः पुरुषार्थत्वव्यपदेश इति शंकामुपहारव्याजेन परिहरति तस्मा
दिति आत्मशेषत्वादेव सुखादेः पुरुषार्थत्वं न वस्तुत इति भावः अत एवाह परम इति एतेनानुपादेयत्वानुमाने
वाधितमिति भावो ध्वनितः ननु सुखाद्यधिकरणतयात्मनः सुखदुःखाभावो प्रतिकारकत्वात्सुखादिशेषत्व
मात्मनो युक्तं न वैपरीत्यमिति शंकितोऽनुपादेयानुमाने स्वरूपासिद्धिं दूषणांतरमाह सुखदुःखेति भेदे किं साधा

सत्यमितरानुपसर्जनत्वमुपादेयत्वं तच्चात्मन्येव विश्रान्तं सुखदुःखाभावयोरपि तदर्थत्वादन्यथापरस्य सुखदुः
खाभावयोरप्युपादेयता स्यात् तस्मादात्मैव परमपुरुषार्थः सुखदुःखाभावात्मकत्वाच्च न च भावरूपस्या
त्मनो दुःखाभावात्मकत्वानुपपत्तिर्भवेदयं दोषो यद्यात्मनि दुःखं पारमार्थिकं स्यान्न त्वेवमस्ति। किंतु॥

राधेयभावः न च सुखाद्यात्मनो भिद्यन्ते इति नात्मनात्मानतदुपसर्जनं न च सुखदुःखाभावात्मत्वे हेत्वात्मनि पदेव वर्त्तते
इत्यर्थः नन्वात्मा सर्वस्य सत्ताप्रदत्वात्स्वयमसद्रूपः कथं स्यादिति शंकितां परिहरति न चेति दुःखस्यात्मनि कल्पितत्वाद्दुः
खाभावो नात्मनो तिरिच्यते इति परिहरति भवेदयमिति ननु दुःखं गुणः तच्चावाधितत्वान्न कल्पितं किं चारोपे आ
रोप्याधिष्ठानयोः सादृश्यं कारणं दृष्टं न चात्र तदस्ति ॐ उभयोरपि निरवयवत्वात् किं चारोपसमयेऽधिष्ठा
नं विशेषतोऽज्ञातं वाच्यं न च दुःखप्रतीतिसमये आत्मा विशेषतो न ज्ञायते अहमित्येव तस्य विशेषप्रतीति
त्वात् तस्याप्यज्ञातत्वादिति कथं दुःखस्यात्मनि समारोप इति शंकते किंत्विति॥ ॥ ॥

५

वे॰सु॰टी॰ आत्मनोरतिप्रायसुखत्वेहेतुत्वान्तरमाह देहरागपगमेति नन्वात्मा सर्वपुमर्थानां सीमेति कथं हृदि परमेश्वरं

आत्मनो रतिप्रायसुखत्वे हेतुत्वेन तदमाह हैरण्यगर्भेति नन्वात्मा सर्वपुमर्थानां सीमेति कथं इन्द्रपदमैश्वर्यादि
ति स्मृतेरिन्द्रादिसंपद एव परमपुरुषार्थत्वादिति तत्राह यत्कामा इति मघवा प्रजापतौ ब्रह्मचर्यमुवासेति श्रु
तेरित्यर्थः ननु यद्यात्मैव पुरुषार्थः कथं तर्हि तत्सुखरूपस्वर्गार्थयागादिविधानमिति तत्राह यद्दिदृक्षेति तमे
तं वेदानुवचनेनेत्यादिश्रुतिवशादन्तःकरणशुद्धिद्वारा विहिता यागादिक्रिया आत्मदिदृक्षाफला एव न व
स्तुतः स्वर्गादिफलाः कथं तर्हि स्वर्गादीनां फलत्वेन श्रवणं अत्र प्ररोचनार्थत्वात् कथमन्यथा सर्वथाऽतः
सर्वज्ञो वेदः तत्त्वविदां पुरुषार्थं स्वर्गादिकमुद्दिश्य यागादीन् विदध्यात् तस्मादत्र प्ररोचनार्थमेव स्वर्गादि
श्रवणं न फलायेति न कश्चिद्विरोध इति ननु स्वर्गादि प्ररोचनार्थमित्ययुक्तं आत्मदिदृक्षाया अफलत्वात् या

यस्यानन्दसमुद्रस्य लेशमात्रं जगत्त्रयं प्रसक्तं ब्रह्मलोकादौ सुखाब्धिं कः परित्यजेत् हैरण्यगर्भमैश्वर्यं
यस्मिन् दृष्टे तृणायते सीमा सर्वपुमर्थानां अपुमर्थः कथं भवेत् ३२ यत्कामा ब्रह्मचर्यं ता इन्द्राद्याः
प्राप्तसंपदः स्वस्वभोगं त्यजन्तो वा सपुमर्थः कथं नृणाम् ३३ यद्दिदृक्षाफलाः सर्वा वैदिक्यो विविधाः क्रि
याः यागाद्याः विहितास्तस्मिन्नुपेक्षा वद तत् कथं ३४ यद्दृष्टिमात्रतः सर्वाः कामाद्याः दुःखभूमयः विन
श्यन्ति क्षणेनासावुपादेयः कथं न ते ३५ आह्लादरूपता यस्य सुषुप्तौ सर्वसाक्षिकी तन्नोपेक्षा भवेद्यस्य

यागादिफलं न तावदात्मा अजन्यत्वात् न तदनुभवः तस्याऽफलत्वात् न वा तद्दिदृक्षा तस्या ज्ञानमात्रफलत्वेन
स्वतोऽफलत्वात् तस्मात्स्वर्गादिरेव तात्पर्यतो वेदक्रियाफलमिति तत्राह यद्दृष्टीति यतो ज्ञानमज्ञाननि
वर्तकमिति ब्रह्मसाक्षात्कारादज्ञाने निरस्ते तत्त्वज्ञानमूला कामादिमयो दुःखभूमयो निवर्तन्त इति तन्नि
वृत्तेरात्मरूपत्वादात्मैव पुरुषार्थ इति प्ररोचनार्थमेव स्वर्गादिश्रवणमित्यर्थः मोदप्रमोदपदाभ्यामित्य
नात्मनः सुखरूपत्वे यौक्तं तस्य प्रियमेव शिर इत्यादिवाक्यानि प्रमाणत्वेनोपन्यस्य [illegible] सुप्तोत्थित
स सुखमहमस्वाप्समिति परामर्शसिद्धसुषुप्तिकालीनसुखानुभवोऽप्यात्मनः सुखरूपत्वे प्रमाणमित्या
ह आह्लादेति तत्र सुखाद्याविर्भावः

ननु कथमात्मनोऽन्यानुपसर्जनत्वं सर्वस्य सुखदुःखाभावशेषत्वादिति तत्राह यदर्थमिति यदा सर्वज्ञत्वादात्मार्थं आत्म
शेषत्वं दास्यत्वादेरात्मशेषत्वे किमु वक्तव्यमिति भावः तदुक्तं सर्वं च पुरुषार्थत्वादिति आत्मव्यतिरिक्तानां सर्वेषां पदार्था
नां परार्थत्वमिति वैशेषिकादयोऽपि च संगिरन्ते तस्मादात्मार्थं सकलं जगदित्यर्थः किं च सुखदुःखाभावात्मत्वे हेतुः स्व
रूपासिद्धः कथमिति चेत्तत्राह आनंदाब्धिरिति निरतिशयसुखात्मक इत्यर्थः दुःखाभावत्वमुपपादयति यत्रात्मेति
घटादीनामात्मास्वरूपं तद्भेदे घटादेर्दुर्निरूपत्वेनासत्त्वात् भिन्नस्यासत्तो भावः सदेवाभावस्वभावत्वात् सत्तस्यात्म
त्वादिति युक्त्यात्मैव दुःखाभाव इति कथं तत्रानुमाने स्वरूपासिद्धिरिति यच्छब्दो सविन्यस्तेन संबध्यते प्रथमपदार्थम

यदन्यद्वस्तु तत्सर्वं यद्भेदेन स्फुरेत् सत्तासर्वपदार्थानामनादेयकथं वद २७ यद्वशे प्राणिनः सर्वे ब्रह्माद्याः
क्रिमयस्तथा ईशानः सर्ववस्तूनामनादेयः कथं वदेत् २८ यश्चक्षुः सर्ववस्तूनां मनसो यन्मनो विदुः २९ य
द्रूपो निद्रूपो निर्संदेहो नोपादेयः कथं विभुः २९ मोदप्रमोदपक्षाभ्यां आनन्दात्मा नमो गतः जीवयत्यपि

पदार्थं च स्वस्वरूपस्य सर्वैरिष्यमाणत्वात् स एव पुरुषार्थ इति भावः द्वितीयपादं व्याचष्टे यद्वश इति अनादेयोऽनुपादे
य इत्यर्थः यद्धानन्त्वधिष्ठानं सत्तास्फूर्तिप्रदं नान्यत् ईश्वरस्याधिष्ठानं नात्मा अन्तः कथं घटादीनां सत्तास्फूर्तिप्रद इ
त्यशंक्याज्ञानवशादात्मैवेश्वरो नान्य इत्यभिप्रेत्याह यद्वश इति स्फूर्तिप्रदत्वं वक्तुं प्रकाशरूपतामाह यश्च
क्षुरित्यादिना आनंदाब्धिपदं व्याचष्टे मोदेति इष्टस्य लाभो हर्षो मोदः स एवाभ्यासात्प्रकृष्टः प्रमोदः
सुखमात्रमानंदः तस्य पक्षादिकल्पनाऽज्ञानवशादित्याह नमो गत इति स्वसुखमात्रादानेन लोकान्सुख
यतीत्याह जीवयतीति उत्तरार्धमेव स्पष्टयति यस्येति प्रसक्तं व्याख्ये॥ ॥ ॥ ॥ ॥

ॐ

 सत्त्वं सांसारिकं सुखं दुःखानुविद्धमिति तथाप्यात्मा तावत् [illegible]

सत्वं सांसारिकं सुखं दुःखानुविद्धमिति तथाप्यात्मा तावदुक्तयुक्तेरनुपादेय एव तथा चागत्या सुखे
यथा दुःखानुषंगो न भवति तथा यतनीयं न दुःसंपर्कभिया सुखत्यागमर्हति नहि भिक्षुकाः संती
ति स्थाली नाधिश्रियते मशकाप्रसंगात् तस्माद्दुःखपरिहारायैव यतितव्यं न वैषयिकसुखत्याग
इति परिहरति नेत्यादिना न चात्माद्रष्टव्यः श्रोतव्यो मन्तव्य इति वाक्ये प्रथमोपात्तं दर्शनमनूद्य
श्रवणमननादि विधीयते तत्रात्मज्ञानमेव ततः फलं तस्य पुरुषार्थत्वात् न च मुमुक्षोरधिकारित्वा
न्मोक्ष एवार्थान्फलं मोक्षस्यात्मस्वरूपातिरिक्तस्याभावात् आत्मभिन्नस्य जन्यत्वेन मोक्षस्यानित्यत्व
प्रसंगात् ततः श्रवणविध्यन्यथानुपपत्त्यात्मैव पुरुषार्थ इति सिद्धान्ती चोदयति कथमिति आत्मभि
न्न एव पुरुषार्थः श्रवणाद्यनुष्ठानफलं न त्वात्मा तस्याजन्यत्वादनित्यत्वाभावरूपत्वानंगीकारात्

नगत्यंतराभावात् नहि भिक्षुभिया स्थाल्यनधिश्रयणं आयातीति चेन्न दुःपरिहर्तव्यं सुखं तूपा
देयमेव कथं तर्ह्यात्मज्ञानार्थं श्रवणादिविधिः दुःखाभावार्थमेव एवमात्मनोऽपुरुषार्थत्वे प्रा
प्ते ब्रूमः य आत्मा सर्ववस्तूनां यदर्थं सकलं जगत् आनंदाब्धिः स्वतंत्रोऽसावनादेयकः पंचदा ॥२६॥

आत्यंतिकदुःखनिवृत्तेरेव मोक्षत्वादिति पूर्वपक्षी परिहरति दुःखेति तथा च श्रवणादिविधिरन्यथो
पपन्न इति भावः दुःखाभावे नोद्यमात्मा सुखेनापि सह इष्यते मुमुक्षुभिरयं तस्मादुपादेयः कथं भवे
त् एवं पूर्वपक्षमनूद्य तन्निरासाय सिद्धान्तं प्रतिजानीते एवमिति यदुक्तं पूर्वपक्षिणा आत्मानुपादेयः
सुखदुःखाभावान्यत्वात् दुःखादिवदिति तत्रान्यानुपसर्जनत्वमुपादेयत्वं न तदन्यत्वमनुपादेयत्वं
आत्मा च सुखादिविशेषत्वादुपसर्जनमित्यनुपादेय इति तदेतद्दूषयन् पूर्व[illegible]निरासप्रतिज्ञायां
हेतुं संगृह्णाति य आत्मेत्यादिना असावात्मानुपादेय इति यत्पूर्वपक्षिणोच्यते तत्कथमिति वदे
त्यन्वयः ननु कानुपपत्तिरुक्तानुमानेन तत्सिद्धिरिति चेत्तत्राह स्वतंत्र इति स्वतंत्रोऽन्यानुपसर्ज

ननु कथं भ्रांतत्वात्परीक्षकाः श्रुतिमूलत्वात्तदीयप्रवृत्तेरिति चेन्न ऐहिकामुष्मिकसुखार्थे प्रवृत्तिरपि श्रुति-
मूलत्वान्न भ्रममूलेति न विगीता। नह्यात्मनः सुखादेश्चोभयोरपि पुरुषार्थता तत्र ऐहिकामुष्मिकसुखाद्यर्थं साध
नानुष्ठानं एवं कृते न तद्विरोधश्रवणाद्यनुष्ठानं एवं भ्रांतत्वात् तन्मूलं परत्वादित्याशंक्याह बहूनामिति
आत्मनोपादेयः सुखाद्यन्यत्वात् दुःखादिवदित्यनुमाने पक्षेतरत्वस्यानुपाधित्वं बाधानुन्नीतत्वादित्येतावता
संदर्भेणाव्यवस्थापितं आत्मा पुरुषार्थः सुखरूपत्वात् वैषयिकसुखवदिति सत्प्रतिपक्षं दास्यामीत्यभि
प्रेत्य सुखरूपत्वं हेतुं श्रुत्यान्तावत्समर्थयते। विज्ञानमानंदमिति आनंदात्मकत्वं आत्मनः श्रुत्यावोध्यत इ
ति तावदंगीकरोति श्रूयतामिति तर्हि सत्प्रतिपक्षतासिद्धेत्याह नहीति एतावता सुखरूपश्रवणेनापी

बहूनामनुग्रहोन्याय्य इति न्यायात् द्विग्रायवदिति विज्ञानमानंदं ब्रह्मेति सुखरूपत्वमप्यात्मनः श्रुतौ
श्रूयते इति चेत् श्रूयतां नाम नह्येतावतात्मा पुरुषार्थः नहि सुखमित्येव पुरुषार्थः स्वसंबंधित
यैव तस्य पुरुषार्थत्वात् अन्यथा शत्रुसुखस्यापि पुरुषार्थत्वापत्तेः नहि सार्वं सुखस्य पुरुषार्थः सं
सारिकमपि सुखं नानाभिन्नमनुपादेयमेवेति चेत्
दुःखत्व

त्यर्थः सुखरूपत्वमुक्तयुक्तयुक्तेर्न संभवतीत्यर्थः)
ननु सुखरूपत्वे किमिति न पुरुषार्थत्वमिति तत्राह नहीति आत्मनः सुखरूपत्वे किं स एव स्वतंत्रः पुरुषा
र्थः किंवा सुखात्मनि समवेतं सुखांतरं नाद्यः नहि सुखमित्येव पुरुषार्थोऽपि तु स्वसंबंधित्वेन न चाभे
दे स्वसंबंधितासंभवति ततः सुखात्मा स्वतंत्रेण पुरुषार्थ इति न प्रतिपक्षानुमानं साध्विस्यर्थः नद्वि
तीय इत्याह नहि सुखमिति सुखात्मनः स्वरूपसुखेनैव तृप्तत्वात् सुखांतरे कामनायोगात् सुखांतर
सुखात्मनः पुरुषार्थ इत्यर्थः न चात्मा सुखादेय इति त्वयासाधितं वैषयिकसुखं तु वक्र दुःखानुविद्ध
त्वात् पुरुषार्थत्वात् अनुपादेयमेव तथा च सुखोद्देशेन यागादौ प्रवृत्तिर्बाधितेति सिद्धांतीशंकते सांसारि

112

किंच ऋषर्षेश्चेन्मधुविंदेत किमर्थं पर्वतं पर्वतं व्रजेत् इष्टार्थस्य संप्राप्तौ को विद्वान् यत्नमाचरेदिति न्यायादप्य
ति आत्मा तावत्परप्रेमास्पदत्वात्सुखात्मा तच्च सुखं नित्यं स्वप्रकाशं च परामर्शबलेन सुषु
प्तौ सर्वेन्द्रियविषयासुपरमेऽपि भासमानत्वात् तत्रैवं दशायामपि तत्स्यास्तीभातीति प्रती
तौ प्राप्तायामपि योऽयं नास्ति न भातीति अन्यथाव्यवहारः सोऽधिष्ठानाप्रज्ञानजन्य इति शुक्त्य
ज्ञानजन्यरजतव्यवहारे दृष्टत्वात्कल्प्यते अधिष्ठानं चात्मेति विपरीतव्यवहारयोग्यत्वल
क्षणमावरणमज्ञानजन्यमात्मनि कल्प्यते इत्यात्माऽज्ञानविषयत्वादज्ञात इति एवकारव्या
वर्त्यमाह जडस्येति अज्ञानाविषयत्वं तावज्जडस्य स्वीकर्तव्यं कथं यो हि यत्रातिशयमाधत्ते स तत्र
स्य विषयः अज्ञानं च नाऽनात्मन्यतिशयमाधत्ते निःप्रयोजनत्वादित्याह॰ अज्ञानलक्षणेति न
नु किमित्यावरणं निःप्रयोजनं विद्येपप्रयोजनवत्वान्नेत्यत आह॰ अन्तरेति विद्येपार्थमावरण
स्य विद्यमानत्वादज्ञानजन्यमावरणं निःप्रयोजनं शून्यत्यर्थः किं चमुक्तं तद्वावरणं जडेऽदृतिनत्वे

साधनमुत्पादनं एवमंशे पक्षं पराकृत्याद्यपक्षं दूषयितुमनुवदति संवेदिति तर्हि प्रमाणं वस्तुसत्तोत्पादकमिति यद्वं द्र
बयति नन्वीति प्रवर्त्तनं प्रमाणं सतिनावत्ता कथं न प्रमाणाधीनो वस्तुसत्तेति तत्राह प्रमाणप्रवृत्तेरिति यद्यपि व
तया पूर्वं यदास्ति तत्तस्य कार्यं न भवति नियतपश्चाद्भाविन एव कार्यत्वादित्यर्थः तर्हि प्रमाणप्रवृत्तेः पूर्वमेव वस्तुसत्ता
ज्ञायतामित्यत्र प्रतिज्ञाविरोधादित्याह अन्यथेति प्रमाणे सति सत्त्वमेव ज्ञायत इति यद्वस्तूत्थापयति सत एवेति
वस्तुसत्ताया ज्ञापकं प्रमाणमित्यर्थः अयं भावः प्रमाणाभावे वस्तुसत्ताभावमापादयता प्रमाणसत्त्वे वस्तु
सत्ताया व्यापकं वक्तव्यं व्यापकाभावस्यैव व्याप्याभावं प्रत्यापादकत्वात् तथा च सत एव वस्तुनो भानमि
त्यत्रेदं सिद्धति विमतस्त्वात्मा प्रमाणागम्यः सत्त्वात् घटवदिति तदेतदनुमानं जडत्वोपाधिना दूषयति
भवतीति अनात्मनि घटादौ दृष्टान्ते प्रमाणाधीनं भवत्विति योजना एवं घटादौ साध्यसत्तामुक्त्वोपाधिसत्ता

सतिचेन्न तर्हि प्रमाणाधीना वस्तुसत्ता प्रमाणप्रवृत्तेः पूर्वमेव प्रमेयसत्ताभ्युपगमात् अन्यथासति
प्रमाणं प्रवर्त्तनमिति स्ववचनव्याघातः सत एव वस्तुनो भानं प्रमाणाधीनमिति चेत् भवत्वभानस्वरू
पेऽनात्मनि अचेतने तथा स्वयमेव भानस्वरूप आत्मनि कल्पमेवं भविष्यति तथा च श्रुतिः तमेव
भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं भवतीति।

मप्याह अचेतन इति जड इत्यर्थः घटादौ जडत्वमुपपाद
यितुं विशिनष्टि अभानस्वरूप इति जडत्वोपाधेः पक्षे साधनाव्याप्तिमाह स्वयमेवेति एवं प्रमाणाधीनभा
नं हि स्वव्यवहाराय अपेक्ष्यते स्वरूपात्मकभानेनैव स्वव्यवहारसाधनो किं प्रमाणाधीनभानेन निष्प्रयोजन
त्वादिति भावः ननु भानस्वरूपत्वमजडत्वे प्रयोजकं न चात्मा भानस्वरूपः भानाश्रयत्वात् तथा च जडत्वमु
पाधिः कथं साधनाव्यापक इत्याशङ्क्यात्मनो भानस्वरूपत्वे प्रमाणं श्रुतिमाह तथा चेति तं श्रुति
द्धमात्मानं भान्तं भासमानमनुभाति सर्वं अनात्मजातं ननु यथा गच्छन्तमनुगच्छतीत्यत्रोभयोरपि
गमने स्वगतमेवं भानमनुभातीत्यत्रापि भानमुभयगतं वास्तवं किं न स्यादिति तत्राह तस्य भा
सेति तस्यात्मनः स्वरूपभूतया भासेत्यर्थः तथा च नानात्मा स्वगतभासा भास्यः किंत्वात्मभा
सेत्यात्माभानस्वरूप इत्युपाधिः साधनाव्यापक एवेत्यर्थः॥ ॥ॐ नमः परमात्मने॥

पाठात् भिन्नक्रमवोधिकः सिद्ध्यनुपपत्तेश्च=४

तृतीयं दूषयति तृतीये त्विति असत्त्वमात्रे स्वतः सिद्धं आत्मविशेषितं वा नाद्यः निर्विशेषितस्यासत्त्वानिरूपणात् द्वितीये त्वात्मनोपि स्वतः सिद्धत्वं विशिष्टस्य स्वतः सिद्धत्वे विशेषणस्यापि तत्त्वात् ततश्च द्वयोरपि स्वतःसिद्धत्वे प्राप्ते आह आत्मैवेति सापेक्षनिरपेक्षयोर्मध्ये निरपेक्षस्यैव स्वतःसिद्धत्वं युक्तमिति प्रतियोग्यधीनासत्त्वस्य सापेक्षत्वाद्धातापत्तेरित्यर्थः अत्रैव हेत्वन्तरमाह असत्त्वस्य चेति चकारो भिन्नक्रमः पंचमं तत्तानुपपत्तिपदेन संबध्यते **अयमर्थः** असत्त्वं जडमजडं वा नाद्यः जडत्वादेव घटवत् स्वतःसिद्धयोगादिति यद्यजडं तत्राह दूषयति अन्यथेति अजडस्य स्वतः सिद्धस्यैवात्मत्वादित्यर्थः तथा च प्रमाणासत्त्वेनात्मन्यसत्त्वापादनेना

तृतीये त्वात्मैव स्वतःसिद्धोऽस्तु असत्त्वस्य च स्वतःसिद्ध्यनुपपत्तेः अन्यथात्मनो नामांतरकरणप्रसंगात् किं चात्मनोऽसत्त्वं किमात्मना ज्ञायतेऽनात्मना वा नांत्यः अनात्मनो ज्ञातृत्वाभावात् नाद्यो व्याघातात् तथा हि किमात्मा स्वसत्ताकाले स्वाऽसत्त्वं जानाति स्वाऽसत्ताकाले वा आद्ये स्वसत्ताकाले स्वाऽसत्ता कुतः तथा च किं जानीयात् विषयस्यैवाभावात् स्वसत्ताका आत्मैव कालांतरभाविस्वाऽसत्त्वं जानातीति चेन्न ॥ ॥ श्रीरामचंद्राय नमः ॥ ॥

ममेष्टमेव कुरुतेः प्रमाणासत्त्वेनात्मनात्वसिद्धेरिति=१

निष्फलमिति भावः सिंहावलोकनन्यायेन प्रमाणाद् सत्त्वस्य सिद्धिपक्षे दोषांतरमाह किं चेति आद्येव कुवक्तव्यत्वात् तमुपेक्ष्यांते प्रथमतो दूषयति नांत्य इति तत्र हेतुः अनात्मन इति ज्ञेयैकरूपत्वात्तस्येत्यर्थः व्याघातादिति प्रतिज्ञाहेतुमुपपादयति तथा हीति आद्य इति परस्परविरोधेन प्रकारांतरस्थितिरितिन्यायादित्यर्थः भवतु सति स्वसत्ताकाले स्वासत्ता तथापि सा ज्ञायतामिति नेत्याह तथा चेति आत्मा स्वासत्ताकाले स्वासत्तां जानातीति द्वितीयमनूद्य दूषयति द्वितीय इति स्वस्य इति स्वस्यात्मन इत्यर्थः न ह्यात्मा स्वसत्ताकाल एव स्वासत्तां जानाति न चैवं व्याघातः तत्कालीनासत्ताया

असत्वमात्रस्य=५

वे॰सु॰टी॰
४१

ज्ञातपक्षे प्रमाणात्सि
द्धमिति=४

किंचनचेदस्ति प्रमाणमात्मनि तर्हि तस्यासत्वापत्तिरिति वदता आत्मनि प्रमाणासत्त्वेनासत्वमापद्यत
इति प्रतिभाति तदयुक्तमिति निरूपयितुं सिद्धान्ती विकल्पयति किंचेदमिति प्रमाणासत्वेनापादकेनात्म
न्यापाद्यमानमसत्त्वं ज्ञातं वा न वा आद्ये किं प्रमाणात् ज्ञातं भ्रमाद्वा ज्ञातं वेति विकल्पार्थः प्रथमे
प्रथममनूद्य दूषयति आद्य इति असत्त्वग्राहकं प्रमाणमसत्त्वमात्रं गृह्णाति आत्मप्रतियो
गिकमसत्त्वं वा नाद्यः तस्य प्रतियोगिनिरूप्यत्वेन प्रतियोगिनमविषयीकृत्य प्रमाणेन [illegible] तन्मात्रस्य४
विषयीकर्तुमशक्यत्वात् अथ प्रतियोगिनं विषयीकृत्य प्रमाणमसत्त्वं व्याप्यापयति तर्हि दूषय

प्रमाणासत्त्वा
दकाभावात्=२

ति असत्त्वग्राहकेति आत्मनः प्रमाणविषयत्वेनापादकाभावान्नापाद्यमसत्त्वं भवति नहि वह्नि तं४
मति पर्वते वह्न्यभावेन निर्धूमत्वमापादयितुं शक्योत्यर्थः नन्वसत्त्वस्य प्रतियोगिसत्त्वेनात्मेति कथं

तथा प्रमाणवत्त्वात्मनि
प्रमाणाभावेनासत्त्वं नहि
संपाद्यमित्यर्थः=८

किंचेदमात्मनोऽसत्त्वमापाद्यमानं प्रमाणासिद्धमसिद्धस्वभावं सतो वासिद्धं आद्येऽसत्त्वग्राहकप्रमाणस्य
प्रतियोगिविषयत्वनियमेनात्मनोपि प्रमाणसिद्धत्वेनासत्वानुपपत्तिः न द्वितीयः असिद्धस्यापादनात्
तस्य प्रमाणाविषयत्वेति मेवं सं[illegible]पन्नेः नहि वृद्धोऽनात्मत्वस्वभावमापादयितुं शक्यं ।। श्रीरामजी ।।
प्रतियोगिभवत्पदार्थस्य स्वरूपं धर्मो वा आद्येऽप्यात्मात्मकं सत्त्वं पदार्थान्तरात्मकं वा आद्ये उत्तरमु

तृतीया=२

क्तं आत्मनः प्रामाणिकत्वान्नासत्त्वमिति द्वितीये त्वियमसिद्धिः पदार्थान्तरस्यैवासत्त्वं सिद्धं नात्म
न इति सत्त्वधर्मश्चेत्तर्ह्यात्मनो वाऽन्यस्य वा आद्ये आत्मसत्त्वे प्रतियोगिनस्य प्रमाणसिद्धत्वेक
थमात्मन्यसत्त्वापादनं अन्यधर्मश्चेत्तर्हि तस्यैवासत्त्वं नात्मन इति कथमात्मनोऽसत्त्वमापा
दनीयमिति अज्ञातरूपासिद्धस्वभावपक्षं दूषयति न द्वितीय इति असिद्धस्यापादने प्रसंजनं
कुत्रेत्यपेक्षायामाह नहीति परं प्रतिवादिनानिष्टप्रसंजनमापादनं अत्रापादनशब्दार्थः न
चार्थमज्ञाताप्रादुरवनमिति वृद्धावनात्मत्वमापादयितुमशक्यमित्यर्थः ज्ञातप्रमाणात्भ्रमाद्वा
तोवेत्यत्राद्यो निराकृतः द्वितीयोपि न संभवति असत्त्वस्य भ्रमसिद्धत्वे भ्रमविषयस्याबाध्यत्वेनास्य

[illegible]

145

ननु न प्रमाणं प्रत्यगात्माकारणं तत्किं प्रमातृत्वेन करणत्वेन वा विषयत्वेन वा नाद्यः बुद्धेरेव प्रमातृत्वात्
ह्रीर्धीर्भीरित्येतत्सर्वं मन एवेति श्रुतेः नापि तत्तरो अनंगीकृतत्वेरितिनिन्नाह अन्यथेति आत्मानं स्वरूपं तत्र हेतुः
असिद्धप्रमातृकमिति नहि चैतन्यनाशात्मप्रमनापन्नाया बुद्धेः प्रमातृत्वं युज्यते जडत्वात् अन्यथात्ति
संगात् आत्मनः प्रमातृत्वे कृत्रिमबुद्धेरुपाधित्वाद् बुद्धिः प्रमात्रीति लोके व्यवहारः इत्यात्मा प्रमाता प्रमाणा
नो कारणमिति तद्भावे प्रमाणं स्वरूपमेव न लभेत कारणाभावे कार्यस्याभावादित्यर्थः प्रमाणात्मोप
यन्ते इति न ब्रूमः किं तर्हि ज्ञायत इत्याह कथं चेति आत्मनः प्रमाणाज्ञेयत्वे ज्ञाता किं स एव तदन्यो वा न
द्यः नाद्य इत्याह सर्वस्येति प्रमेयमात्रप्रत्यगात्मनो ज्ञातृकर्तृकत्वाज्ज्ञेयत्वे न युक्तमित्यर्थः प्रमाणप्रत्यगात्म
नो ज्ञातृत्वाज्ज्ञेयत्वं न युक्तमिति भावः प्रमाणादि प्रमातृत्वापि तत्र हि विषयः किं न स्यादिति नेत्याह कर्मक्रियाप्र

अन्यथाऽसिद्धप्रमातृकं प्रमाणमेवात्मानं न लभेत कथं वा सर्वस्य प्रमातारमात्मानं विषयीकु
र्यात्प्रमाणं कर्मकर्तृविरोधप्रसंगात् तदन्यस्य च सर्वस्यानात्मत्वेनाप्रमातृत्वात् तथा च श्रुतिः
विज्ञातारमरे केन विजानीयादिति तथा च प्रमातुरात्मनः स्वत एव सिद्धत्वात् प्रमाणाभावान्नात

त्मगुणत्वं प्रतिपद्यते कर्म तु स्वरूपलोधर्मेणो यात्क्रियासाध्यत्वात् क्रियां प्रति प्रधानं तत्र इत्या। एवमपि
त्मनः स्वज्ञाने प्रतिपक्षकर्तृ द्वैविध्यरूपं ज्ञानं प्रत्याश्रयत्वेन साधनत्वात् प्रमेयत्वेन प्रधानत्वादिति विरुद्धे का ५
पत्वप्रसक्ते र्न प्रमाणमात्मानं विषयीकर्तुमर्हतीत्यर्थः द्वितीयं विकल्पं दूषयति तदन्यस्य चेति विष तदन्यस्य चेति पदं = ३
यादात्मनोऽन्यः प्रमाता भवन् जडोऽजडो वा नाद्यः तस्यानात्मत्वेनाप्रमातृत्वादित्याह अनात्मत्वेने
ति न द्वितीयः तस्यैवात्मत्वप्रसक्तेः ज्ञेयस्य घटवदनात्मप्रसक्तेश्चेति विज्ञातुः प्रमाणागोचरत्वे मैत्रेयी
ब्राह्मणश्रुतिमुदाहरन्ति तथा चेति केन करणेन को वान्यो जानीयात् तत्त्वावस्थायामात्मव्यतिरि
क्तस्य सर्वस्याभावादित्यर्थः प्रमाणव्यतिरेकेणात्मसिद्धौ फलितमाह तथा चेति॥ ॥ ॥

ॐ

अपेक्षितां तर्हि प्रमाणं स्वसिद्धये प्रमाणांतरं नानवस्थाप्रसक्तेरित्याह तथाचेति कथं तर्हि प्रमाणे
नैव वस्तुसिद्धिरिति महतामुद्घोषः इति सत्यमुद्घोषः इति यत्तु पूर्वोक्तानवस्थादोषाद्भ्रममूलोय
मुद्घोष इत्याह इत्यभिमानमात्रमिति ननु तत्र वस्तु स्वप्रतीतये प्रमाणमपेक्षतां नाम प्रमाणं
पुनः स्वप्रकाशत्वात् स्वयमेव सिध्यति न मानांतरमपेक्षते तथाच नानवस्थेति द्वितीयमाशंक
ते अथेति ननु स्वसाधकत्वं प्रमाणस्य स्वविषयप्रतीतिजनकत्वं न चैतद्युक्तं वृत्तिविरोधादिति
चेन्न स्वव्यवहारे परानपेक्षत्वस्यैव स्वसाधकशब्दार्थत्वात् परानपेक्षत्वमेव प्रमाणस्य साधयति
नहीति प्रमाणं स्वसिद्धये यदपेक्षते तत्तस्य नावश्यमेयं तस्याप्रत्यायकत्वात् प्रमाणं चेन्नानवस्थि

तथाच प्रमाणे प्रमाणांतरानुसरणेऽनवस्थितेः प्रमाणेनैव वस्तुसिद्धिरित्यभिमानमात्रं
अथ प्रमाणं प्रमाणांतरनिरपेक्षमेव स्वं प्रमेयं च साधयेत् स्वप्रकाशस्वभावस्य तस्य स्व
परव्यवहारे प्रकाशांतरनिरपेक्षत्वात् प्रदीपप्रकाशवत् नहि सर्वस्य साधकं प्रमाणं स्व
सिद्ध्यर्थमन्यदपेक्षत इति युक्तमत्र हंत तर्हि सर्वस्य प्रमाणप्रमेयभेदभिन्नस्य जगतः सा
मा५ धकस्यात्मा कथं स्वाधीनसिद्धिकेन प्रमाणेन सिद्धः स्यात् प्रमाणात्पूर्वमेव सिद्धत्वात्॥ ॥

तेरित्यर्थः प्रमाणं प्रकाशकं सत् स्वपरसिद्धये नान्यत्प्रमाणमपेक्षत इति नानवस्थेति पूर्वपक्षिणा
निरूपिते सिद्धांत्याह हंत तर्हीति आत्मा कथं प्रमाणेन सिद्धः स्यादित्यन्वयः ननु कात्रानुपपत्ति
रित्याह स्वाधीनेति प्रमाणस्वरूपं तज्ज्ञानं चात्माधीनं आत्मसिद्धिश्च प्रमाणाधीनेत्यन्योन्या
श्रयप्रसक्तेर्नात्मा प्रमाणात्सिध्यतीति आत्माधीनसिद्धिकत्वप्रमाणस्य कैमुत्येन साध
यति सर्वस्येति स्वाज्ञानवशाज्जगदुत्पाद्य भासयतीति जगत्साधकस्यात्मेत्यर्थः किंच प्र
माणादात्मा सिध्यतीति कोऽर्थः किमुत्पद्यते उत ज्ञायते नाद्य इत्यत्र हेतुमाह प्रमाणादि
ति पूर्वसिद्धत्वं चात्मनः प्रमाणं प्रतिकारणत्वादिति॥ ॐ नमः परमात्मने॥ नमः श्री

अथ पूर्वपक्षोपक्रमे आत्मशब्देन विशिष्ट ईश्वरो वा जीवो वा न विवक्षितः किं तर्हि शुद्धं चिदानंदघनं प्रत्यक्ब्रह्मैव
कमात्मशब्देन विवक्षितं न हि तत्र न पूर्वोक्तदूषणावकाश इति वक्तुं सिद्धान्ती विकल्पयति किं तत्रेति तत्र पू
र्वोक्ते निरूपणीये सतीति उक्त आत्मनि प्रमाणसापेक्षा किमात्मनः स्वरूपलाभाय उताहो आत्मप्रतीतये इति
विकल्पार्थः आद्यं दूषयति नाद्य इति । किमेन दात्मा ऽकार्यत्ववादिन आद्ये तत्कार्यत्ववादिनो वा आद्यं पर
चष्टे आत्मस्वरूपस्येति नित्यत्वेनेति अकार्यत्वेनेत्यर्थः भावस्य हि नित्यता कार्यत्वेनोपपद्यते इत्यात्मा का
र्य इति न स्वरूपलाभायात्मा प्रमाणमपेक्षत इत्यर्थः द्वितीयं प्रत्याचष्टे प्रमाणस्येति प्रमाणस्य प्रमेयानुत्पा

नाद्यः आत्मस्वरूपस्य नित्य
किं तत्र प्रमाणाभावेनात्मनः स्वरूपानुपपत्तिः प्रतीत्यनुपपत्तिर्वा द्वितीये प्रमाणेऽपि तर्हि प्रमाणान्तरं
तयेनरनिरपेक्षत्वात् प्रमाणस्य स्वप्रमेयानुत्पादकत्वाद्व ॥ ॐ नमः परमात्मने ॥ ॥
वाच्यं तदभावेन शृंगवदसत्त्वेन स्वप्रमेयसाधकत्वासंभवात् ॥

इति नहि प्रवृत्तिज्ञानं प्रवृत्तिं प्रसूते किं तर्हि प्रवृत्ति
दकत्वमासिद्धं प्रवृत्त्यादेरपि प्रमेयत्वादिति तत्राह स्वेति नहि प्रवृत्तिज्ञानं प्रवृत्तिं प्रसूते किं तर्हि प्रवृत्ति
विषयविषयके स्वसाधनताज्ञानमिति न व्यभिचारः अथात्मा स्वप्रतीतये प्रमाणमपेक्षत इ
ति द्वितीयविकल्पेऽपीदं विचारणीयं किं प्रतीतिमात्रं प्रमाणाधीनं उत तज्जन्यप्रतीतिः प्रमाणाधीने
ति नाद्य इत्यतिप्रसंगमाह प्रमाणेऽपीत्यादिना ननु विषयसाधनार्थं प्रमाणमपेक्षितं ननु
प्रमाणे प्रमाणमपि अनुपयोगादिति तत्राह तदेवेति लब्धसत्ताकं हि प्रमाणं विषयं साधयतीति
ति विना प्रमाणेन तु न प्रमाणसत्ता सत्त्वाभावे च प्रमाणस्य न स्वविषयसाधकत्वं इत्यर्थः ॥ ॥ ॥

पूर्वपक्षमनूद्य सिद्धान्तमुपक्रमते एवं प्राप्त इति नन्वात्मनि प्रमाणमस्ति न वा तत्रात्मशब्देन विमिश्रः आहतजीवादि
शब्दवाच्यो वा गृह्यते किं वा शुद्धं चिदानन्दात्मकमिति आद्ये प्रमाणप्रवृत्तावपि न दोषः तस्य स्वप्रकाशत्वेन भास्य
त्वाविरोधात् प्रमाणाप्रवृत्तावपि न दोषः तस्याज्ञानविषयत्वात् न तु प्रमाणप्रवृत्त्यप्रवृत्तिचिन्ता वैयर्थ्यात् किं त
र्हि अत्र प्रतिपाद्यमित्यपेक्षायां तज्ज्ञेयं वस्तुस्वरूपविशेषणविशिष्टमात्मनो नीत्युक्तं निरूपणीयं वस्तु श्लोकेन सं
गृह्णाति यत्तत्त्वमिति यत्तत्त्वमिदमत्र कथ्यत इत्यन्वयः तत्त्वमनारोपितस्वरूपं ननु नैतत्त्वं निरूपणमर्हतीति
प्रमाणाप्रवृत्तेरसत्वादिति तत्राह वेदगुह्यमिति नन्वेतद्दुःसाध्यं निःप्रयोजनत्वादित्यत्राह परमेति अविद्या
तत्कार्यरहितत्वात्स्वयं तत्त्वपुरुषार्थ इत्याह नित्येति ननु सप्रयोजनमवक्तव्यमिदं प्रमाणाकत्वसंभवेपि तस्य
ण्यत्वान्निश्चयात्व प्रसक्तिरिति तन्नेत्याह सत्यमिति न हि सिद्धत्वात्तस्य तत्र प्रमाणान्तरसंवादविसंवादाभावे वेदप्रामा

एवं प्राप्तेऽभिधीयते यत्तत्त्वं वेदगुह्यं परममसुखततमं नित्यमेकस्वभावं सत्यं सूक्ष्मात्सूक्ष्मं
यस्यांशोंऽशप्रभावं जगदिदमखिलं भ्रांतिमात्रैकदेहं
त्यं महदिदममृतं मुक्तिमात्रैकगम्यं २४॥ ॥ ॥ ॥ ॥
प्रत्यग्ज्योतिःस्वरूपं शिवमिदमधुना कथ्यते युक्तितोऽत्र

णमित्याशंक्याह सूक्ष्मादिति प्रमाणान्तरायोग्यत्वात्सूक्ष्मं तत्र सूक्ष्मांशमणुमित्यर्थः तर्हि परिच्छिन्नत्वाद्घटव
दनित्यमात्मेति नेत्याह महदिति निरुपचरितमहत्परिमाणमात्मेत्यर्थः ननु मुक्तिस्वभावत्वे मुक्तिर्न हेतोर्भे
दप्रतीतेर्न तन्महदिति तत्राह इदममृतमिति इदं पूर्वोक्तं तत्त्वममृतं मुक्तिरित्यर्थः तत्र विद्वत्प्रत्यक्षं प्रमाणयति
मुक्तिमात्रेति एवं तस्य तत्त्वनिरूपणवाच्यमाह शिवमिति ईश्वराभिधानमित्यर्थः ईश्वरत्वमुपपादयति य
स्यांश इति तर्हि जगदुपादानत्वे विकारित्वमिति तन्नेत्याह भ्रांतीति भ्रांतिरज्ञानमेव देहः स्वरूपं यस्य तद्भ्रांतिरज्ञान
मेव देहः स्वरूपं यस्य तद्भ्रांतिमात्रैकदेहं अयमाकूतं यदि जगदुपादानेन स्वरूपमन्तरे तेनात्मनो न प्राधान्येन जगदुपा
दानत्वान्न विकारितेत्यर्थः यद्वा भ्रांतिमात्रेति जगतो विशेषणं तेन जगन्न वस्तुत आत्मोपादानं भ्रांत्यात्मनोऽज्ञान
त्वसत्यत्वप्रसक्तेः तर्हि कथमात्मनः कारणत्वव्यपदेशः जगदुपादानाज्ञानाधिष्ठानत्वादिति नात्मनो विकारिते
ति तदस्यास्तत्प्रत्यावर्तयति प्रत्यगिति जडत्वानात्मत्वादिना वाच्यत्वादिरूपमापद्यमानं जगद्रूपत्वात्प्रतिकूल

अत्र वदन्तीत्यादिना ग्रंथेनैकदेशिनिराकरणव्याजेन निरूपितप्रमेयमुपसंहरति तदेवमिति यतो ज्ञानानां स्वविभागो न
प्रामाणिकः तस्मात्तदेवं सति दृष्टिदृश्ययोरन्यतराऽवशेषप्रसंगे दृश्यस्य सापेक्षत्वात् दृष्टेश्च निरपेक्षत्वात् दृष्टिरे
वावशिष्यते न दृश्यमेवेत्यर्थः अत एवाह दृष्टिमात्रात्मकमिति जगत्प्रतीतिमुपपादयितुं रज्ज्वां यथेत्या
दिनाख्याता मायात्मा जगद्रूपः प्रकाशत इत्यादिना निरूपितमुपसंहरति आत्मा स्थयेति ननु एकदेशिमतनिरा
करणव्याजेन चिदात्मनः स्वाश्रयविषयज्ञानेन जगदात्मत्वं तद्रूपेणावस्थितिभासनं च निरूपयतात्मनो ज्ञानवि

तदेवं दृष्टिमात्रात्मकं जगदाश्रयविक्षेपशून्यज्ञानेन कृतमित्यात्मनो ज्ञान
विषयत्वं साधु विकल्पितं तथा चात्मनि लौकिकवैदिकप्रमाणासंभ
वेन शशविषाणादिवदसत्त्वे प्रसक्ते कुतस्त्यस्तदाकारणप्रशास्त्राऽभ्य
र्थेनाकुतस्त्यं पुनस्तत्पदेवेति हृदयः ॥ नमः शिवाय ॥ ॥ ॥ ॥

षयत्वमंगीकृतमिति तावत् जगज्ज्ञाननिवर्तकापरोक्षज्ञानाकारजनकत्वेनोपनिषदामात्मनि प्रामाण्यं त्वयैवो
पपादितमिति सिद्धान्तिमतसिद्धिरित्याशंक्य नेत्याह इत्यात्मन इति इतिशब्दः पूर्वोक्तयुक्तिपरामर्शार्थः तत्र
आत्मनो ज्ञानविषयत्वपक्षस्थितं न त्वसाधुका कूक्तिरियं तत्किं साध्वसाधु वेति नैव साधु यतो विकल्पितं न तु
प्रमाणसिद्धं स्वयंप्रकाशमानस्य ज्ञानविषयत्वानुपपत्तेरुक्तत्वादिति तथा च न सिद्धान्तिमतसिद्धिरित्याह
तथैव चेति वैदिकेऽर्थे युक्त्यनुपेक्षितत्वात्तदपेक्षिते वेदस्य निरपेक्षत्वदर्शनादित्यादि संग्रहीतुमाह इति संदे
यइति आत्मन्यस्य प्रमाणत्वात्त्वस्मादात्मनत्वे प्रमाणं उपाधीतश्रुतिः कस्माद्युक्तिं वापेक्षते कथम् ॥ ॥

वे॰मु॰टी॰
३८

151

ननु चिदात्मनो जगद्रूपेणाभाने विकारित्वप्रसंग इति विवर्तवादाश्रयणेनेति सदृष्टांतमाह रज्जुरिति ननु तथापि रज्जुः स
र्पादिरूपेणाभासत इति युज्यते तस्याः सर्पाधिष्ठानत्वात् न तु तद्वदात्मा अज्ञानवशादपि जगद्रूपेणाभासत इति कल्पयि
तुं युक्तं तस्य निर्विशेषमात्रत्वेन जगदधिष्ठानत्वानुपपत्तेरिति तत्राह आत्मन्येवेति जगदुत्पत्तिस्थितिनिवृत्तिहेतुत्वा
दात्मनो न निर्विशेषमात्रत्वं किंतु सर्वज्ञानतेति जगदधिष्ठानत्वमेवात्मनो युक्तमिति ननु आत्मनो जगद्रूपत्वेऽन्या
त्मता परिच्छिन्नजगद्रूपत्वात् तथा दुःखित्वापत्तिः दुःखरूपजगदात्मत्वात् तथा नानात्वं चात्मनः निष्टमापद्य
ते नानात्मजगदात्मत्वात् अस्माद्बिरूपात्मनि दुर्निवारा तथाविधजगन्मयत्वात् तथा धर्मादिमत्त्वप्रसक्तिश्च न

रज्जुर्यथा भ्रांतदृष्ट्या सर्परूपा प्रकाशते आत्मा तथा बुद्धदृष्ट्या जगद्रूपः प्रकाशते २१ आत्मन्ये
न॰ वजगत्सर्वं दृष्टिमात्रं समस्तकं उद्भूय स्थितिमासाद्य विनश्यति मुहुर्मुहुः २२ पूर्णानंदाद्वयेऽस्मि
द्रूपापद्दोषादिवर्जिते प्रतिबिंबमिवाभाति दृष्टिमात्रं जगत्त्रयं उक्तं भगवता वसिष्ठेन त
स्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टयः इमास्ताः प्रतिबिंबंति सरसीव तटद्रुमाः १ तथा यस्य
चिन्मयी लीला जगदेतच्चराचरं यस्य विश्वात्मकत्वेऽपि स्वं च्यवते नैकपिंडिता २ ॥ ॥ ॥

द्विधर्माद्यनपेक्षात्मा जगज्जनयति वैषम्यादिदोषप्रसंगात् न च जीवादृष्टमुपजीव्यते तस्यादृष्टमिति वाच्यम्
जीवब्रह्मणोरभेदात् किंच यथा दुग्धं दध्याकारतामापन्नं दध्येव शिष्यते न दुग्धं तथात्मापि जगद्रूपतामाप
न्न इति जगदेव स्यान्नतु आत्मेत्येवं शंकितदोषाननुपराचष्टे पूर्णेत्यादिना अज्ञानवशादेव परिच्छिन्नत्वाद्यात्म
क जगद्रूपतात्मनो वस्तुत इति नैकोऽपि दोष इति यथा दर्पणं बिंबसन्निधौ प्रतिबिंबात्मना भासमानमपि प्रतिबिं
बाकारताया मिथ्यात्वात् न स्वरूपं जहाति एवमात्मनोऽपि जगदाकारताया मिथ्यात्वाज्जगद्रूपेणाभासमानोऽप्या
त्मा न स्वरूपं जहातीत्यत्र दृष्टांतमाह प्रतिबिंबमिवेति उक्तेऽर्थे सम्मतित्वेन वाक्यमाह उक्तमिति ॥ ॥ ॥

राम
३८

तद्वैदेवस्यकाप्रमेति चतुर्थपादसंगृहीतं विज्ञानमेतावता ग्रंथेन प्रतिपादितं इदानीमुपसंहरन् श्लोकेन संगृह्णाति तस्मादि
ति ननुज्ञानज्ञेययोरभेदे किं ज्ञानमेवावतिष्ठते ज्ञेयमेव वेति विनिगमकाभावाद्विकल्पे किं प्रतीतिरेव सत्तामित्या
द्युविकल्पांगीकारे गाह प्रतीतिमात्रमेवेति यदेतद्विश्वं भाति तत्प्रतीतिमात्रमेवेति यत्तदावध्याहर्तव्योऽयं
प्रत्ययाप्रतीतिमात्रं स्वप्रकाशमहिम्ना भाति एतदेव विश्वं नततोऽतिरिच्यत इत्यर्थः जडप्रपंचस्य स्वसिद्धा
वेतानपेक्षाया अवश्यं वक्तव्यत्वाज्ज्ञानस्य च विषयानपेक्षाया उपपादितत्वात् ज्ञानेएव विषयोऽयं भुवि तमहेती
त्यर्थः ननुयदि प्रतीतिरूपमेव जगत्प्रतीतिर्ज्ञानान्नातिरिच्यते कथंतर्हि चराचररूपेणाभेदेन नानात्वेन च प्रतीति
स्तत्राह ज्ञानज्ञेयेति वस्तुतो विज्ञानस्वरूपमेव स्वाभेदस्य ज्ञावस्थासंबंधिजाग्रत् ज्ञानादिभेदेन प्रतीयते तथा

तस्मात्सत्ये तत्व प्रतीत्योऽह्यभेदः प्रामाणिकः कुतः प्रतीतिमात्रमेवैतद्भाति विश्वं चराचरम् १८
ज्ञानज्ञेयप्रभेदेन यथास्वाभं प्रतीयते विज्ञानमात्रमेवैतत् तथाजाग्रच्चराचरम् १९ ततो
भेदेपरोयद्दुच्छ्रून्यएवस्वरूपतः आत्मनोवितयैवेदं भानमात्रं चराचरम् २० ॥ ॥ ॥

च स्वप्ने विज्ञानमेव ज्ञेयात्मना नानात्वेन च भासिष्यत्यथा विज्ञानमात्रमेवैतत् जगत् जाग्रत्कालीनं चराच
रात्मनानात्वेन भातीति तज्ज्ञानं भेदेन च भानं मानस्य च इत्यर्थः ननु किमिति विज्ञानमेव जगद्रूपेणभातीति
कल्पने विज्ञानाद्वैतेन स्वातंत्र्येणैव जगद्भानता मितितत्राह ततोभेदेइति पदः स्वरूपतो वस्तुतस्तन्तोभेदे
शून्यएवेत्यन्वयः कारणसत्तैव कार्यसत्तानत्वात्तंतुणा कार्यमतः तथासति तंत्वभावेपिपटः स्यात् ननुपटं प्रति
तंतोः समवायिकारणत्वेनाश्रयत्वात् द्रविपटोनतिष्ठते ननु तंतुसत्तैव पटसत्तेति चेन्न हिमवद्विंध्ययोरिवभे
देकार्यकारणाभावस्यादर्शनात् तथाच तंतुपटयोरत्यन्तराविशेषपटस्यतंतुसापेक्षत्वात्तंतोऽपटनिरपेक्षत्वात्
तुरेवावशिष्यत इति तंतुभेदेपटः शून्यएवेत्यर्थः इदं प्रतीतिसिद्धं चराचरं जगत् आत्मनोयद्विस्वरूपतोभिन्नं
तर्हितथैवशून्यमेवतत्रहेतुः भानमात्रमिति प्रकाशश्चेतनं तद्रूपतावस्तुतआत्मनोवपर्यवसानीतिपुनःमात्रमेदने

नै॰ ज्ञानमात्र=२ वैशेषिकादिमते=२

नतु ज्ञानज्ञेयोः किं ज्ञानसामान्यमेव विषयः किं वा ज्ञानविशेषः नाद्यः घटज्ञानमित्याकारत्वात् ज्ञानमात्रमात्रविषयत्वायोगात् तस्मात् ज्ञानपेक्षणात् अथ यदि द्वितीयः तर्हि ज्ञाने विशेषस्य विषयाधीनत्वात् कथं विषयाभावेऽत्र ज्ञस्य उपपत्तिरिति पूर्वपक्षी शंकते ज्ञानसामान्यस्येति तत्वं ज्ञानविशेषोत्पत्त्याभास्यते इति सच ज्ञानविशेषो व्यावृत्तिरूपो न विषयकृत इति नतेज्ञप्तिविषयमपेक्षते इत्यभिप्रेत्य परिहरति न तुच्छमिति कुत इत्यत्र ज्ञानान्तरे बोधः घटज्ञानस्य व्यावृत्त्यात्मकविशेषसिद्धिरिति शंकां परिहरन् तुच्छत्वप्रतिज्ञायां हेतुमाह ज्ञानस्येति विषयो ज्ञाने किं ज्ञानव्यावृत्तिहेतुः उत ज्ञाने व्यावृत्तिप्रतीतिहेतुः नाद्यः व्यावृत्तेरन्योन्याभावत्वेनाजन्यत्वात् जन्यत्वे वा तत्त्र

काष्ट=२

ज्ञानसामान्यस्यानपेक्षतोऽस्त्वविषयव्यावृत्तज्ञानापेक्षायां विषयापेक्षाप्यवश्यंभाविनीति न तुच्छं ज्ञानस्य स्वत एव व्यावृत्तत्वात् स्वरसिद्धजात्यादिवत् तथापि ज्ञानस्य ज्ञेयव्यावृत्त्वात् ज्ञेयं बोधयतीति चेत् न व्याप्त्यसिद्धेः ज्ञानज्ञेययोर्विभिन्नदेशत्वे सामानाधिकरण्यात् अतीतानागतार्थज्ञानदर्शनेनैक कालत्वस्याप्यसिद्धेः श्रीरामचंद्राय। नै॰

भाव॰ त

दुत्पत्तेः प्राक् ज्ञानं सर्वाभिन्नस्वभावमुत्पन्नमिति कथं न विषयाद्व्यावर्त्तनस्वभावं जहाति अतीतानागतविषयकज्ञानस्याव्यावृत्तत्वप्रसंगाच्च अथ विषयः स्वज्ञाने व्यावृत्तिप्रत्यापयति तर्हि सतीतां प्रत्यापयेत् सतीवानतीवाद्यः असतोऽप्रकाशनात् द्वितीये ज्ञानव्यावृत्तित्वं न विषयाधीनमिति स्वत एव व्यावृत्तं ज्ञानमिति यथा परेषां वैशेषिकादीनां घटत्वादिव्यावृत्ता घटत्वादिजातिः स्वत एव न तु व्यक्त्या व्यावर्त्त्यते अन्योन्याश्रयात् अंत्याविशेषाश्च स्वत एव व्यावृत्तास्तथा ज्ञानमपि स्वत एव व्यावृत्तमिति ज्ञानस्य परप्रकाशकत्वं प्रदीपवत् प्रतीति

स्तत्र तदा दाह्यमिति युक्तं वह्निर्दाह्यं दहतीति ज्ञानं पुनर्ज्ञेयेन व्याप्तं विभिन्नदेशत्वात् कचिद्भिन्नं

नै॰ अतीतानागतयोः=२

नैयायिकस्य वा=

ज्ञेयं विना ज्ञानस्यानुपपत्त्यभावमुपपादयति तथाहीति ज्ञानज्ञेययोर्भेदे ज्ञानस्य ज्ञेयव्यतिरेकेणोत्पत्त्यनुपपत्ति
लक्षणाणां किमित्यर्थः ज्ञानस्य स्वभिन्नज्ञेयमंतरेणोत्पत्त्यनुपपत्तिरिति किं नेति देशिमत उत्पत्त्युत्पत्तस्य आद्य
अनन्वाह ज्ञानस्येति ज्ञानस्य स्वरूपत उत्पत्त्याकारेणोत्पन्नत्वाविशिष्टरूपतो नित्यभावत्वेनोत्पत्त्यभावान्नाद्य इ
त्यर्थः युक्तं प्रमाणत्वभावेनेति अन्यथैवोपपन्नेनैव प्रमा उपपत्तिः प्रमाणानामित्यर्थः ननु यथा प्रमाः प्रमेयप्रमाणा
तदाभासो कारणत्वेनापेक्षते तथाकारणत्वाद्विषयो वाह्विषयमपि तेन अपेक्षते एवेति कथं तद्व्यतिरेकेण तयो
रुत्पत्तिरिति तत्राह ज्ञानस्येति अनन्वितपादौ व्यभिचारादित्यर्थः द्वितीयं दूषयति नापीति नैयायिकादीन्प्रति

तथाहि तत्किं ज्ञानस्य ज्ञेयव्यतिरेकेणोत्पत्त्यनुपपत्तिः स्थित्यनुपपत्तिर्वा ज्ञप्त्यनुपपत्तिर्वा नाद्यः ज्ञान
स्य स्वरूपत उत्पत्त्यभावात् भावे वा प्रमाणतदाभासाभ्यामेतदुत्पादसंभवे विषयानपेक्षणात् ज्ञान
^{वा} स्य सर्वत्र विषयजन्यत्वनियमाभावात् नापि स्थित्यनुपपत्तिः विषयस्य ज्ञानाश्रयत्वात् तथात्वे वा विष ^{ना}
यस्य व्याघातात् ज्ञानविषयकज्ञानस्य विषयज्ञानाधीनत्वेन ज्ञेयं विना ज्ञप्त्यनुपपत्तिरस्तीति चेन्न ज्ञा
नस्य स्वयंप्रकाशमानत्वेन व्यवहारार्थं ज्ञानान्तरानपेक्षणात्

हेतुमाह विषयस्येति ज्ञानस्य प्रत्यक्षत्वे तस्य
त्वइति तथात्वे विषयस्य ज्ञानाश्रयत्वे ज्ञानाश्रयस्य प्रमात्वत्वादित्यर्थः कथं तर्हि ज्ञातो घट इति प्रत्यय इति इष्टो घट इ
तिवत्सं तोष्ठव्यं तृतीयमनुत्पादयति ज्ञानविषयकेति ज्ञानस्य ज्ञेयं विना ज्ञप्त्यनुपपत्तिर्न्तज्ञेयभेदे प्रमाणमस्तु
ननु ज्ञानज्ञानस्य विषयीभूतज्ञानविषयं विना किमनुपपन्नं स्वरूपमेवेत्यत आह ज्ञानविषयकेति विषयज्ञाना
धीनत्वं नाम विषयज्ञाने तु ज्ञानजन्यत्वं तत्र अज्ञातज्ञानवत् ज्ञानविषयस्यापि ज्ञानं ज्ञानं कारणत्वात् तदभावे
ज्ञानज्ञप्तिरनुपपन्नेत्यर्थः ज्ञानज्ञप्तेरभावान्न ज्ञानज्ञप्तिकारणत्वेन ज्ञेयसिद्धिरित्यभिप्रेत्य पूर्वपक्ष
निषेधं प्रतिज्ञानीते नेति ज्ञानं किं व्यवहारार्थं ज्ञानान्तरं ज्ञानमपेक्षते उत विषयव्यवहारार्थं

घटमहं जानामीत्यनुव्यवसायिनः=४ घटं विना=४ अयं घट इति=४

व्यवसायि=४

पदस्य=

ज्ञानं

ज्ञानेः कार्यः

ज्ञानान्यथानुपपत्तिर्ज्ञानज्ञेयभेदे प्रमाणमित्याशंक्य परपक्षे नचेत्यादिना इतिनचवाच्यमितन्वयः इति
प्राच्यमतमुपमाह ज्ञानमेवेत्यादिना यथा दाह्यं विना न वह्निरात्मानं लभते तथा विना ज्ञेयं ज्ञानं स्वरूपमेव न लभ
ते ततोऽवश्यं ज्ञेयेन भवितव्यं तच्च ज्ञेयं न स्वयमेव वृत्तिविरोधात् तस्मात् ज्ञानमेव स्वभिन्नज्ञेयमन्तरेणानुपपन्नं ज्ञे
कर्तृकर्म- यं कल्पयतीति ज्ञानज्ञेययोर्भेदसिद्धिरिति नन्वदाह्यप्रभवो वह्निर्विनादाह्यं न भवतीति युक्तं ज्ञानं तु न विषयजन्यं ततः
कथं विना विषयं ज्ञानमेव न संभवतीति तत्राह नहीति अर्थप्रकाशो हि ज्ञानमतो ज्ञातृतिचार्थकस्य प्रकाशने ज्ञा
ने भवेत् ततोऽर्थनिरूप्यत्वाज्ज्ञानस्य विषयाभावेन तस्य स्वरूपं संभवतीत्यर्थः ननु असंभावितोऽयमर्थः प्रामाणिकत्वे

नच ज्ञानमेव स्वातिरिक्तज्ञेयव्यतिरेकेणानुपपन्नं स्वभिन्नं ज्ञेयं विषयीकरोति नहि निर्विषयं ज्ञानं
संभवति दृष्टं वा सविषयत्वेन भासमानत्वात् अन्यथा निष्प्रकारकमेव भासेत ज्ञाने विषयाति
रिक्तस्य प्रकारस्याभावादिति वाच्यं ज्ञेयव्यतिरेकेण ज्ञानस्यानुपपन्नत्वाभावात् ॥ ॥ ॥ ॥

ष्टी क्रियते एवमेवोत्पातिकः सविषयत्वमिति तत्राह दृष्टमिति दृष्टं वा न हीत्यन्वयः निर्विषयकज्ञाने प्रमा
णाभावं प्रति ज्ञायते तत्र सविषयज्ञानभासनं हेतुत्वेनाह सविषयत्वेनेति ननु कस्मिंश्चिद्भूतले घटवत्त्वपि भ्रमेन
लान्तरं निर्घटं यथा तथा कस्मिंश्चिज्ज्ञाने सविषयेऽपि ज्ञानान्तरं निर्विषयकं किं न स्यादिति शंकां निरासाय आह एवेति
स्वव्यापारणार्थमुपपादयति अन्यथेति अन्यथाति विषयज्ञाने सतीत्यर्थः ननु घटोऽयमिति ज्ञाने घटो विषयः घटत्वं
च प्रकारस्तदुभयं संमतं तत्र विषयप्रकारयोर्भेदात् किमिति विषयाभावे निःप्रकारकं ज्ञानं भासिष्यत इति त
त्राह ज्ञानेति भासमाने वैशिष्ट्यनिरूपको हि ज्ञाने प्रकारः स च विशेष्यवद्भासमानत्वाद्विषय इति तस्याप्यभा
वे निःप्रकारकमेव ज्ञानं भासेतेत्यर्थः ततो ज्ञानं ज्ञेयं विनानुपपन्नं वृत्तिविरोधात्स्वभिन्नज्ञेयं कल्पयतीति

ननु महदृष्ट्योरभेदे पूर्वोत्तरभावासंभवात् पूर्वोत्तरभावव्याप्तः कार्यकारणभावोऽपि विनाभेदं न संभवतीति सृष्टिवाक्यं भे
दपरमेव किं न स्यात् इत्याशंक्याह अन्यथेति अन्यथा प्राकृत्या चेष्टे भेदपरत्वे इति तस्य भेदस्य निषेधः तन्निषे
धः भेदस्य सृष्टिवाक्यतात्पर्यविषयत्वे नेह नानास्ति किंचनेत्यादिश्रुत्या निषेधोऽनर्थः स्यादखंडवस्तुसिद्ध्यर्थो निषे
हि भेदनिषेधः न च श्रुतितात्पर्यविषयस्य भेदस्याखंडवस्तुसिद्धावनीति व्यर्थत्वन्निषेधस्यार्थः न च विनाभेदं
पूर्वोत्तरभावासंभवान्न कार्यकारणभाव इति सांप्रतं कल्पितभेदमाश्रित्य कल्पितकार्यकारणभावे विरोधाभावा
त् किंच सृष्टिवाक्यं भेदपरमिति कोऽर्थः किं वाक्यं पदार्थतत्त्वेन भेदस्य तात्पर्यमापयति वाक्यार्थत्वेन वा विना
भेदं वाक्यार्थः कार्यकारणभावो नोपपद्यत इति वाक्यार्थोपपादकमभेदमर्थात्कल्पयतीति वा सर्वथा न संभवतीत्या

किंच सृष्टिवाक्यं न स्यात्ताद्दृशं प्रतिपादयति भेदं वा च
अन्यथाभेदपरत्वेन निषेधोऽनर्थकः स्यात् पदार्थस्यैव संसृष्टत्वेन वा धर्मिमात्रपरत्वेन वाक्य २
कपदाभावेनापदार्थस्य वाक्यार्थत्वाभावात् ॥ ॥ ॥ ॥ ॥
वा वाक्यप्रतिपाद्यत्वात् कल्पनायाश्च न निषेधवाक्यविरोधोऽनुत्थानात् ॥

नेह नानास्ति किंचनेति २ लक्षणायाः २

ह किंचेत्यादिना भेदो न सृष्टिवाक्ये निविष्टपदार्थः सृष्टिवाक्ये भेदोपाख्यापकपदाभावात् अपदार्थत्वा
च्च न वाक्यार्थ इत्यर्थः ननु पदार्थस्यापि परगृहभोजननिषेधस्य विषं भुंक्ष्वेति वाक्यार्थता वत् ब्रह्मजगतो
र्भेदस्यापदार्थस्यापि सृष्टिवाक्यार्थता किं न स्यादिति नेत्याह पदार्थस्यैवेति अखंडवाक्यार्थत्वपक्षमाश्रि
त्याह धर्मीति वाक्यप्रतिपाद्यत्वादित्यत्र स्यात्तादिति शेषः तत्र परगृहे भोजन इति हेतोः पदार्थत्वान्न
त्वात् वाक्यार्थतेति न दोषः ततीयं पक्षं निषेधयति कल्पनायाश्चेति न तावत् सृष्टिवाक्यमेव कार्यकार
णभावोपपादकं भेदं कल्पयति अचेतनत्वात् नापि वाक्यार्थं दृष्ट्वा पुरुषो भेदं कल्पयति पुं कल्पनायाश्च तिविरो
धेनाभासत्वादित्यर्थः एतेनार्थापत्तिर्भेदप्रमाणमिति निरस्तं नानात्मकब्रह्मजगतोर्भेदे तयोः कार्य

ननु ततः तथ्यं तयोर्भेदेऽपि ज्ञानज्ञेययोर्भेदः स्यादिति नैवं प्रकाशकं हि ज्ञानं दृष्टौ हि चिद्रूपं ब्रह्म जगत् प्रकाशकं तु तत्र जडत्वे
नाप्रकाशकत्वात्

ननु ब्रह्मजगतोरेवं भेदेऽपि ज्ञानज्ञेययोर्भेदे किमायातं नहि कार्यं ज्ञानं तस्य जडत्वात् नापि ब्रह्म तस्यासंगित्वेन घटा
द्यप्रकाशकत्वात् ततः कथं तयोर्भेदेऽपि ज्ञानज्ञेययोर्भेदः स्यादिति मैवं प्रकाशकं हि ज्ञानं दृष्टौ हि चिद्रूपं ब्रह्म जग
त्प्रकाशकं दृष्टं जडत्वेनाप्रकाशकत्वात् विशेषणे हीति न्याये न ब्रह्मण एव प्रकाशकत्वे पर्यवसानेन ज्ञानत्वो
पपत्तेः एतल्लब्धेदः कार्यस्य ज्ञानादेव भेद इति किं कार्यकारणप्रतिपादकत्वमात्रेण ज्ञानमस्य ज्ञानज्ञेयभेदसाध
कत्वं उत तत्प्रमापकत्वे नाद्यः विषयभेदत्वे त्यादावतिप्रसंगात् न द्वितीयः तस्य परकल्पितकारणांतरनिराकरण

विषयकर्मकभङ्गः एवं परत्वेन कार्यकारणपरत्वेन कार्यकारणभावाप्रमापकत्वादित्याह नेत्यादिना यतो वा इमानि भूतानि जायंत इति
श्रुताविमानीति तावत् भूतविशेषणं तेन नामरूपाभ्यां व्याकृतं मनसाप्यचिंत्यरचनारूपादीत्येवं भूतधर्माः समर्प्यते

सृष्टिवाक्यस्य सर्वस्य प्रधानादिपरपरिकल्पितकारणांतरनिराकरणपरत्वान्न हि द्वितीयो
कारणात् कार्यस्य भेदे मानि रूपाणि वत् ब्रह्मणः कारणात्कार्यजातस्य सर्वस्य भेदे ना
निरूपणेनाद्वितीयब्रह्मसंभावनामात्रे तात्पर्यात्

ते च धर्माः प्रधानादेरचेतनात् परिच्छिन्नात्मनो जीवाद्धिरण्यगर्भादेर्जगतः संभवेन संभवतीति यतो वेत्यादि
श्रुतिस्तेषां जगत्कारणत्वनिषेधपरेत्यर्थः ननु सृष्टिवाक्यस्य परकल्पितप्रधानादेर्जगत्कारणनिराकर
णपरत्वं नोपपद्यते समन्वयाधिकरणविरोधादिति तत्राह अद्वितीयेति अद्वितीयं विजातीयभेदशून्यं यद्ब्र
ह्म तदीयासंभावनाऽपूर्वो ज्ञस्वरूपं ब्रह्म भवितुमर्हतीत्येवं रूपा तन्मात्रे सृष्टिवाक्यस्य तात्पर्यान्नेति दृ
ष्टेनिषेधे हेतुत्वेनान्वयः संभावनायां हेतुमाह ब्रह्मणः कारणादिति अत्र दृष्टांतो मृद्घटादावि ति
भेदे हिमवद्विंध्ययोरिव कार्यकारणभावादर्शनान्न दृष्ट इति सामानाधिकरण्याच्च तयोरभेदे कार्यका
रणभावोपपत्तेरित्यर्थः॥

158

किंच प्रतिज्ञानियोगिको भेदः साध्यते भेदमात्रं वा न तावदन्त्यः तत्राविवादात् आद्यस्य तत्राह साध्ये
ति तथा च साध्यस्य पक्षविशेषणत्वस्य सिद्ध्यभावात् सिद्धेराश्रयासिद्धिरित्यर्थः अपज्ञानेन तद्विषयो
परसंरंभितो विकल्प्य मोक्षयत्नात् घटपटः यद्दितिविवादितं परस्परभेदस्य घटादावेवप्रसिद्धविशे
षणत्वेनाश्रयासिद्धिरिति तत्राह व्याप्यासिद्धेश्चेति कुतो व्याप्यासिद्धिरिति तत्राह नहीति व्याप्तिर्ना
म साध्यसाधनयोरव्यभिचरितसंबंधः संबंधस्य चोभयनिरूप्यत्वादुभयेन सता भवितव्यं तत्र सा
ध्यं न दृष्टान्तेपि सत्प्रमाणाभावात् ततः साध्याप्रतिसाध्यानन्निरूपिता व्याप्तिर्न सिध्यतीतिव्या
प्यत्वासिद्धो हेतुरित्यर्थः एतेनाश्रयासिद्धिरपि व्याख्याता केन किं मानेनेत्युक्तं विप्रस्यति
प्रत्यक्षाभाव इति प्रत्यक्षस्य भेदग्राहकत्वमुपरिष्टान्निराकरिष्यते अनुमानोत्तरं इति प्रकृतानारु
साध्याप्रतिसाध्याव्याप्यसिद्धेश्च नहि घटपटयोर्भेदः केनचिन्मानेन सिद्धः येन साध्येप्र
तिसिद्धेत प्रत्यक्षाभावेनुमानांतरानुसरणेप्यनवस्थादिदोषस्य तावदवस्थानात् आगमस्या
भेदमात्रे तात्पर्यवर्णपर्यवसन्नस्य भेदबोधकत्वे शंकितुमप्यशक्यं ननु ब्रह्मणः सकाशात्सृष्टिं
प्रतिपादयन्नागमः कार्यजातस्य तत्तोभेदमपि प्रतिपादयति अभेदे तत्तोजन्मैव न स्यादिति चेन्न
मानान्तरेणायेनानुमानेन घटपटयोर्भेदो ग्राहयिष्यते तत्रापि व्याप्तिग्रहस्तेनैव चेदात्माश्रयोन्येन
चेदनवस्थेति पूर्वोक्तदोषस्तावदस्थमित्यर्थः ज्ञानज्ञेययोर्भेदप्रमाणमागम इति पक्षं दूषयति आ
गमस्येति पूर्वोत्तरकांडात्मा ह्यागमस्तत्र पूर्वकांडस्य साध्यसाधनमुखेन संस्कारादिद्वारा अद्वितीयब्र
ह्मणोपयतात्पर्यादुत्तरकांडस्य पषट्लिंगापेतस्य पुनः साक्षादेवाद्वैतपरत्वाद्भेदबोधकत्वं शंकितुम
शक्यमित्यर्थः ननु यतो वा इमानि भूतानि जायंते इत्याद्यागमस्य द्वैताधिकरणन्यायेन ज्ञानज्ञेय
भेदः प्रतिपादकत्वात्तत्र प्रमाणमिति शंकते ननु ब्रह्मण इति ननु यतो वेत्यादिवाक्यं ब्रह्मणो
निमित्तोपादानरूपाज्जगतः सृष्टिमाह न भेदं तदप्रतीतिः ततः कथं द्वैताधिकरणन्यायेन तस्मिन्

व्यावृत्तप्रतियोग्यादिग्रहपूर्वकोभेदग्रहइति पक्षमन्यद्दूषयति व्यावृत्तेति प्रतियोगिज्ञानेभेदज्ञानेहेतुरित्य
त्रकीदृक् प्रतियोगिज्ञानंविवक्षितं निर्विकल्पकंचेन्न हिकिंचिदाकारः प्रतियोगीभेदज्ञानेभासेत ज्ञान
स्यस्वसमानाकारविषयोपस्थापकत्वादन्यथा ऽतिप्रसंगात् सविकल्पकंचेत्तत्किंभिन्नत्वेनप्रति
योग्यादिग्राहकत्वाभिन्नत्वेनवानतावदभिन्नत्वेन प्रतियोगिधर्मिणोरभेदग्राहिणः प्रमाणत्वेनोत्त
रस्यभेदग्राहकत्वेनाभिमतस्याप्रामाण्यप्रसंगात् नहुपजीव्यो जातस्य प्रवृत्तेः ततोभिन्नत्वेनधर्म्या
दिग्रहः परिशिष्यते इत्येतमर्थमभिप्रेत्यप्रतियोग्यादिविशेषयति व्यावृत्तेति व्यावृत्तीति प्रत्य
क्षान्तरस्यापिव्यावृत्तप्रतियोग्यादिविषयत्वेनविशेषणव्यावृत्तिप्रतियोग्यादिग्रहजन्यत्वात् तद्ग्रा

व्यावृत्तप्रतियोग्यादिग्रहपूर्वकत्वेहेतुः व्यावृत्तिग्राहकप्रत्यक्षान्तरान्वेषणेऽनवस्थानेनैवव्याव
र्त्तिग्रहेऽन्योन्याश्रयः तस्मात्त्वदुक्तमार्गात् प्रत्यक्षेणभेदवार्ताविजानातीतिसिद्धं अस्तुतर्ह्यनु
मानात् ज्ञानज्ञेययोर्भेदग्रहः तथाहि विमतोविषयः स्वविषयज्ञानाद्भिद्यतेतद्विरुद्धधर्मा
श्रयत्वात् योयद्विरुद्धधर्माश्रयः सततोभिद्यते यथाघटात्पटस्तथाचायं तस्मात्तथा मेवं वि
रोधस्यभेदनिरूप्यत्वेनभेदासिद्धावविरोधासिद्धौ तद्विरुद्धधर्माश्रयत्वस्याप्यसिद्धेः ॥ ॥ ॥

हकांतरस्वीकारेऽनवस्थास्यादितिस्वयंभेदग्राहकत्वाभिमतप्रत्यक्षान्तरस्यैवव्यावृत्तप्रतियोग्यादि
ज्ञानत्वेस्वेनैवस्वग्रहंजन्यत इत्यात्माश्रयापत्तिरितिदूषयति तेनैवेति अन्यत्रस्वभेदग्राहकत्वेनोर्विष
यत्वापत्तिमुपसंहारव्याजेनपरिहरति तस्मादिति एवंप्रत्यक्षस्यभेदग्राहकत्वंपराकृत्यानुमानंभेदग्रा
हकमितिपक्षमनूद्यापयति अस्त्विति स्वविषयेति विषयोघटोवज्ञानज्ञानाद्भिद्यत इतिसिद्धसाध
नमिति साध्यंविशिनष्टि स्वविषयेति तद्विरुद्धेति तस्माज्ज्ञानाद्विरुद्धोयोधर्मः जडत्वमप्रकाशत्वंत
दाश्रयादित्यर्थः असिद्धोहेतुरूपत्वेनदूषयति मैवमिति धर्मस्यविरुद्धत्वंतावद्विरोधाश्रयत्वादि
त्यविवादेविरोधस्यज्ञानज्ञेययोर्भेदज्ञानएवज्ञानुपपादकोनान्यथातन्नैतस्यचसाध्यत्वादसिद्धेो

ननूक्तदेव प्रत्यक्षं परप्रकाशं सत् स्वविषयोर्भेदं गृह्णातु न चात्र पूर्वोक्तदोषः एतत्प्रतियोगिकविषयनिष्ठभेदग्राह
कज्ञानान्तरस्यास्वीकारे परप्रकाशप्रत्यक्षपक्षे ऽनुपपत्त्यभावादिति चेन्न इदमेव प्रत्यक्षं भेदं विषयीकरोतीति प्रतिज्ञाया
घातादिति तदेव प्रत्यक्षं परप्रकाशं सत् स्वभेदं विषयीकरोतीति प्रत्यक्षो वृद्धिरेव निरसनीयः स्वप्रकाशज्ञानपक्षे
प्रतियोगिनः अन्यस्य स्वप्रकाशवेद्यत्वात् प्रतियोगिकभेदज्ञानान्तरं विषयीकर्तुं न प्रभवतीति तं पक्षमुपेत्य ज्ञानपर
प्रकाशपक्षे भेदस्य ज्ञानान्तरग्राह्यत्वं प्रसक्तमुपपादयति अस्तु तर्हीति प्रतियोगिनोऽन्यस्य प्रत्यक्षं प्रत्यक्षान्तरं तमि
मं पक्षं दूषयितुं विकल्पयति सोपीति प्रतियोग्यादिग्रहपूर्वकोन भेदग्रह इतीमं पक्षं दूषयति न चेदित्या

अस्तु तर्हि परप्रकाशज्ञानपक्षे प्रत्यक्षान्तरेणाज्ञानात् ज्ञेयस्य भेदग्रहः सोपि व्याहन्तृ प्रतियो
ग्यादिग्रहपूर्वको न वेति विवेचनीयं न चेत्कथं भेदं विषयीकुर्यात् नहि निर्दुर्मिकं निष्प्र
तियोगिकं वा भेदं कश्चित् प्रत्येति अयमस्माद्भिन्न इत्यनुभवात्॥ ॥ ॥ ॥ ॥ ॥

दिना प्रतियोग्यादिकमविषयीकृत्य किमिति प्रत्यक्षं भेदं न गोचरयति तत्राह नहीति अयमत्राशयः भे
दग्राहिप्रत्यक्षं निर्विकल्पकं सविकल्पकं वा न तावन्निर्विकल्पकं भेदस्य सम्बन्धविषयादिवत् सविकल्पकैकवेद्यत्वा
त् सविकल्पकं चेत् तर्हि सविकल्पकं प्रमेयत्वेन भेदं विषयीकरोति भेदत्वेन वा न तावत्प्रमेयत्वेन निःप्रयो
जनत्वात् नहि प्रमेयत्वेन जलज्ञानेपि पिपासुस्तदुपादाने प्रवर्तते नापि भेदत्वेन धर्मप्रतियोगिज्ञानं विना भे
दत्वेन भेदग्रहस्य दुर्निरूपत्वात् भेदस्य तत्सापेक्षैकरूपत्वादिति इममेवार्थमभिप्रेत्याह अयमस्मादिति॥ ॥

नहि तृतीय इत्याह स्वयंप्रकाशेति भविष्यत्ज्ञानस्य प्रतियोगिस्वज्ञानस्य न स्वप्रकाशत्वमवर्त्तमानत्वात् तथा च तद्विषयक
स्य भेदज्ञानस्यानुपपत्तिरिति शंकित्वा परिहरति अवर्त्तमानस्येति परप्रकाशत्वे ज्ञानस्यावर्त्तमानत्वे हेतुर्वदता व
र्त्तमानत्वे ज्ञानस्य स्वप्रकाशत्वमित्यर्थादुक्तं भवति तत्र ज्ञानस्य स्वप्रकाशत्वे वर्त्तमानत्वं प्रयोजकं ज्ञानत्वं वा
आद्यं दूषयति वर्तमानकालेति तथा च ज्ञानस्य स्वाभाविकस्वप्रकाशत्वानंगीकारप्रसक्तिरिति भावः द्वितीये
पूर्वदोषानतिक्रम इति शंकोत्तराभ्यामाह वर्तमानेति तथात्वापत्तेः स्वप्रकाशत्वापत्तेः ज्ञानत्वाविशेषादि
त्यर्थः इदमर्थमर्थान्तरन्यासेनाह नहीति अतीतानागतयोरपि ज्ञानत्वमेवमास्तु इत्याशंक्याह नहीति स्वभा
वत्यागप्रसंगादित्यर्थः विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्वपक्षे भेदस्य च विशेषणत्वेन भानपक्षे विशेषणा

अवर्त्तमानज्ञानस्य परप्रकाशत्वे वर्त्तमानकालोपाधिकं स्वप्रकाशत्वमिति स्यात् वर्त्तमानकाले
ज्ञानस्वरूपमेव स्वप्रकाशमिति चेन्न अतीतानागतयोरपि तथात्वापत्तेः नहि घटः कदाचिदघ
टः इति स्यात् इंद्रियसन्निकर्षाश्रयस्य भेदस्य सत्तामात्रेण स्वविषयकज्ञानजनकत्वमित्यपि प्रक्रिया
मात्रं प्रमाणाभावेन सत्तामात्रस्याप्यसिद्धेः ॥ ॥ ॥

ज्ञानं विशिष्टज्ञानादन्यदिति पक्षोपेत्येनैव निराकरणेन निरस्तत्वमिति पृथक् दूषितमिति बोद्धव्यं इंद्रियसन्निक
र्षाश्रयो भेदः स्वसत्तामात्रेण स्वविषयकप्रत्यक्षं जनयतीति पक्षमनूद्य दूषयति इंद्रियसन्निकर्षेति ननु प्र
त्यक्षे प्रत्यासत्तिर्भासते प्रत्यासत्तिश्च भेदेंद्रिययोर्यथा प्रत्यक्षं विशेषणविशेष्यतानवज्ञानं ततः किमिति भेदस्य
स्वरूपसत एव स्वज्ञानं प्रति जनकत्वं प्रक्रियामात्रमिति तत्राह प्रमाणेति अत्र विशेषणविशेष्यता प्रत्या
सत्तिः सानुमता भवति नान्यथा: सत्वं च भेदस्य प्रमाणाधीनमिति कथं न भेदविषयकप्रत्यक्षात् भेदस
त्ताग्राहि प्रमाणं स्यादिति तदभावान्न भेदसत्ता इति असन्भेदः कथं ज्ञानं जनयेदित्यर्थः सत्ताभावे
न नितरां विशेषणविशेष्यता प्रत्यासत्तिरपीति द्योतयितुमपि शब्दः घटोयमिति प्रत्यक्षमेव स्वप्रकाशं स

स्वविषयभेदं गृह्णातीति पदान्न संभवतीत्युक्तम्॥

ॐ
वे मु॰ टी
३२

स्वविषयेत्यादिना स्वेनैव स्वजननेन कोदोषइत्यत आह तथाचेति इत्थंच अधीनेन कारणत्वेनस्वोयत्तया
दित्यर्थः आत्माश्रयदोषपरिहारार्थं प्रत्यक्षं स्वभेदं विशेष्यत्वेन गृह्णातीति पक्षमुत्थाप्य ति विशेष्य
त्वेनभानइति भेदस्य विशेष्यत्वेन ग्रहणं घटधर्मिप्रतियोगिनो भेदं प्रति विशेषणत्वं तत्र प्रतियोगिप्रत्य
प्रत्यक्षं स्वप्रकाशत्वेन भाति घटोधर्मि स्वमानतः ... भातीति तज्ज्ञानत्वेपि विशिष्टभेदस्य प्रत्यक्ष
स्य स्वजनन्यत्वात् आत्माश्रय इत्यर्थः स्वमात्रविशेष्येन्द्रियसन्निकर्षजन्यं ... आत्माश्रयं विशेषणविशेष्या
भयेन्द्रियसन्निकर्षजन्यत्वपक्षपदं दातुं पक्षमुत्थापयति विशेषणेति अस्मिन्पक्षे आत्माश्रयं दातुं

७४

भूमिकामाह ज्ञानोत्पत्तेरिति अयमर्थः भेदग्राहकप्रत्यक्षस्य भेदेन्द्रियसन्निकर्षजन्यत्वपक्षे भेदस्य वि
शेषणत्वेन विशेष्यत्वेन वा भाने भेदेन्द्रियसन्निकर्षोपेक्षणीयः पूर्वकल्प्यः भेदसन्निकर्षस्य विशिष्टभेदग्राहकप्रत्यक्ष
स्वविषयविशेषणत्वेन भेदस्यभाने विशिष्टज्ञानस्य विशेषणज्ञानजन्यत्व पक्षेस्वेनैव भेद ... विशेषवि
षयेनस्वजन्यत्वेइतिप्राप्ते तत्राप्यात्माश्रयः विशेष्यत्वेन भेदस्यभाने विशेषणाविशेष्येन्द्रियसन्निकर्ष
मात्रं विशिष्टज्ञानकारणमिति पक्षे ज्ञानोत्पत्तेः पूर्वं भेदोस्तीतिवाच्यं तथाच तस्यैव ज्ञानस्यक
र्यस्य भेदो विषयः स्यात् तोत्पत्तेः पूर्वं तस्यैवाभावात् ज्ञानांतरस्य च स्वयंप्रकाशज्ञानावि
षयत्वेनकत्वात् इन्द्रियसन्निकर्षस्य भेदाश्रयत्वाच्च तदर्थं पूर्वं भेदसत्ता अपेक्षितत्वेन तत्प्रतियोगिकभेदाविषयत्वात्
वक्तव्येति भवत्वेवं भेदसत्ता पूर्वं तया सति किं स्यादित्यत आह तथोचेति इदमत्राकूतं इन्द्रियसन्निकर्षाश्र
श्रयो भेदः स्वग्राहकप्रत्यक्षं किं ज्ञातः सन् जनयति सत्तामात्रेण वा ज्ञातश्चेत् तज्ज्ञानं किं मेतदेव ज्ञानं
ज्ञानांतरं वा आद्ये दूषयति तस्यैवेति स्वप्रतियोगिकविषयधर्मिकभेदग्राहकत्वेनाभिमतस्य प्रत्य
क्षस्यैव कारणीभूतभेदो विषयो न संभवेदित्यर्थः तत्र हेतुमाह स्वोत्पत्तेरिति भावेचा... आत्माश्रय इत्य
र्थः भेदग्राहकत्वेनाभिमतविशिष्टज्ञानोत्पत्तेः प्राक् भेदज्ञानं ज्ञानांतरमेवेतित्यात्माश्रयदूषणमभिप्र
त्य पक्षांतरमुत्थाप्य दूषयति ज्ञानांतरस्यचेति अयमत्राशयः तज्ज्ञानांतरं किं निर्विकल्पकं सविक
ल्पकं वा नाद्यः भेदस्य सविकल्पकैकवेद्यत्वात् ॥ ॐ नमः कमलदललविपुलनयनाभिरामाय ॥ ॥

ना

तत्रेति प्रत्यक्षप्रमाणसद्भावपक्षे ऽयं घटोयमिति प्रत्यक्षं स्वस्मात् घटोयमित्याकाराज्ज्ञानस्वरूपात् घटस्य भेदं घटधर्मि-
णः संबंधिनं भेदं विषयीकरोति प्रमापयति प्रकाशयतीत्यर्थः आत्माश्रयप्रसक्तेर्विकल्पांतरमाह प्रत्यक्षांत-
रेणेति अयं घट एतद्विषयकज्ञानाद्भिन्न इति प्रत्यक्षं प्रत्यक्षांतरशब्दार्थः आयमनुवदति स्वयमेवेति स्वविषय

प्रत्यक्ष॰ २ मेदमिति स्वप्रतियोगिकं विषयधर्मिकं भेदमित्यर्थः आद्यं निराकर्तुं तदुपयोगिविचारांतरमाह तत्किमिति
पूर्वोक्तं प्रत्यक्षं स्वप्रकाशं स्वेनैव स्वसद्भावं परोक्षव्यवहारयोग्यं परप्रकाशं वेद्यमित्यर्थः घटोयमिति प्रत्यक्षं स्वप्र-

प्रत्यक्ष॰ २ प्रकाशं सत्स्वस्मात्स्वविषये संबंधिनं भेदं स्वयमेव गृह्णातीति आद्यमनूद्य दूषयति तत्राद्य इति तत्राद्ये
पक्षे इत्यन्वयः तत्र स्वप्रकाशपरप्रकाशयोर्मध्ये इत्यर्थः इति भावः परामर्शमाह स्वेनैव स्वस्य जन्मनेति कि

घटधर्मिक॰ २

त्र
तत्र घटोयमिति प्रत्यक्षमिदमेव स्मात् घटस्य भेदं विषयीकरोति प्रत्यक्षांतरं वा स्वयमेव स्व
विषयभेदं गृह्णाति प्रत्यक्षं चेत् तर्हि किं स्वप्रकाशं परप्रकाशं वा तत्राद्ये ॥श्रीरामचंद्राय॥

किमिति स्वेनैव स्वस्य जननमिति तदर्थमिदं विचार्यते प्रत्यक्षं स्वभेदं घटनिष्ठं यावद् गृह्णाति विशेष्यं घटं प्रति
विशेषणत्वेन भेदं गृह्णाति यन्नाभिन्नो घट इति उत नहु घटो भेद इति स्वभेदं विशेष्यत्वेन यदि स्वविष-
य विशेषणत्वेन स्वप्रतियोगिकं भेदं प्रत्यक्षं गृह्णातीति पक्षस्तदापीदमालोचनीयं किं विशिष्टज्ञा-
नं विशेषणज्ञानविशेष्येंद्रियसन्निकर्षजन्यं किंवा विशेषणविशेष्याभ्यामिंद्रियसन्निकर्षजन्यं
विशेषणज्ञानजन्यं विशिष्टज्ञानमिति पक्षेपीत्यं विचारणीयं विशेषणस्य भेदस्य ग्राहकं ज्ञानं किं
मिदमेव यत्स्वप्रत्यक्षं भेदग्राहकत्वेन संप्रतिपन्नं तदेव उत ज्ञानांतरं यदि तदेव न हि विशिष्टज्ञानं स्वस्मा-
त्स्वविषयस्य भेदग्राहकत्वेन संमतं यत्तदेव विशिष्टज्ञानजनकत्वेनाभिमतविशेषणज्ञानेन तदेवैतज्ज

किमिदमित्यपेक्षायामाह प्रतीतिमात्रेति प्रातीतिकसत्वमितियत्प्रतीतिमात्रं प्रतीतिरेव सत्वमिति मतं चेद्यदीत्यन्वया
दः इमं पक्षमविरोधात्स्वीकुरुते अविरोधादिति यथोक्तपक्षाङ्गीकारे ज्ञानज्ञेययोर्भेदाभावे ज्ञानस्यैवज्ञेयसत्वमिति
तत्राह नद्वेदृ इति ज्ञानज्ञेययोर्भेदे इत्यर्थः काप्रमेति किंशब्दः आक्षेपे प्रमाप्रमाणमित्यर्थः तत्र ज्ञानज्ञेय
योर्भेदे प्रमाणं न किंचिदित्यर्थः श्लोकं व्याख्यातुं भूमिकामाह प्रतीतीति कार्येत्युक्तं विभावयति किं प्रतीति
रेवेति ज्ञेयं तु प्रतीतिरेव तत्स्तयोरभेदात् ज्ञेयसत्ता प्रतीतिरेवेत्यर्थः विकल्पांतरमाह किं वेति जगतो
ज्ञानाद्व्यतिरेकेणाभेदेन सत्वं किं इत्याशंकाया ज्ञानस्य जगतस्तत्वं किं भिन्नमस्तीति द्वितीयविकल्पार्थः सत्वभेदे हे
तुमाह प्रतीतिव्यतिरेकेणेति जगत इत्युभयत्र संबध्यते ज्ञानज्ञेययोर्भेदात्तत्सत्वयोरपि भेद इत्यर्थः आद्यमंगी

प्रतीतिमात्रं सत्वं चेत्तत्वं प्रातीतिकं मतं अविरोधात्ममापीष्टं न द्वैदृक् काप्रमा ॥ १२ ॥ प्रतीतिम
कालीनं सत्वं जगत इति कोर्थः किं प्रतीतिरेव सत्वं किं वा प्रतीतिव्यतिरेकेण जगतः पृथक् सत्वम
स्ति अंत्येत्र प्रमाणमस्ति न वा अस्ति चेत्तत्र किं प्रत्यक्षमनुमानमागमो र्थापत्तिर्वा प्रत्यक्षमिति
चेत् ॥ ॥

करिष्यमाणत्वादित्यभिप्रेत्यंभूषयति अंत्येत्वत्रेति अंत्ये अंगीकृते त्वन्वस्मिन्पक्षे हेतुत्वेनोपन्यस्तज्ञानज्ञेययोर्भेदइ
त्यर्थः न चेत्प्रमाणं ज्ञानव्यतिरेकेण जगतः पृथक्सत्वे ततः प्रमाणाभावादेव ज्ञानज्ञेययोर्भेदस्तत्कृतसत्वभेदो
पि न सिध्यतीति स्पष्टत्वाद्बहिरेवांतिमप्रमाणाभावपक्षं निराकृत्य विस्तरेणाद्यं प्रमाणसत्वपक्षं निराकर्तुमनुवद
ति अस्ति चेदिति प्रमाणमिति शेषः प्रमाणसत्वपक्षं दूषयितुं विकल्पयति तत्रेति तत्र प्रमाणसत्वपक्षे किं प्र
त्यक्षं चेत्तान् विकल्पानाह प्रत्यक्षमित्यादिना उपमानस्य तुपि न विषयत्वादनुपलब्धेश्चाभावमात्रगोचर
त्वान्नेयोरन्वयत्यासः प्रत्यक्षं ज्ञानज्ञेययोर्भेदे प्रमाणमितिपक्षं दूषयितुमनु

प्रा ३५५=२

वेदान्तमुक्तावली

ननु भवतु ब्रह्मणि पूर्वकांडस्य तात्पर्यं तथापि तत्र प्रामाण्यं कुतस्तत्राह तात्पर्यार्थ इति पतत्रः प्राच्यः सुखाकार्थ इतिन्यायादि
त्यर्थः जगतोऽज्ञानमूलकत्वे यत्तानेकोपि दोषः प्रसरति तस्मादित्युपसंहरति तस्मादिति आविद्यकत्वसाधनहायग
तःप्रातीतिकसत्त्वसाधनोपयोगमाह अत इति अविद्या हि प्राणिकर्मवशात् इच्छायां सत्यां जगदाकारेण तत्प्रतीत्या
कारेण च युगपदेव परिणामे नियामकाभावात् क्रमपरिणामे प्रयोजनाभावाच्च हृतेस्त्वविषयजनकत्वानंगीकारा
दाकार्यकत्वस्याजनकत्वे ऽनुपपत्तेस्ततः प्रतीतिसमकालीनमेव विषयसत्त्वमुचितमित्यर्थः विमतः प्रपंचः प्रतीति

रवकासिक्तताम्र
न्=७

तात्पर्यार्थे प्राक् उक्तप्रामाण्यात् तस्मादविद्यायोनित्वं भावानां स्फुटं उक्तं अतोऽविद्या
कल्पितस्य जगतः प्रतीतिसम कालीनमेव सत्त्वमुचितं रज्जुसर्पस्फूर्तिरजतगंध
र्वनगरस्वप्नप्रपंचेषु तथादर्शनात् अथैवं निरूपणीयम् ॥ ॥ ॥ ॥ ॥

मात्रकालीनः अविद्योपादानत्वात् रज्जुसर्पादिवदित्यभिप्रेत्य दृष्टान्तमाह रज्जुसर्पेति साध्यसाधनवैकल्यं दृष्टां
तेपरिहरति तथेति एतच्चोपपादितं पुरस्तात् प्रतीतिमात्रकालीनं घटादावित्युक्तं यतः रज्जुसर्पादिकं पद्ध
त्वयाचेदं तत्तथा प्रतीतिमात्रकालीनं जगदुत्पत्त्यादि निरूपितं प्रतीतिव्यतिरेकेण सत्त्वं ज्ञानस्य निवार्यते ननु
प्रतीतिसमकालीनं जगतः सत्त्वमुचितमित्युक्तं तच्चैकं जगतः सत्त्वमपरं ज्ञानस्येति सत्त्वद्वयं प्रतिभाति नहि
घटमात्रकालीनस्य पटस्य घटान्यातिरिक्तं सत्त्वं युगपदुत्पन्नविनष्टयोः घटपटयोर्भेदेनैकसत्ताकत्वाभावात् ततश्च
ज्ञानज्ञेययोः विभिन्नत्वात्सत्त्वैकत्वं न युक्तमित्याशंक्याह अथैवमिति प्रतीतिके जगतः सत्त्वद्वयं द्विरूपं यद्वक्ष्यमाणं॥

कुतः प्रामाण्यानुपपत्तिमाह तस्यापीति अयमर्थः पूर्वकांडस्य स्वर्गयागयोः साध्यसाधनमात्रे पर्यवसन्ने उत्तरस्य तत्प्रतिपादनद्वारेण ब्रह्मणि पर्यवसन्नं नाद्यः अध्ययनविधिविरोधात् तथाहि अध्ययनविधिर्हि प्रयोजनवदर्थज्ञानोद्देशेनाध्ययनं विधत्ते नच यागस्य प्रयोजनवत्ता स्वर्गादेः क्षयिष्णुत्वेन प्रयोजनाभासत्वात् तत्साधनयागस्य पारमार्थिकप्रयोजनसाधनत्वानुपपत्तेः तात्पर्यमात्रपरत्वे पूर्वकांडस्याध्ययने कथं नाध्ययनविधिविरोधः नह्यध्ययनविधिर्हेवर्णिकान्प्रतारयति तस्मात्साध्यसाधनमात्रे पूर्वकांडपर्यवसानमिति रिक्तं वचः द्वितीयेन प्रामाण्यानुपपत्तिरित्यभिप्रायेणाह साध्येति तस्य पूर्वकांडस्य ब्रह्मण्येव तात्पर्यान्न प्रामाण्यानुपपत्तिरिति पूर्वेणान्वयः ननु पूर्वकांडात् ब्रह्मा प्रतीतेः कथं तत्परतेति तत्राह साध्येति मुखेन द्वारेणेत्यर्थः पूर्वकांडं हि साध्यसाधनभावं यागस्वर्गादेः बोधयति तद्बोधनाच्च पुमान्कर्माण्यनुतिष्ठति अनुष्ठितानि च कर्माणि ब्रह्मज्ञाने साधयंतीति तादृक्कर्मबोध

प्रवृत्ति द्वारेण

तस्यापि साध्यसाधनाभावमुखेन सत्वशुद्धिद्वारेणावबोधे ब्रह्मण्येव तात्पर्यात्

कपूर्वकांडस्य ब्रह्मपरतापरंपरया युज्यत इत्यर्थः ननु उपनिषदामेव तादृक्ज्ञानसाधनत्वात् न तादृक्ज्ञानं प्रति कर्मणां साधनतेति तत्राह सत्वशुद्धिद्वारेणेति सत्वशुद्धिर्हि तावज्ज्ञानांगं ज्ञानमुत्पद्यते पुंसां क्षयात्पापस्य कर्मण इत्यागमात् सत्वशुद्धिः कर्मभ्यः कषाये कर्मभिः पक्वे इत्यागमात् तत्सत्वांतःकरणशुद्धिद्वारा कर्मणां ज्ञानोपयोग इति तद्बोधकपूर्वकांडस्य ब्रह्मपरतेति भावः ननु फलत्वान्नित्यकर्मणां भवतु शुद्धिहेतुता काम्यकर्मणां तु फलांतरावबोधात्कथं शुद्ध्यर्थतेति न कर्मणा पितृलोक इति श्रुतेर्नित्यानामफलत्वासिद्धेः संयोगपृथक्त्वन्यायाच्च संस्कारार्थत्वाविरोधात् विविदिषापदमाश्रित्य तापरिहरति प्रवृत्तिद्वारेणैवेति अयमत्रार्थः उत्पत्तिवाक्यविहितानि तावत्कर्माणि तेषां च फलाकांक्षावस्थायामधिकारविध्यंतरप्रवृत्तिर्वक्तव्ये नेत्यादि फलविधायकवाक्यप्रवृत्ते स्तस्य च ब्रह्मानुभवकामो यागादीननुतिष्ठेदित्यर्थकत्वात्कर्मणामविशेषेण तत्तानुभवसाधनत्वप्रतीतेः साध्यात्कर्मसाध्यत्वमस्तु ज्ञानस्य ब्रह्मापरोक्षज्ञानप्रवृत्तये नेवाधारेणावतरणात्पायेन ज्ञानसाधनमूर्त्तिप्रवृत्तिद्वाराकर्मणां ब्रह्मज्ञानार्थत्वागमात्तादृक्कर्मबोधकवेदराशेः

एकस्य तूभयत्वे संयोगपृथक्त्वमिति जैमिनिसूत्रं तदर्थस्तु एकस्य कर्मणः उभयत्वे अनेकफलसंबंधे संयोगः उभयसंबंधबोधकं वाक्यं तस्य पृथक्त्वं भेदः सहेतुः तत्र ज्योतिष्टोमादिकर्मणां स्वर्गादिफलकानामपि यज्ञेनेत्यादिवचनात् ज्ञानार्थत्वं च नित्यकर्मस्वरूपमात्रको विधिरुत्पत्तिविधिः यथा सोमेन यजेत २ फलसंबंधबोधको विधिरधिकारविधिः यथा ज्योतिष्टोमेन स्वर्गकामो यजेतेति तत्र =२

तर्हि मायोपादानत्वं सिद्धमित्याह एवं चेदिति कार्यानुरूपं कार्यसदृशमित्यर्थः सादृश्यमुपपादयितुं अनिर्वचनीयेत्युक्तानतिरो
षत्वं शुक्तिज्ञानस्य सादित्वेनत्याविद्योपादानान्तरप्रसक्तिं वारयति अनादीति कार्यानुरूपमिति विशेषणस्य चितं हेतुमाह सत्यत्वेति
विलक्षणत्वादित्यर्थः चेतनत्वेपि कार्यकारणभावः किं न स्यात् दृश्यते हि सत्याच्छुक्तेः रजतादेरसत्यस्य कारणमिति तत्राह लोक
इति शुक्त्यज्ञानमेव रजतादेः कारणं न शुक्तिर्बाधकाले कार्यप्रसक्तेरित्यर्थः यदुक्तं पूर्वपक्षे कारणवैचित्र्याभावे कार्यवैचि
त्र्यं न स्यादिति तत्र दूषणमाह न चेति उक्तमिति विचित्रशक्तिकमेकमज्ञानमादाय विश्राम्यतीति युक्तमित्यत्र न चाविद्यै
व कारणमिति पक्षे चेतनाधिष्ठानमन्तरेणाऽजडशक्तेः कार्यकरत्वानुपपत्तिरिति वाच्यं अधितिष्ठन्तोनामचेतनो विद्यांतथापिना

एवं चेत्तर्हि कार्यानुरूपानाद्यनिर्वचनीयाज्ञानमेव कारणमुचितं सत्यस्यासत्यहेतुत्वानुपपत्तेः लोके तथा-
दर्शनात् न च कार्यवैचित्र्यानुपपत्तिः विचित्रशक्तिकस्यैवाज्ञानस्य कल्पनादित्युक्तं न च पूर्वकाण्डस्याप्र-
माणत्वानुपपत्तिः ॥

विद्यामात्रोपादानत्वं भावानां निरुध्यते तस्याविनिगमकत्वात् चेतनगताविद्याधिष्ठानत्वस्याविद्यालक्षणाधिरेव यस्या-
पेक्षत्वेनाविद्याकत्वाद् विद्यामात्रकारणतानादानाच्च एतेनादृष्टादिसापेक्षाविद्या कार्यं करोतीति पक्षे लाघवादृष्टा-
दिकमेव कारणमस्तु किमविद्ययेति निरस्तं अदृष्टादेराविद्यकत्वेन तत्कारणत्वेनाविद्याया एव कारणत्वात्
एतेनादृष्टादेर्घटाद्युपादानकत्वात् किमविद्ययेति परास्तं घटाद्याकारपरिणामाया अविद्याया एव तत्राप्युपादा-
नत्वात् तस्मादाविद्यक एव प्रपंच इति निरवद्यं मिथ्याप्रपंचविषयत्वे प्रत्यक्षादेर्लौकिकप्रमाणस्य मिथ्यात्वे
न स्वर्गयागसाध्यसाधनभावग्राहकत्वे पूर्वकाण्डस्य च प्रमाणतानुपपत्तिरित्याशंक्याह न चेति लौकिकप्रत्य-
क्षादेरकल्पितस्य प्रमाणत्वादेव प्रामाण्यानुपपत्तिर्न दोषायेति तदुपेक्षणं इत्यभिप्रेत्याह पूर्वकाण्डेति ॥

असत्पक्षमनूद्य निराकुर्वन् द्वितीयं चरणं व्याचष्टे असच्चेदिति स्वकारणसंबंधनिरूपकत्वं स्वसत्तास
मवायाधारत्वमसतो जनि शशविषाणमस्ति न वा न चेत्कथमसज्जायते अस्ति चेत्तदा दूषयति तर्ही
ति ननु कथं शशविषाणं जायतां तत्सामग्र्या अभावादिति तत्राह कारणव्यापारादिति असतो घटादेर्या
सामग्री सैव शशशृंगस्यापीति तद्विजातीयतामिन्नार्थः नन्वसत्त्वं हि सामग्री का घटशशशृंगसामग्री ति
योर्भेदादिति तत्राह असत्त्वेति भेदधर्मित्वे सत्त्वप्रसंगान्नासत्त्वं घटः शशशृंगादेरनुमर्हतीति तत्सामग्र्य
शशशृंगसामग्रीति कथं तदुत्पत्तिरित्यर्थः ननु नास्माकं मते सत्कार्यं किंतु प्रागसदिति कथं तत्र
कारणादिसंबद्धमिति चेन्न असतः प्रागिति विशेषणायोगात् योगे वा प्रागपि विशेषणोऽपि तथा
स्यादिति अद्यमनुवदति सच्चेदिति कारणव्यापारवैयर्थ्यापत्त्या दूषयति किं कारणेति का

असच्चेत्तर्हि शशविषाणामपि कारणव्यापाराज्जायेत असत्त्वाविशेषात् सच्चेत् किं
त्वा·
कारणव्यापारेण पूर्वमपि तस्य सत्त्वात्कार्यत्वव्याघाताच्च अभिव्यक्तिमात्रं कारणव्यापारात्त्वा
यत इति चेत् न तत्रापि सत्त्वासत्त्वविकल्पग्रासत्रासानपायात् अस्तु तर्हि सदसद्विलक्षणमनि
र्वचनीयमेव कार्यं ॥ ११

रणव्यापारो हि कार्यसत्त्वाय तच्चेत्कार्यं कारणव्यापारात्पूर्वमेव सत् किं
किं कारणव्यापारेण सतो हि पुनः सत्त्वस्य संपादयितुमशक्यत्वादित्यर्थः न केवलं कारणव्यापारवैय
र्थ्यं सत्कार्यपक्षे किंतु घटादेः कार्यत्वमपि न स्यादिति हेत्वंतरमाह कार्यत्वेति नियतपश्चाद्भावित्व
स्य कार्यत्वात्पूर्वमपि तस्य सत्त्वे पश्चाद्भावित्वरूपविशेषणाभावात्कार्यत्वं व्याहन्येतेत्यर्थः एते
नाद्यचरणो व्याख्यातः कारणव्यापारसार्थक्याय प्राक्तने अभिव्यक्तीति कार्यस्यासतो जनेरनु
पपत्तेः सत्त्वं तु युक्तमिति पक्षोऽपि द्वितीयो निरस्तो वेदितव्यः अनिर्वचनीयपक्षमुत्थापयति अस्तु
तर्हीति अनिर्वचनीयत्वे कुत इत्याशंक्य हेतुगर्भविशेषणमाह सदसदिति पूर्वोक्तयुक्त्या इत्यर्थः

सत्=२ विस्मिन्=५

अविद्याकारणत्वं कथं सिध्यतीत्यपेक्षायां वक्ष्यमाह यदेति कार्यं किं निर्वचनार्हं उत न यदि निर्वचना
र्हं तत्किमात्मवत्सत्वेन उत शशविषाणवदसत्वेन नोभयथापि निर्वचनार्हता कार्यत्वहानेरित्याह सत्वइति ।
स्वसत्तासंबंधोहि जनिः न च स्वसत्तासंबंधवति सति सत्तासंबंधापेक्षा वेयर्थ्यादित्यर्थः उत्पत्तिमद्धि कार्यं न च स
र्वदासदुत्पत्तिमत् ततः प्रपंचस्य सत्वेनैव निर्वचने कार्यत्वं न स्यादित्यर्थः एवं सत उत्पत्तिं निरस्यति दृष्टांतेना
सतोपि तां निरस्यति एवमिति स्वसत्तासमवायः स्वकारणसंसर्गो वा जनिः न चासतः संबंधाधारत्वं संबं
धनिरूपकत्वं च संभवति दृष्टत्वात् ततः प्रपंचस्यासत्वेन निर्वचने उत्पत्तिमत्वासंभवे कार्यत्वहानेर्न तत्वेन
निर्वचनार्हतेत्यर्थः अस्तु तर्हि सत्वासत्वाभ्यां प्रपंचस्य निर्वचनार्हतेति चेत्तत्र किमेककाले उभयधर्मित्वं का
लेवा नाद्य विरोधात् न द्वितीय सत्वासत्वयोः कालोपाधिकत्वप्रसंगेन स्वाभाविकत्वप्रसंगात्कालभेदे
न वस्तुनोद्वैरूप्यासंभवाच्च ततः सदसत्वाभ्यामपि न युक्तिमानिति च कारार्थः निर्वचनानर्हं सदसद्विल
क्षणं कार्यमस्तु तथा च न पूर्वोक्तदोषप्रसंग इति यद्वि द्वितीयः पक्ष उत्तरत्रोक्तस्तस्मिन्पक्षे प्रपंचस्य

यथा सतोऽनिर्वचमसतोऽपि तन्निर्वच जन्यत्वमेव जन्यस्य आयिकत्वसमर्थकं १६ किमिदं का
र्यं सत्यमसत्यं वा नाद्यः एकमेवाद्वितीयमिति अद्वैतमात्रपर्यवसितागमविरोधात् अनुपप
त्त्योपादानत्वानुपपत्तेः कार्यकारणयोर्वैलक्षण्यात् (अन्य तथाहि किमुत्पत्तेः पूर्वं कार्यं सदसद्वा ।।
र्शनात् योग्ययोर्येन संबंधोऽत इतिन्यायेनास्यानिर्वचनीयमेव कारणं युक्तं सर्वे चाविद्येत्यविद्योपा
दानत्वं प्रपंचस्य कार्यत्वमेव कल्पयतीति मत्कारणत्वाभिधानमुचितमित्याह जन्यत्वमेवेति श्लोकं व्या
कर्तुं कार्यस्वरूपं पृच्छति किमिति कार्यं निर्वचनीयमुतानिर्वचनीयमिति किं शब्दार्थः निर्वचनीयपक्षं द्वे
धा विकल्पयति सत्यमित्यादिना सदसदात्मकत्वस्य विरोधादनुपन्यासः कार्यसत्वं पारमार्थिकं यद्वा
असत्यं तुच्छमिति विकल्पार्थः पारमार्थिकत्वपक्षं दूषयति एकमेवेति एवकारः स्वगतभेदनिरासा
र्थः तथा च सजातीयविजातीयस्वगतभेदशून्याद्वैतमात्रे उपक्रमोपसंहारादिना पर्यवसितागमवि
रोधान्न कार्यं पारमार्थिकमिति इत्यर्थः ननु मतिकैत्वे वसत्वमिति प्रपंचं सत्यत्वप्रतिपादको व्यागमो
स्तीति कथमसत्यता प्रपंचस्येति चेत्सत्यं न स्यपूर्वोक्त श्रुत्या वद्यमाणानुपपत्तिलक्षणतर्कसना
थयाबलवत्या विरोधेनान्यपरत्वादित्यभिप्रेत्य प्रपंचस्य सत्यत्वेऽनुपपत्तिमाह अनुपपत्तेश्चेति प्रति

उत्पत्तिं=५

सत्वासत्वयोः

विद्यायाः

सत्यत्वं:

१७०

स्वर्गादेः=२

ननु वेदान्तप्रामाण्याय भावनामविद्यायोनित्वं वाच्यमिति तत्राह यथा चेति भावनामविद्यायोनित्वाभावे सती
त्यर्थः घटपटादेरविद्यकत्वेमिथ्यार्थविषयत्वे लौकिकप्रमाणात्प्रवृत्तिरन्तरेण न वेदप्रामाण्यं न स्यात्स्वर्गादि
यागादीनां चाविद्यकत्वे तत्तद्धर्मसाधनत्वेन प्रत्यक्षादिविषयत्वात् द्वैतविषयपूर्वकाण्डप्रामाण्यं न
स्यात् भावनामनाविद्यकत्वे तु स्यादेव लौकिकवैदिकप्रामाण्यमिति भावनामनाविद्यकमेव वक्त
व्यमित्यर्थः मास्तु तेषां प्रामाण्यमिति तत्राह अन्यथेति ततो वेदप्रमाविषयकं जगदादिवैदिकः२

तथा च प्रत्यक्षादेर्लौकिकस्य प्रमाणस्य पूर्वकाण्डस्य च पुत्रपशुस्वर्गादिकं प्रति यागादेः साधन
ताबोधकस्य प्रामाण्यं समर्थितं भवति अन्यथा लोकवेदविरुद्धः कं पक्षमवलंबेत तस्माद
विद्यामात्रकारणकं जगदिति साहसमात्रं अत्र वदामः॥ ॥ ॥ ॥ ॥ ॥

र्वकाण्डप्रामाण्यास्वीकारात् नापि बौद्धः प्रत्यक्षाद्यप्रमाणवादित्वात् ततश्चोभयभ्रष्टत्वात् कं पक्षमवलं
बेतामित्यर्थः नच प्रपंचस्याविद्यकत्वे वेदशिरसां प्रामाण्यं जपाद्यर्थत्वेन प्रामाण्योपपत्तेरि
ति यस्मात्तु चित्रानुपपत्तिः यतश्चाविद्याजडाशक्तिर्यतश्च प्रत्यक्षादिप्रामाण्यं ततो भावनामवि
द्यामात्रयोनित्वं न युक्तमित्युपसंहरति तस्मादिति सिद्धांतयति अत्रेति यद्यपि मृदादिकारणत्वमप
हायाविद्याकारणत्वाभिधानमनुचितमिति अत्रास्मिन्पूर्वपक्षे अविद्याकारणत्वाभिधाने कोऽचित्यंति

भवतु मृद्वादावन्वयव्यतिरेकादिप्रमाणसिद्धकार्यकारणभावः किंस्यादित्यत आह तथा चेति किंच कारण
त्वेनाविद्यैवोपसंहर्तव्येति अत्रैव कारणमविद्यातोऽन्यत्र मृदादौ कारणत्वयोगव्यवच्छिन्नति अविद्यायां कारण
त्वायोगं वा नोभयथापि संभवतीति दूषणांतरमाह किंचेति इतरनिरपेक्षेति मृद्दण्डकुलालादृष्टेश्वरादिनिर
उ पेक्षेत्यर्थः अयोगव्यवच्छेदपक्षमाह उतेति ईश्वरादित्यत्रादिपदेन मृदादिकारणांतरग्रहः अन्ययोगव्यवच्छे
दपक्षमादिमं निराचष्टे नाद्य इति हेतुमाह कार्येति अविद्यैव चेत्कारणं वियदादिप्रपंचलक्षणं विचित्रं नाव
त नानूपं न स्यात् तत्र हेतुः कारणेति एकस्माद्विचित्राद्वनेकं कार्यं न स्यात् सामग्रीभेदस्य कार्यभेदप्रयोजकत्वादि कारणभेदस्य

तथा चान्वयव्यतिरेकादिसिद्धं मृदादिकारणत्वमपहायाविद्याकारणत्वाभिधानमनुचितमेव किं
च अविद्यायां नित्यं भावानां वदनुप्रष्टव्यः किमितरनिरपेक्षाऽविद्यैव कारणं उताहो ईश्वरादिकारणांत
रसापेक्षा नाद्यः कारणवैचित्र्याभावेन कार्यवैचित्र्यानुपपत्तेः चेतनाधिष्ठानमंतरेण जडशक्तेः कार्य
कारित्वानुपपत्तेश्च नापरः अविद्याकारणवादिनाप्यध्यक्षेश्वरादेः कारणत्वस्यावश्यं वक्तव्यत
त्वात् लाघवान्नैत एव विचित्रकार्योपपत्तौ किमज्ञानेन कारणत्वाभिमतेन कल्पितेन ॥ श्रीरामो जयतु ॥
अदृष्टस्यादेवे=१
कारणत्वस्य=१ त्यर्थः किंच कारणत्वेन स्वीक्रियमाणविद्यानलत्वेन नाऽविद्या वक्तव्या : अचेतनत्वे न हि साक्षात्स्वयमेव कारणभेदस्य
प्रवर्तते चेतनाधिष्ठातृत्वानत्वेन नाधिष्ठिताचेतनस्यापि तदधिष्ठातृत्वेन कारणताप्रसक्तो अविद्याम अविद्या=
न्न कारणवादिवते: तस्माच्चेतनानधिष्ठिता स्वयमेव कार्यकारणाय प्रवर्तत इति वाच्यं तद्दूषयति चेतने
ति प्राक्तिवेनपास्तंमस्माह जडशक्तेरिति कारणांतरसापेक्षेति पक्षं दूषयति नापरः इति कार्यस्य घटादि
निमित्तत्वेनादृष्टेश्वरादिप्रवेशादुपादानापेक्षायामपि मृदादिनापूरणात् किमविद्ययेत्यभिप्रायेणानापर इ
त्यत्र हेतुमाह अविद्ययेति नन्वदृष्टादिवत् अविद्याया अपि प्रमाणसिद्धत्वात्सापि किं न कारणमित्यत श्रुतियाथि=
आह कल्पितेनेति अहमज्ञ इत्यादिप्रतीतेर्ज्ञानाभावविषयत्वस्याप्युपपत्तेर्नाविद्या प्रमाणवतीत्यर्थः ॥ ॥

ॐ

ग्रंथस्य=

वे॰ मु॰ टी॰ १०

अथांतरप्रमेयमुपसंहरति तत इति उक्तयुक्तितइत्यर्थः प्रपंचस्यानत्यतीतेस्याविद्यकत्वोपपादनफलं प्र
पंचस्य ज्ञानसत्त्वमुपसंहरति प्रातीतिकमिति ज्ञानज्ञेययोराविद्यकत्वाज्ज्ञानकालीनैव ज्ञेयसत्ता
न ज्ञानान्यूनाधिकेनोत्तरमिति ज्ञानस्थितिमात्रस्थितिज्ञानानिवृत्त्यानिवर्त्तनेप्रपंचइति ज्ञानएवसत्त्वप्र
पंचइत्युक्तं नत्ववाशिष्ठवाक्यं संवादयति तदुक्तमिति भावाः ज्ञानज्ञेयरूपाः प्रतिज्ञातप्रपंचभेदं
संवादयति तरंगमुद्भूयगच्छंतीति कारणत्वेनोपसंहरत्यस्यमित्युक्तं ननुनत्वर्थिनां तत्त्वत्कारणवि
सिद्धांतिवादः=६ शेषोपपादनेस्वप्नवदुपपादनीयमितिवदंतामृत्तद्घटादीनां कार्यकारणभावपर्यवसानेप्युपेते इष्यतेवा।

ततोप्यस्यातिरिक्तं कृत्स्नं कार्यजातं ज्ञानज्ञेयरूपं तत्सर्वमाविद्यकमेव प्रातीतिकमेवसत्त्वम
र्वस्येतिसिद्धं तदुक्तं अविद्यायोनयोभावाः सर्वेमीबुद्बुदाइव तरंगमुद्भूयगच्छंतिज्ञानैकः।
जलधौलयं २ मृदादीनां कारणत्वं नचेदिष्टं घटं प्रति अविद्यायाः कारणत्वं कथं सिद्धं प्रमा
विना २५ नन्वविद्यायोनित्वंभावानां कार्यकारणसामग्रीकृत्स्नं न वा नचेदविद्यायोनित्वमपि
कथं अस्तिचेत्कार्यकारणभावस्तदा यथायथमन्वयव्यतिरेकादिरेवप्रमाणं तत्रप्रका
(रांतरासंभवात्॥ ॥

आद्ये=२ आद्येशंकते मृदादीनामिति तत्रदूषणं संभावयति अविद्यायाइति का
र्यकारणभावस्यापिस्वीकारादविद्यापिकारणं कथं स्यादित्यर्थ इष्यते चेत्तर्हि सकार्यकारण
भावोमृद्घटादीनां प्रमाणाभ्रमाद्वात्तावद्भावविषयवाधेहिभ्रमत्वंतत्र याच पूर्वोक्तरवदोषः अप्रप्र
माणात्तर्हि घटादीन्प्रत्यविद्याकारणं कारणताग्राहकप्रमाणस्य मृदादिविषयत्वेनाविद्या
विषयत्वाभावादित्यभिप्रेत्याह प्रमांविनेति स्वपदं व्याचष्टे नन्विति अविद्यायोनित्वं कथमिन्न
त्रकार्यकारणभावस्यानंगीकारादितिशेषः यथायथमिति यथायोग्यमन्वयव्यतिरेका दीत्यादि
पदं धर्मिग्राहकमानपरं ततश्चभक्त्यपहारणं मृद्घटादीनामन्वयव्यतिरेकाभ्यां प्राप्तकारणादीनां

भ्रमाच्चेत्तर्हि विषयवाधभ्रमत्वे नयाच कार्यकारणभावाख्यविषयस्य ॰ १० बाधएवेति कार्यकारणभावोनास्तीति कथमविद्यायाः कारणत्वमितिसपदोषः ॥

नन्वविद्योपादानत्वे जगतोऽविद्यावृत्तिग्राह्यत्वं युज्यते घटादिजगतः नाविद्योपादानं घटाद्यर्थिनां मृ
दादिकारणविशेषाद्यानयनदर्शनेनान्वयव्यतिरेकसिद्धमृदाद्युपादानकत्वात् ततः कथमविद्या
वृत्तिभास्यत्वं घटादिप्रपंचस्येति तत्राह एवमिति घटादितावत्कार्यं मध्यमपरिमाणत्वात् व्यतिरेकि
घटादिकार्यत्वं — घ्रात्मवत् न च भावरूपं निःप्रतियोगिकत्वात् एवं सर्वस्मिन् भावकार्ये उपादानकारणाकांक्षाया
मात्मनोऽसंगत्वेनाकारणत्वादविद्यैव कारणत्वेन कल्पनीयेत्यर्थः घटादेरविद्योपादानत्वे
घटाद्यर्थिनां मृदाद्युपादानदर्शनेन घटादीन् प्रति मृदाद्युपादानकल्पनं व्याहन्येतेत्या

८१

एवं घटपटादिकार्यमात्रेण कारणाकांक्षायां कारणत्वेनाविद्यैवोपस्थाप्या तत्तदर्थि
नां तत्तत्कारणविशेषोपादानं तु स्वप्नवदुपपादनीयम्॥ ॥श्रीराम॥

त्याह तत्तदर्थिनामिति आविद्यकत्वमेव न तेषां संभवति यथा च मृदाद्याकारेणाविद्याया एव परिणा
घटादेः=२ — मत्वात्तदुपादानेन मृदादेर्घटादीन् प्रति कारणत्वकल्पनात् आविद्यकत्वाविरोधिनीत्यर्थः तत्र दृष्टा
न्तमाह स्वप्नवदिति यथा स्वप्ने वस्तुतो घटो वा मृद्वा नास्ति किंत्वविद्यैव मृद्रूपतामापाद्याविद्यककुला
आविद्यकं= — लोपात्ता घटादिकमपि तादृशमेवारभते न तत्र रथा इत्यादिश्रुत्या वास्तववस्तुनिषिद्धत्वात् तथा
जाग्रत्कालेऽपि नेह नानास्तीत्यादिश्रुत्या घटादेः प्रपंचस्य निषिद्धत्वात् मायां त्विति श्रुत्या मायाया
याः जगदुपादानत्वश्रुतेः मृदाकारपरिणताविद्यैव घटादिरूपादानमिति न किंचिदपि विरु

प्रपंचविषयप्रदर्शन=१

प्रपंचस्य=२

वे॰ मु॰ टी॰
२६

तत्र हेतुमाह स्वप्नेति पराङ्ग्रपश्यतीति श्रुतिरिंद्रियाणां प्रपंचविषयत्वप्रदर्शने तात्पर्यवती उक्तं तदनुवादेनात्मन इंद्रियाविषयत्वप्रदर्शनपरा नाद्यः निःप्रयोजनत्वे श्रुतेस्तात्पर्याभावात् द्वितीये पीदं चिंत्यं अनुवादः किं प्रमाणसिद्धस्य भ्रमसिद्धस्य वा नाद्यः प्रपंचप्रमां प्रति इंद्रियाणां कारणग्राहकप्रमाणस्यान्वयव्यतिरेकादेरन्यथोपपन्नत्वेनाप्रमाणत्वात् भ्रमसिद्धानुवादरूपत्वेनेंद्रियाणां प्रपंचविषयप्रमाकरणत्वे न प्रामाण्यमित्यर्थः प्रमामात्रे इंद्रियाणां कारणत्वमित्याशयः पक्षः भ्रमकारणत्वस्यादुष्टत्वात् प्रमाकरणत्वाभावाच्च न संभवतीत्युक्तं तन्नेत्यप्रमाकरणत्वाभावो दृष्टमानम् इंद्रियाणां कारणत्वेऽपि द्वितीयपक्षोऽपि निरस्त इत्यतिदिशति एतेनेति भ्रममात्रे इंद्रियादीनां कारणत्वेनेति तृतीयपक्षमुपपादयति अस्त्विति किंतु तदेकदेशिनां चोद्यं उक्ते नैयायिकादीनां नोभयथापीति प्रतिजानीते नेति एकदेशिनिरासाय हेतुमाह भ्रमज्ञानस्येति उक्तत्वात्तत्तदादि प्रमाणाविद्या

स्वप्नेंद्रियवत् अन्वयव्यतिरेकभ्रमसिद्धप्रपंचज्ञानकरणत्वानुवादेनात्मन इंद्रियाविषयत्वप्रदर्शने तात्पर्यात् एतेन भ्रमप्रमासाधारणज्ञानेकारणत्वमप्यपास्तं प्रमाकरणत्वस्य निरूपयितुमशक्यत्वात् अस्तु तर्हि भ्रममात्रे कारणता इंद्रियाणां न भ्रमज्ञानस्याविद्यामात्रयोनित्वस्य त्वयैवोक्तत्वात् ज्ञानं प्रति इंद्रियान्वयव्यतिरेकयोश्च स्वप्नेंद्रियान्वयव्यतिरेकवदुपपत्तेः ॥ अन्वयव्यतिरेकयोः=२ नैयायिकादि=२

कारणत्वभावाभावाभ्यामित्यर्थः द्वितीयनिराकरणे हेतुमाह ज्ञानं प्रतीति इंद्रियाणां भ्रमं प्रति कारणत्वग्राहके प्रमाणमन्वयव्यतिरेकौ वा अन्यद्वा नान्वयव्यतिरेकौ स्वप्ने इंद्रियप्रवृत्तेरभावेऽपि इंद्रियान्वयव्यतिरेकदर्शनेन तयोरप्रमाणत्वेन कारणताग्राहकत्वासंभवात् नेतरः तस्यानुपलब्धेरिति न च रूपोपलब्धिः करणसाध्या क्रियात्वात् छिदिक्रियावदित्याद्यनुमानेन चक्षुरादीनां प्रपंचात्मकरूपाद्युपलब्धीः प्रति करणत्वग्राहकमस्तीति चेत् न उपलब्धिशब्देन किं स्फुरणं चिन्मात्ररूपमुच्यते उत वृत्तिः स्फुरणोपहितवा नाद्यः तस्य नित्यं विज्ञानमिति श्रुतेर्नित्यत्वेन करणानपेक्षणात् द्वितीयेऽपि किं अकरणिकैव पक्षः उत चक्षुर्जन्यकरणा चक्षुःकरणिका वा न प्रथमद्वितीयौ बाधात् नांत्यः अन्योन्याश्रयात् चक्षुःकरणकत्वसिद्धौ तत्पक्षकानुमानप्रवृत्तिः प्रवृत्ते चानुमाने चक्षुःकरणकत्वसिद्धिरिति अत एव न स्फुरणोपहितपक्षोऽपि न वा वृत्त्यवच्छिन्नचैतन्यरूपोपलब्धिमात्रपक्षः तस्मादपि तत्र उपसर्गेण मनसा विजानातीति मनसा विद्ययावा ग्यातरात्मनसः स्वातंत्र्येणावच्छिन्नप्रवृत्तेः श्रुतिसिद्धत्वात् विमलं चक्षुः न रूपस्य तदाश्रयद्रव्यस्य वा ग्राहकं महाधारणीयद्रव्यत्वात् घ्राणादिवदिति प्रयोगाच्च एतेन घ्राणादीनां गंधादिग्राहकत्वं व्याख्यातं न च मनोऽपि करणं तत्र किमात्मोपलब्धिं प्रति करणं उतान्यस्यानुपलब्धिं प्रति करणं नाद्यः कर्तृकर्मविरोधात्स्वप्रकाशत्वाच्च नापि द्वितीयः सुखादेः साक्षिवेद्यत्वात् तस्मादेवि

ॐ अबाधितत्वस्यास्तित्वे

चक्षुरादिग्राहकत्वनिराकरणेन=२

श्रोत्रं कीदृशमिति विकल्पात् पूर्वोक्तदेषतादवस्थ्यं स्यात्

आश्रयत्वेन=१ अकरणिकाद्इति पक्षेकरणप्रतिपादनस्यैवयथा
विषयत्वेन=१ द्वितीयपक्षेच चक्षुष्करणप्रतिपादनस्यैवयथात्=६

प्रपंचविषयप्रमां प्रति इंद्रियाणां कारणत्वं ग्राहकत्वं च निरस्तमित्यर्थः ॥

अन्योन्याश्रयत्वात्=४

राम॰
२६

अधिष्ठान=२ चैतन्य=३

अस्त्वधिष्ठानसत्तानविषयः ननु इन्द्रियविषयत्वं च प्रमाणानामपरत्वेन तथापि प्रपंचैकदेशस्य शुक्तिरजतभ्रमस्यादेरधिष्ठा
नत्वेनाज्ञातत्वात् तद्विषयत्वमिंद्रियाणां प्राप्तमिति नेत्याह तथा चेति अज्ञानाद्यवच्छिन्नचैतन्यनिष्ठाविद्याविवर्तत्वा
दज्ञातादेश्चैतन्यमेव सर्वेषु भ्रमाधिष्ठानमिति तद्विषयत्वेनैवेंद्रियाणां प्रामाण्यं वक्तव्यमित्यर्थः इष्टापत्तिं परिहर
ति तच्चेति आत्मविषयत्वेन प्रामाण्यमित्यर्थः आत्मन इंद्रियविषयत्वायोग्यत्वेनेंद्रियाणामात्मविषयाणि न सं
भवंतीति हेतुमाह प्रत्यगात्मन इति विषयेभ्यः प्रकाश्येभ्यो निर्वचनीयेभ्यः प्रत्यग्वैपरीत्येन प्रतिकूलतया चनी
वउपलब्धत इति प्रत्यक् तच्चासावात्मा च तथा च स्वभावनार्थमिंद्रियाणि नात्मानं पेक्षन्त इत्यर्थः आत्मानन्निवर्तक

आत्माकार=२

त्वाकारवृत्त्युत्पत्त्यर्थमिंद्रियाणामपेक्षितव्यत्वमित्याह नन्विति तत्त्वमपेक्षते ज्ञाननिवर्तये इंद्रियाण्यात्मातः
त्यपीन्द्रियाणामनिन प्रवर्तन्ते तत्पादिपुरस्कारेणेंद्रियाणां व्यापारप्रवृत्तिः न चात्मा तत्पादिमान् निर्गुणत्वश्रुतेः ततो

तथा चाधिष्ठानत्वस्यात्मन एव विश्रांतत्वेन प्रपंचस्यात्मविषयाणींद्रियाणि प्रमाणानीति वक्तव्यं तच्च नोप
पद्यते प्रत्यगात्मन इंद्रियाविषयत्वात् तस्य निर्धर्मकत्वात् तथा च श्रुतिः पराञ्चि खानि व्यतृणत्स्व
यंभूः तस्मात्पराङ् पश्यति नांतरात्मन्निति न चानयापि वक्तुं त्वाइंद्रियाणां प्रपंचविषयत्वं दर्शित
मिति वाच्यम्

नेंद्रियविषयत्वमात्मनो युक्तमिति हेत्वंतरं निर्धर्मकमात्मनींद्रियाणि न प्रवर्तंत इत्यत्र श्रुतिं प्रमाणयति
तथा चेति स्वयंभूरीश्वरः खानींद्रियाणि पराञ्चि पराग्विषयाणीति हेतुगर्भं विशेषणं तेषां हिंसनेन पराग्वि
षयत्वं हेतुरित्यर्थः व्यतृणद्धिंसितवान् अनात्मदर्शनसाधनत्वमेव तेषां हिंसेत्याह तस्मादिति पराङ्प
रांचमित्यर्थः विभक्तिव्यत्ययः छांदसः यस्मात्पराग्विषयत्वमेवेंद्रियाणां तस्मादिंद्रियैर्भोक्ता पुरुषः परांचम
नात्मानमेव पश्यति नांतरात्मानं निर्धर्मकत्वादित्यर्थः ततश्च प्रपंचवत्तत्साधनत्वाभाववदात्म
ज्ञानेऽपि साधनत्वाभावान्नेंद्रियाणां क्वापि प्रामाण्यमिति भावः ननु तस्मात्पराङ् पश्यतीति श्रुतिरिंद्रियाणां
प्रपंच प्रमां प्रतिसाधनत्वं प्रतिपादयंती तेषां प्रपंचविषयत्वं दर्शयतीति कथं न तेषां प्रामाण्यमिति नेत्याह न चेति

176

प्रमांप्रति=३ भ्रमविषयव्यावृत्तार्थः=२

प्रमामात्रे इंद्रियादीनां कारणत्वे निपट्टं दूषयति नाद्य इति प्रमात्वस्यान्योन्याश्रयत्वेन दुर्ग्रहत्वादिति
हेतुमाह इंद्रियेति भ्रमव्यावृत्तार्थत्वं प्रमाज्ञानाधीनज्ञानं प्रमाज्ञानं च तादृगर्थज्ञानाधीनमित्यन्योन्या
श्रय इत्यर्थः ततश्च प्रमाया दुर्ज्ञानत्वात् तां प्रतीन्द्रियादेः कारणत्वं दुर्ग्रहमिति भावः अर्थस्य भ्रमव्या
वृत्तत्वं प्रमाविषयत्वे न प्रयोजकं शुक्तौ रजतभ्रमाबाधादिति प्रमाविषयरजतस्य भ्रमे विषय अर्थस्य
धित्वाऽदर्शनादिति दूषणान्तरमाह न चेति सत्यत्वं भ्रमव्यावृत्तत्वं प्रमाविषयत्वमिति यावत् ननु
नार्थस्य भ्रमव्यावृत्तत्वं प्रमाविषयत्वेन साध्यते येनान्योन्याश्रयव्यभिचारौ स्यातां किं त्वबाधितत्वेन
तेनेत्याह अबाधितत्वेति अतोऽन्यदार्त्तं नेह नानास्ति किंचनेत्यादिश्रुत्या द्वैतमिथ्यात्वबोधनादसि
द्धेरित्यर्थः चक्षुरादीनां प्रमाकारणत्वलक्षणं प्रामाण्यं स्वीकृत्य प्रमाया दुर्ग्रहत्वात् तन्निरूपितं का

नाद्यः इंद्रियादिजन्यज्ञानप्रामाण्यं भ्रमविषयव्यावृत्तार्थविषयत्वेन साधनीयं भ्रमविषयव्या
वृत्तत्वं च प्रमितिविषयत्वेनेत्यन्योन्याश्रयात् न च प्रमितिविषयत्वमर्थसत्यत्वे हेतुरपि
मिथ्या रजतमिति प्रमित्या असत्यस्यापि विषयीकरणात् अबाधितत्वस्य चासिद्धेः किंच इं
द्रियाणां प्रमाणत्वेनाज्ञातार्थविषयत्वं वक्तव्यं अधिष्ठानमात्रविषयत्वं प्राप्तं प्रपंचस्य सर्वस्य ज
डत्वेनाज्ञातत्वाभावात् ॥

रणत्वं दुर्ग्रहमित्युक्तं इदानीं चक्षुरादेः प्रामाण्यमेव नास्तीति वक्तुमुप
क्रमते किंचेति अनधिगतार्थगंतृ प्रमाणमिति प्रमाणविदां स्थितेरज्ञातार्थविषयानुभवजननद्वारा इंद्रि
याणामज्ञातार्थविषयानुभवजननद्वारा इंद्रियाणामज्ञातार्थविषयत्वं वाच्यं अस्तु को दोष इति चे
त्तत्राह अधिष्ठानेति तस्यैवाज्ञातत्वादिति शेषः अधिष्ठानस्यैव विषयत्वं कुत इत्यत आह प्रपंचस्येति
अज्ञाते हि विषयः प्रमाणानां अज्ञातत्वं चाधिष्ठानस्यैव न प्रपंचस्य तस्य जडत्वेनाहेतेः तस्य पुनर
ज्ञानविषयत्वलक्षणाज्ञातत्वकल्पने प्रयोजनाभावात् विमतः प्रपंचो नाज्ञातः जडत्वात् व्यतिरेकेण

प्रपंचस्य=२ २विषयः=१

अत्र प्रपंचज्ञाने भ्रमज्ञानाद्विशेषस्तथापि किमित्यंशे सिध्यतीत्याशंक्याह तस्मादिति तस्मात्ज्ञानात्प्राग्
यथोक्तन्यायेनार्थसत्वस्यावश्यंस्वीकर्तव्यत्वादित्यर्थः अवश्यंभावे हेतुमाह अन्यथेति प्रपंचज्ञानो
त्पत्तेः प्राक्प्रपंचसत्वानभ्युपगमे प्रपंचज्ञानस्य प्रपंचलक्षणार्थेन्द्रियसन्निकर्षकारणत्वेना
विद्यायोनिमात्रत्वापत्तेः भ्रमरूपत्वेव स्यात्स्वप्नमेवेति लक्षणमित्यर्थः आकाशादिप्रपंचज्ञानस्येन्द्रियादि
कारणकत्वेन भ्रमाद्वैलक्षण्यानुपपादनार्थं प्राग्ज्ञानस्य सत्वमंगीकर्तव्यमित्युक्तं न तु दूषयितुमुप
क्रमते मैवमिति कारणत्वे इति प्रपंचज्ञानं प्रतीति शेषः प्रपंचज्ञानं प्रति इन्द्रियकारणत्वं ग्राहकान्वय
व्यतिरेकाविन्युक्तं निरस्यति स्वप्नभ्रमइति मैवमिति प्रतिज्ञायां हेतुं वदन् श्लोकं व्याचष्टे इन्द्रियादेरि

तस्मात्प्रपंचस्याज्ञानसत्वाभ्युपगमो ऽवश्यंभावी अन्यथा वैलक्षण्यानुपपत्तेः मैवं इन्द्रिया
णां कारणत्वेभवेद्धोर्यं तदा तव स्वप्नभ्रमे यथा नैवाभन्वयव्यतिरेकधीः २४ इन्द्रियादेर्वस्तु
तः प्रपंचज्ञानं प्रत्यकारणत्वात् कुत इति चेत् तत्र मतांतरं किमिन्द्रियादेः प्रमितिमात्रे कार
णता किं वा भ्रमप्रमासाधारणज्ञानमात्रे भ्रममात्रे वा ॥ ॥ ॥ ॥ ॥

ति अकारणत्वादिति हेतुमुपपादयितुं जिज्ञासामाह कुत इति चेदिति अकारणत्वमुपपादयति तत्रे
ति इन्द्रियादेः कारणत्वे विना कार्यं कारणमिति नियमाभावादिन्द्रियकारणत्वे कार्यं निरूप्यं वक्तव्यं का
र्यस्य च दुर्निरूपत्वान्न तन्निरूप्यमिन्द्रियकारणत्वमसदित्यर्थः न दर्शे कार्यस्य दुर्निरूप्यत्वमुपपादयि
तुं विकल्पयति किमित्यादिना प्रमाकार्यतानिरूपितकारणत्वमिन्द्रियादेरित्याद्यविकल्पार्थः न
च प्रमात्रेनेन्द्रियादेः कारणत्वं ईश्वरप्रमायाव्यभिचारादिति वाच्यम् मात्रचो वधारणार्थत्वेन का
त्स्न्यार्थत्वाभावात् आद्यप्रतिद्वंद्विकल्पमाह किं वेति अत्र विकल्पे कारणत्वविवक्षाया
मात्रचो वधारणार्थत्वम् ॥ श्री रामचंद्राय श्रीरामानुजाय कमलदलविपुलनयनाभिरामा

प्रमायामेव न भ्रमादौ १८   ईश्वरप्रमायामिन्द्रियकरणत्वाभावात् = २

तथापीति उक्तयुक्त्या प्रपंचस्य भ्रममात्रशरीरत्वेन प्रातीतिकत्वे साधिते पीत्यर्थः ननु प्रपंचज्ञानस्याविद्याजन्यत्वमर्थविषयत्वं च रज्जुसर्पज्ञानतुल्यं ततः कथं तस्मिन् रज्जुसर्पज्ञानाद्विशेषस्तत्राह प्रत्यक्षादीति कारणकृतो विषयकृतश्च प्रपंचज्ञाने सर्पज्ञानाद्विशेषोस्ति तथाहि प्रपंचज्ञानस्य प्रत्यक्षादिप्रमाणकारणकत्वभावोऽविद्याकारणकत्वाभावश्च सर्पज्ञानाद्विशेषः सर्पज्ञानेऽविद्याकारणकत्वभावः प्रत्यक्षादिप्रमाणाजन्यत्वं च विशेष इति तयोर्ज्ञानयोः कारणकृतो विशेष इत्यर्थः प्रपंचसर्पज्ञानयोर्विषयकृतं विशेषमाह नहीति यादृशमज्ञातसत्तामित्यर्थः कुतोऽसंभावनेत्यत्र हेतुमाह भ्रमादिति ज्ञानमात्रशरीरत्वादित्यर्थः भ्रमविषयादिंद्रियजन्यज्ञानविषयस्य विशेषमाह इंद्रियादीति इंद्रियादिभ्योजा

तथापि रज्जुसर्पज्ञानादाकाशादिप्रपंचज्ञानेऽस्ति कश्चिद्विशेषः प्रत्यक्षादिप्रमाणाविद्याकारणकत्वभावाभावाभ्यां नहि यादृशमर्थमिंद्रियादिजन्यज्ञानं विषयीकरोति तादृशमेवाविद्याजन्यभ्रमोपीति संभवति भ्रमात्पूर्वं विषयस्यासत्वात् इंद्रियादिजन्यज्ञानस्य सन्निकर्षादिजन्यत्वेन ज्ञानात्पूर्वं विषयसत्वस्यावश्यंभावात् अन्वयव्यतिरेकाभ्यां चेंद्रियादेः कारणत्वस्य सिद्धत्वात्॥ श्रीरामजी॥

तस्येत्यर्थः सन्निकर्षेति इंद्रियार्थसन्निकर्षजन्यत्वात्प्रत्यक्षज्ञानस्य [प्रत्यक्षज्ञाने] तत्कारणत्वेन सन्निकर्षस्य ज्ञानात्पूर्ववृत्तित्वमावश्यकं तदाधारत्वेन ज्ञानात्पूर्वं घटस्यापि वृत्तित्वमेवेत्यर्थः सन्निकर्षादित्यादिपदेन लिंगादिसंग्रहः अनुमितिरूपज्ञानस्य लिंगज्ञानजन्यत्वात् लिंगस्य च पक्षव्याप्तिघटितत्वात् पक्षसाध्यघटितत्वात् ततोऽनुमित्युत्पत्तेः प्राक्साध्यसत्वमवश्यमित्यर्थः न च भविष्यदर्थकानुमितौ व्यभिचारः तत्रापि भविष्यदर्थस्यानुमितेः पूर्वं विद्यमानत्वात् नह्यनुमितिप्राक्काले भविष्यदर्थो नास्ति तथा सति वर्त्तमानार्थकानुमित्यापत्त्या भविष्यदर्थकानुमितित्वासिद्धेः ततः कथं तत्रापि व्यभिचार इति शब्दार्थसंबंधज्ञानजन्यत्वात् शब्दकरणकज्ञानात्पूर्वमेव सर्पसत्ताप्युक्तेति प्रपंचमि

प्रपंचज्ञानसर्पज्ञानयोः=५

विषयस=

सन्निकर्षाधारत्वेन=१ सर्पस्यात्पूर्वकाले वर्त्तमानभाविध्यति अ मतेस्तत्तिष्ठर्द्दमाने त्वात् सप्रति पत्त्यमु भविष्यद र्थकानुमितौ व्यभि चार इति न च वाच्यम्=३ पक्षः भविष्यदर्थस्य विद्यमानप्रागभावप्रतियोगित्वं पक्षे मानुमितेः

अनुमितिप्राक्काले भविष्यदर्थो पूर्वविद्यमानत्वात् ३= भविष्यदर्थकानुमितावपि=१

नास्तीत्यभ्युपगमे सति=२ वाच्यवाचकसंबंधप्रत्यक्षार्थयोः २ शाब्दज्ञानस्यापि शेषः=१

प्रत्यक्षादिप्रमाणजन्यत्वं प्रपंचज्ञाने सर्पज्ञानाद्विशेष इत्यत्र ... प्रपंचज्ञानस्य प्रत्यक्षादि ... प्रमाणमात्र ... क्वचित्॥

श्लोकपूर्वार्द्धं व्याचष्टे तथापीति उत्तरार्द्धं सिद्धांतत्वेन व्याचष्टे एकस्यामेवेति सर्वेषां विशेषदर्शनाभावे हे
तुमाह मंदांधकारेति दशानामपि प्रत्यभिज्ञा सर्पैकविषया किं न स्यादिति तत्राह तत्रेति पृथगेव सर्पो
नुभूयत इत्यत्र हेतुमाह स्वस्वभ्रमइति देवदत्तस्य रज्जुविषयेद्भ्रमाकारांतःकरणवृत्तिप्रतिबिंबितचैतन्यनि
ष्ठाऽविद्यात्मकभ्रमसिद्धः पृथगेव सर्पो देवदत्तेनानुभूयते नैकः सर्वैरित्यर्थः ननु यद्येको घटः सर्वैरनु
भूयते एवं भ्रमसिद्धो विषय एक एव सर्वैरनुभूयतामित्याशंक्य स्वस्वेति विशेषणस्वारस्येन हेतुमाह अन्यभ्रम
ति अज्ञातत्वे हेतुमाह अन्यभ्रमस्येति देवदत्तांतःकरणप्रतिबिंबितचैतन्यनिष्ठाविद्यात्मको भ्रमो देवदत्तो

तथापि ज्ञानसत्वानभ्युपगमे सुप्तप्रबुद्धस्य स एवायं प्रपंच इत्यप्रत्यभिज्ञानेकागतिरिति चेत् एकस्यामेव रज्ज्वां
मंदांधकारवर्तिन्यां दशानां युगपत्सर्पभ्रमेणापलायमानानां परस्परसंवादेन एक एव सर्पः सर्वैरनुभू
त इति प्रत्यभिज्ञायां सत्यामपि ततो पृथक् तत्र हि स्वस्वभ्रमसिद्धः सर्वैः पृथक् पृथगनुभूयते विषयः अन्यभ्रम
सिद्धस्यान्येन ज्ञातुमशक्यत्वात् अन्यभ्रमस्याज्ञानात् अविवेकादेव तु तत्र प्रत्यभिज्ञानमेक एव सर्पः
सर्वैरनुभूयत इति एवं जाग्रदवस्थायां प्रपंचमनुभूय सुषुप्तिं गत्वा पुनरुत्थाय योयं प्रपंचानुभवः स प्र
पंचांतरमेव विषयीकरोति प्रत्यभिज्ञानं त्वविवेकादेव न च सुषुप्तौ प्रपंचविलये प्रमाणाभावः ॥ ॥

तत्र कारणापहृतेदुर्ज्ञेयत्वाद्देवदत्तान्येन ज्ञातुमशक्य इत्यर्थः नन्वेवं युक्त्या सर्पादिभ्रमविषयभेदश्चेत्तर्हि कथं
सर्पाद्यैक्यानुभवस्तत्राह अविवेकादिति अतिसादृश्यात्सर्पादीनां भ्रमसिद्धानां परस्परभेदाग्रहादै
क्यानुभव इत्यर्थः एवं दशानां युगपत्सर्पभ्रमेयद्यदित्यं तद्व्याख्यातं तथैव सत्येन द्वारव्यानुसुप्तक्रमेते
एवमिति सप्तार्थो ग्रंथः यद्यपि जाग्रदवस्थायामेव द्रष्टृत्तराभ्युत्तरविनाशित्वाज्ज्ञानस्य मानयोगाद्दोभप्रपं
चस्यापि नाशः साधयितुं शक्यते तथापि भिद्यमानप्रमाणमन्यायमाश्रित्यावस्थात्प्रपंचभेदमुक्त्वा
नित्यदोषः ननु प्रत्यभिज्ञानमुभयवादिसिद्धं न च तस्य भ्रमत्वं बाधकाभावात् न चोक्तयुक्तिर्बाधिका मूल
प्रमाणाभावेन तत्साभासत्वात् ततोऽवस्थाद्वये ऽपि प्रपंचाभेदः तत्राप्यैक्यानुभवादेव प्रपंचैक्य

. एक एव सर्प इति प्रत्य
भिज्ञायां = २

सएवायं प्रपंच इति प्रत्यभिज्ञानं २ अन्वयव्यतिरेकं = १

=सामान्याकारेण ज्ञानं विशेषाकारेण ज्ञानमिति= ५

ज्ञानं ज्ञानं प्रतिज्ञानं=　　　　　बेदद्त्तौ=

नैष दोष इति चेत् तत्राह द्वैतभेद इति प्रतिज्ञानं द्वैतभेद इत्यन्वयः स एवायं घट इति तदेवेदं गृहमित्यादिप्रत्य-
भिज्ञाप्रतिज्ञानं घटादिभेदेन स्यात् प्रत्यभिज्ञाविषयघटाद्यभेदस्याभावादित्यर्थः विषयाभावे किं प्रत्यभिज्ञा
स्वरूपमेव न सिध्यतीत्युच्यते तत्प्रामाण्यं वा नाद्य इत्याह दृशानामिति कालान्तरीयपृथक् सर्पभ्रमे प्रत्य
भिज्ञैव नास्ति इति तदर्थं युगपदित्युक्तं प्रमास्थले विषयभेदः विप्रतिपत्तेर्भ्रमइत्युक्तं एतदुक्तं भवति देव
दत्तचदृषो रज्जुलक्षणाधिष्ठानसंयोगे सति दोषवशाद् रज्जुत्वाकाराकारेदमाकाराज्ञानस्फुरणवृत्तिर्जाय
ते तत्र प्राक्संस्कारवशाद् इदमवच्छिन्ने इदमाकारे देवदत्तान्तस्करणवृत्तिप्रतिबिंबितचैतन्यनिष्ठावि
द्या दृश्यासती सर्पतद्ज्ञानाकारेण विवर्तते स च जायमानः सर्पोयदेतत्स्फुरणवृत्तिप्रतिबिंबितचैतन्य

द्वैतभेदप्रतिज्ञानं प्रत्यभिज्ञा कथं वद। दृशानां युगपत्सर्पभ्रमे यद्वत्तथैव सा॥२२॥

स्य निष्ठाविद्याविवर्त्तत्वं प्रत्येकं जायते तेनैव चत्तायते वृत्तेरपि तद्विद्याविवर्तत्वात् एतेन मैत्रादि सर्पभ्रमा
व्याख्याताः तस्माद् दृशानां रज्ज्वधिष्ठानसर्पभ्रमे युगपज्जाते दृशां सर्पो स्तत्तज्ज्ञानानामिव भेदोवजायते त
था च सर्पैक्याभावेपि यथा तेषामेक एव सर्पः सर्वैरनुभूयत इति प्रत्यभिज्ञानं स्वरूपेण जायते
तथेहापि विनैव विषयैक्यं प्रत्यभिज्ञा स्वरूपमुपपद्यते अथ विषयाभावे प्रामाण्यं न स्यादित्युच्यते
तत्राह एवेति तथैव सा सा प्रत्यभिज्ञा विषयाभावेपि स्वाद प्रमा च तद्वदेवेत्यर्थः॥श्रीरामजी॥

प्रमा स्थले घटेपटमिन्ना हे
वेदनमते ईशस्यमेदाई
यभेदः जीवे भेदाना नीति
विप्रतिपत्ति भ्रमविषय भेदे
विप्रतिपत्ति नी त्तीति=

सर्पभ्रम=

जागरेपि=२

ओं

रज्जुसर्पादि=२ पूर्वपक्षी तर्क=३ शुक्तिरजतादौ=२

एवं तत्र दृष्टांतावष्टंभेनाकाशादिप्रपंचस्यानिर्वचनीयत्वमंगीकृत्याज्ञातसत्त्वं साधनीयमिति स्थितं तदेतत् दूषयति
नहीति दृष्टांतदार्ष्टांतिकयोर्वैषम्यपरिहारायेति शेषः दृष्टांते च ज्ञातसत्त्वस्यानिर्वचनीयत्वेनोपपादितत्वा
दाकाशादेरपि तथैव स्वीकर्तव्यमित्याह यद्यज्ञातमपीति अज्ञातसत्त्वसाधकतर्कमन्यद्दूषयति नचेति यसत्त्व
निष्फलत्वप्रसंगादित्यसिद्धेरित्यनुमाह बाधकेति जागरावस्थायां दृष्टांतमेव प्रवृत्तिमात्रेण स्वप्नप्रपंचवदित्यनुमा
नादपि प्रपंचस्याज्ञातस्य सत्त्वमिति निरस्तं तत्राह स्वप्नेति नच बाधितत्वोपाधिर्नो दृष्टांत इत्याह नचेति भ्रमकालस्व
प्नावस्थायां वा जागृदवस्थायामिव बाधाभावात् उपाधिः स्वप्नदृष्टांते साध्यव्यापक इत्यर्थः बाधस्य तथात्वं तु स्वप्नल
ण धर्मिण एवाभावादुपाधिसाध्ययोर्व्याप्तिग्रहणालक्षणादिव्यवहाराभावादुपाधेः साध्यव्यापकत्वस्य प्रमाणाभावादित्याह
तर्हि तत्र यादृशं सत्त्वं तादृशमेवाकाशादेः प्रपंचस्येति स्थिते विवेचनीयं किमज्ञातसत्त्वं किं वा प्रातीतिकमेव यद्यज्ञातम
पि सत्त्वमाकाशादेः कल्प्यते तदा कथमयं दृष्टांतो दार्ष्टांतिके साम्यं स्वेनोपसंहृत्येन विरोधात् नचगत्यन्तराभावात् स्यात्।
तन्निश्चयेन रोदनादिप्रसंगो दोषाय बाधकप्रमाणस्याप्रवृत्तत्वेनाभावनिश्चयानंगीकारात् स्वप्नवत्सर्वव्यवहा
रस्योपपादितत्वाच्च नचतत्र बाधोस्तीति वैषम्यं भ्रमावस्थायां कुत्रापि बाधस्यानंगीकारात् प्रमाणप्रवृत्तौ वा
धेपि न कश्चिद्दोषः तदानीं भ्रमसिद्धेन व्यवहारानभ्युपगमात् नच त्रिविधसत्त्वाभ्युपगमविरोधः सर्वस्यैव
तस्य प्रातीतिकसत्त्वमपरित्यज्यैवेतर्भ्रांतसंतोषमात्रस्य कृतत्वात् प्रातीतिकत्वेपि प्रपंचस्य भ्रांतबुद्धिसिद्धा
वांतरवैषम्यमाश्रित्य व्यावहारिकसत्त्वाभिधानाविरोधात्॥ = ॥
प्रमाणप्रवृत्ताविति तदानीमिति बाधकाल
इत्यर्थः भ्रमावेन भ्रमसिद्धस्याभावादित्यर्थः त्रिविधसत्त्वांगीकरणानुपपत्तिरज्ञातसत्त्वकल्पिकेति यदुक्तं तदनूद्या
तस्योपपत्त्या दूषयति नचेति व्याख्यातार्थः पूर्वमेव ग्रंथः स्वप्नवद्दृष्टिसृष्टिः तत्सर्वमेव हति द्वाभ्यां प्रपंचो नात्र दो
षोस्तीति तस्य परिहृतत्वात् १ आत्माज्ञानं देवादिदेहाकारेण तदुपकरणब्रह्मांडाकारेण तत्तद्रूपाकारेण च प
रिणमते तत्र वृत्तिकालीना एव तत्तत्पदार्था न वृत्तेः पूर्वं नाप्युत्तरमनुवर्तंते वृत्तिसमकालीनाज्ञाना एव तत्त
त्पदार्थाः संति घटादयः इत्युक्तं तत्रेदं विचार्यते वृत्तिः किमाबाधमनुवर्तते उतान्तरविनाशिनी नाद्यः
सुषुप्त्याद्यभावप्रसंगात् वृत्त्यंतराभावप्रसंगाच्च ज्ञानानामयौगपद्योपगमात् न द्वितीयः वृत्तिसामान
योगक्षेमस्यैवैतत्प्रपंचस्याप्यनुतरविनाशित्वप्रसंगात् ज्ञानोत्पत्त्यनुत्पत्तिप्रसंगात् ज्ञानभेदे प्रपंचभे

पूर्वपक्षी=३
दृष्टांते रजते ज्ञातस्यैव सत्त्वं दार्ष्टांतिके त्वज्ञात स्यापि २=

वृत्तिद्वयं चेत्तत्राह ज्ञानानामिति=१ वस्तुतस्तु=
वृत्तिश्चेदाबाधमनुवर्तते तर्हि वृत्त्यंतराभावप्रसंगः नहि वृत्तौ सत्यां वृत्त्यंतरं संभवति २२
ज्ञानानामयौगपद्योपगम्यात् यदि वृत्तेः सत्या वृत्त्यंतरस्वीकारः तर्हि यौगपद्यं न स्यात्=२

शिव.

उक्तयुक्त्या प्रवृत्तिनिवृत्त्योरुत्पन्नोनिःप्रयोजनविशिष्टज्ञानमुच्छिद्यतेतिभावः
सतिहिविशेषणविशेष्यभेदग्रहेविशिष्टज्ञानंजायते इदंरजतमिति=२=

=शुक्तिरजतभेदग्रहात३=

अनिर्वचनीयत्वंकचित्सिद्धमित्याशयमवलंबते सिद्धमिति अनिर्वचनीयमितिशेषः अयमर्थः इदंरजतमितिर
जतत्वेविशिष्टाकारापुरोवर्त्तिविषयिणी प्रतीतिरस्तिनवा नास्तिचेत्तर्हि रजतार्थिनः पुरोवर्त्तिनिप्रवृत्तिर्नस्यात्त प्र
वर्त्तकज्ञानाभावात् विवेकाग्रहात्प्रवृत्तिरितिचेत् तर्हिविवेकाग्रहात्निवृत्तिरपिस्यात् विशिष्टज्ञानोच्छेदा
पत्तेश्च अस्तिचेत्तर्हि साप्रतीतिनिर्विषयिणीसविषयिणीवा नतावदाद्यः निर्विषयज्ञानायोगात् साको
ख्यादापत्तेश्च सविषयिणीचेत्त तर्हितस्याःप्रतीतेर्विषयःसन् असन्वा नतावदसन् अपरोक्षत्वेनाप्र
तीतेः संश्चेत्त सकिंपुरोवर्त्तिनिसन् स्थलांतरेवा पुरोवर्त्तिनिचेत् तर्हिभ्रांतिबाधोनस्यात्तो द्वितीये इद
मालोचनीयं तत्स्थलांतरंकिंबुद्धिःउतकोनाकरादि नतावदाद्यः प्रमाणाभावात् नहिरजतमिदमिति

इदंरजतमितिप्रती
तिः=४

इष्टांताभावात्कथमाकाशादेरनिर्वचनीयत्वंसाधनीयं सिद्धंशुक्तिरूप्यादिकमितिचेत्।।श्रीरामजी।।

नेदंरजतमितिप्रत्ययस्य=१ प्रपंचकारणात् अर्थानेदंरजतं अपितुशुक्तिरेवेति=२

प्रत्ययोबाधेदंरजतमितिबाधप्रत्ययेस्यात्तदारजतस्यधीरूपताभावेइयमिदंकारस्यइदंरजतवेदकत्वादाद्यस्यबा
धकप्रत्ययस्यापिइदमितिपुरोवर्त्तितोरजतादिविवेचकत्वान्नितत्वकार्थत्वाभ्यांधीरूपरजतानिरूपणाच्च कां
ताकरादावेवरजतंसदितिचेत्न तस्याग्रहणानुपपत्तेः व्यवहितत्वान्नचक्षुस्तत्रगच्छतिदोषात्तकृ
इतिचेत् किंदोषमात्रादुतदोषसहकृतचक्षुषः नतावदाद्यः अंधस्यापितत्प्रतीतिप्रसंगात् नद्वितीयः
अंतरालवर्त्तिनांपदार्थानामपिचक्षुषाग्रहणप्रसंगात् ततोरजतंपुरोवर्त्तिनिनसन्नाप्यसत्तविरोधा
दुभयात्मकमपिन ततोनिर्वचनीयमेतदितिसिद्धंभ्रमविषयोऽनिर्वचनीयइति।।श्रीरामचंद्रायनमः

नेदंरजतंशुक्ते=१

ततोऽप्यपिपाठः=

चक्षुरहितत्वादिति
दोषमात्रत्वात्=३

भ्रमविषयस्यरजतादेः प्रतीतिसमकालीनत्वात् तस्यैवसत्त्वमिति=१
[illegible]कल्पनापत्तेः धियोनित्यत्वात् रजतस्यबुद्धिकार्यत्वात्=५

[illegible]
ततोऽपाठे=२

तत्वोपाधेः = १

ॐ

वे॰मु॰टी॰

२१

तदेन बाधितत्वोपाधिना दूषयति नेति उपाधेः साध्यव्यापकत्वमुपपादयन् वैषम्यं स्वप्नप्रपंचस्य जागराद्बाध
जागरेति साधनाव्यापकत्वमाह इहत्विति इह जागरे साक्षात्का रात्पूर्वमिति सिद्धान्त्यभिप्रायेणैक
देशिमताभिप्रायेण वा जाग्रद्दृष्टप्रपंचोऽबाधितत्वादज्ञातोपि सन्निति तु नोक्तं दूषयति अत्राकुरिति एक
देशिमतनिराशेन्नैवनेत्यायकादीनामपि मतं निराकृतं भविष्यतीत्यभिप्रायेणैकदेशिनो मतं निरा
कर्तुं पृच्छति सत्वत्रयमिति प्रश्नमाह सत्यमिति प्रश्नं द्वेधा विकल्प्याद्यं दूषयति नेति द्वितीय
मिष्टापसिद्ध्या दूषयति असत्य इति श्लोकं व्याचष्टे किं द्वैतमिति नेति संगृहीतमाद्यनिराकरणं स्पष्ट
यति नाद्य इति हेतुमाह प्रत्यक्षादीति निरस्तत्वात्प्रत्यक्षादिप्रमाणानां प्रमात्वं परतो यदीत्य

नैवषम्यात् जागरबोधुनतस्यबाधात् इह तु साक्षात्कारात्पूर्वं तद्भावादिति अत्राकुः
सत्वत्रयं वदन्ते वादी प्रष्टव्यात्राधुना मया सत्त्वं द्वैतमसत्त्वं वा नाऽसत्त्वे त्रिविधं कुतः २१ किं द्वै
तं पारमार्थिकमाश्रित्याज्ञातसत्त्वं साध्यते उताऽनिर्वचनीयं प्रथमतः क्वचित्सिद्धं नवा न
नाद्यः प्रत्यक्षादि प्रामाण्येन निरासेन निरस्तत्वात् अन्ते तु अनिर्वचनीय (चेन्नहि।।

त्वत्पर्यः असत्त्वे त्रिविधं कुत इति संगृहीतं व्याकरोति अन्त्य इति अनिर्वचनीयमिति सत्त्वेनासत्त्वे
न सदसद्भ्यां च यत् निर्वचनार्हं तदनिर्वचनीयमित्यर्थः क्वचित्तु किरजतादौ अन्तिमपा
द्यमनूद्य निराचष्टे न चेदिति अयमर्थः आकाशादिप्रपंचस्यानिर्वचनीयत्वमंगीकृत्याज्ञा
तस्य सत्त्वं साधयितुमिच्छसि तत्रेदं विवेचनीयं प्रपंचस्यानिर्वचनीयत्वं किं प्रत्यक्षादनुमानाद्वा
नाद्यः स्पष्टप्रत्यक्षसिद्धत्वे वादिनां विवादाभावप्रसंगात् द्वितीयस्त्वेतन्नाह तर्हीति अनिर्व
चनीयत्वसाधकस्य प्रकृतत्वप्रयोगमाह प्रथमत इति नैदंगीकारेणाज्ञातसत्त्वस्यैकदेशिनासा

अनिर्वचनीयत्वांगीकारेण = १

शिव॰

२२

श्लोकं व्याचष्टे नन्विति यावताऽज्ञानस्यापीत्यत्राज्ञातस्येति पदच्छेदः ज्ञातस्य सत्त्ववदिति दृष्टान्तार्थोपि ग्राह्यः अ
भ्युपगच्छेतीत्यत्र नैयायिकादय इति शेषः अस्मदेकदेशिनो वा द्वैतस्याज्ञातस्य सत्त्वे विवरणाचार्याणामंगी
कारं प्रमाणयति अतएवेति पारमार्थिकसत्त्वं तथा व्यावहारिकं अज्ञानोपाधिकं सत्त्वमिति त्रैविध्यमित्यर्थः
कथं सत्त्वत्रैविध्यमज्ञातस्य द्वैतस्य सत्त्वोपपादकं तत्राह नचैतदिति तत्त्रिविधसत्त्वांगीकरणमित्यर्थः त
त्र हेतु प्रातीतिकेति प्रातीतिकं सत्त्वं शुक्तिरूप्यादेः प्रपंचस्य पारमार्थिकं ब्रह्मणः सर्वथा बाधरहितत्वा
दित्युभयविधसत्त्वस्वीकारेण दृग्दृश्यपदार्थस्वरूपनिरूपणोपपत्तौ सत्त्वत्रैविध्यांगीकरणं वृथा स्या
दित्यर्थः आविद्यकं हि रजतादि ज्ञातमेव सद्भवति प्रपंचस्य पुनरविद्यानुपादानत्वादज्ञातस्यापि सत्त्वमि

ननु कथमेवमुच्यते तेनानुभूयमानं द्वैतं नास्तीति यावताऽज्ञातस्यापि द्वैतस्य सत्त्वमभ्युपगच्छेति
त्रिविधसत्त्वांगीकरणं = ३ अतएव त्रिविधसत्त्वमंगीकुर्वन्ति वृद्धाः नचैतदज्ञातसत्त्वानभ्युपगमे उपपद्यते प्रातीतिकपार
मार्थिकभेदेन द्वैविध्यस्यैव संभवात् अन्यथा गृहान्निर्गतस्य भुजगभयादिसकलसाधनज्ञातम
प्यतज्ज्ञाननिश्चयेन शोकाग्निना दह्यमानस्य च तन्नामरणप्रसंगः ननु स्वप्नवज्जागरेपि प्रती
तीतिकत्वसंपन्नेनैव द्वैतेन व्यवहारः किमिति नोपपद्यते इति चेत्
तिभावः एवं त्रिविधसत्त्वांगीका
रानुपपत्तिमज्ञातद्वैतसत्त्वे प्रमाणयित्वा विपक्षे दंडमाह अन्यथेति एवं प्रमाणयुक्तिभ्यां प्रपंचस्याज्ञात
तद्धेत्वाशंकाः = २ स्यापि सत्त्वमिति स्थापितं ननु साधनज्ञातदर्शनाभावेन तद्भावनिश्चायकः सुषुप्तौ दर्शनाभावेपि त नच साधनज्ञातस्य =
साधनज्ञातस्य भुजगादि = २ द्भावनिश्चयाभावात् निश्चये वा सुषुप्त्युच्छेदापत्तेः नापि सत्त्वत्रैविध्यमज्ञातसत्त्वोपपादकं प्रतीति
कसत्त्वे सत्त्वांतरभेदात् सत्त्वत्रैविध्योपपत्तेः नचाज्ञातसत्त्वस्य रजतादेर्व्यवहारानुपपादकत्ववत् द्वैत अपरोक्षविषयीकृतं ज्ञातं = ४
ज्ञातसत्त्वस्य = प्रपंचस्य व्यवहारोपपादकत्वं न स्यादिति वाच्यं स्वप्नदृष्टगजतुरगादेर्ज्ञातसत्त्वस्यारोहणादिव्यवहा
रोपपादकत्ववज्जाग्रत्प्रपंचेपि ज्ञातसत्त्वएवोपपादकः [illegible] स्यादिति दृष्टान्तेन सिद्धान्ती शंकते न
न्विति रजतादेरपि प्रवृत्त्याद्युपपादकत्वमस्त्येवेति भावः [illegible] जागरावस्थद्वैतेऽज्ञातमेव सद्भवितुम
र्हति व्यवह्रियमाणत्वात् स्वप्नप्रपंचवदिति विवक्षितमनुमानमित्यर्थः ॥ श्रीरामचंद्राय नमः ॥

वे.मु.टी २.

घटपटादि=४

अनेकदेहादिजगद्विभ्रमोपादानाविद्यायास्तत्त्वसाक्षात्कारान्निवृत्त्यवस्थायां न जीवान्तरविभ्रमो नापि जगद्विभ्रम इति
फलितमाह तस्यामिति अत्र तु संग्रहश्लोकः ब्रह्माज्ञानादीक्षजीवादिभावस्तज्जाग्रत्स्वप्नसुषुप्तिविभक्तिः स्या।
त्मज्ञानादनर्थानिवृत्तेर्नान्यो जीवो नास्ति चात्र तन्मन्यत् अस्माज्ञाने देवादिशरीराकारेणात्र प्रकरणाज्जगदा
कारेण च परिणमते तदेवाज्ञानं तत्र वृत्त्याकारेण विषयितां चैतन्यसंबंधायोपधिरूपेण परिणमते सा च बोधरूपा मेदाकार।
विद्यावृत्तिर्ज्ञानाभास इति यस्य तत्र चोक्ते विषयोपि तत्र स्फुरति ततो विषयस्य देवादिदेहस्य जगतश्चावि
द्यावृत्तेश्च सर्वेषामविद्योपादानत्वादविद्यायाश्चाद्वैतसाक्षात्कारान्निवृत्तेर्नान्तरीयाः इति तन्निवृत्तौ विश्व
मज्ञानेनास्तीति पूर्वमुक्तं तदसहमानः शंकते अज्ञानसत्त्वामिति अननुभूयमानं द्वैतं नास्तीति वक्तुं वेदा

घटपटाद्याकार=४ वृत्तिः=४

द्वैतनिवृत्ति=१

तस्यामवस्थायां ननु तदन्यः कश्चित्संसारी तेन ताननुभूयमानं द्वैतं वा किंचिदस्तीति रहस्यं अज्ञातस
त्त्वेन सृष्टं चेत् व्यवहारः कथं भवेत् न ह्यदर्शनमात्रेण विषमो नाशनिश्चयात्॥ १॥ ॥ ॥

ज्ञानं=१ अपरोक्षाविद्यानिवृत्तिः विषयत्वात् प्राप्तमेवाज्ञाते=२

विषयस्य वृत्तिः सहकारेणैव त्वचित्स्वीकारात् अज्ञातसत्त्वाभावे नाज्ञातज्ञापकत्वप्रमाणगम्यत्वानंगीकारात्=३

अज्ञातमपि जगद्देवेति घटपटादौ प्रतीतिसमको तीनमेव जगतः सत्त्वं प्रतीति व्यतिरेकेण सत्त्वं नास्तीति सिद्धांतिमतं=४

तीप्रश्नश्च: अनुभवशब्देन प्रमाणज्ञानं मोहो स्विदविद्यावृत्तिरिति नाद्यः विषयस्याज्ञातसत्त्वाभावेन प्रमाणि
कत्वानंगीकारात् द्वितीयश्चेत् न ह्यपरोक्षात्मातत्त्वविवर्तत्वात् प्रपंचस्याविद्यावृत्तेश्चाप्यपरोक्षत्वस्वरू
पत्वात्प्राप्तानध्यपरोक्षवस्तुन्यज्ञानविवर्तरजतं तत्र ज्ञानं चापरोक्षं दृष्टं प्रपंचे ततश्चापरोक्षाविद्यावृत्तिविषयत्व।
मज्ञातस्य द्वैतस्य सत्त्वेन सृष्टं चेदिति सिद्धांतिमतानुवादः एवमनन्यसिद्धांतिमते निराचष्टे व्यवहार इति
परोक्षपुत्रादिविषयोपादाननिवृत्तिरूपो व्यवहारः परोक्षार्थाभवात्तस्यादित्यर्थः इष्टापत्तिं परिहरन्नाह
नहीति अदर्शनमात्रेण नाशनिश्चयाद्विषमो न हीति योजना। ततश्च नाविद्योपादानं जगदसदि
तिभावः॥ ॐ नमः कमलदलविपुलनयनाभिरामाय॥ ॐ श्रीलक्ष्मीनृसिंहाय नमः श्रीरामो जयति॥

शिव-
२-

अधिकार्यनुभवमुपपादयति अहंपुनरिति ब्राह्मणस्यैवात्राधिकार इति द्योतयितुं ब्राह्मणग्रहणं क्रमसंन्या-
सनियमाभावं द्योतयितुं कुमारग्रहणं श्रवणादिप्रवृत्तौ प्रतिबंधाभावं द्योतयितुमाह तेषामिति नमस्का-
रादिनेति इत्थंभावे तृतीया पूजादिरूपामित्यर्थः पादसेवादिसंग्रहायादिपदं स एव ईश्वरोपि सन्निति
योजना आत्मनोऽज्ञानवशात्॥

अहंपुनः कश्चिद्ब्राह्मणकुमारः तेषां भक्तिश्रद्धानमस्कारादिनाऽनुष्ठाय श्रवणादिसाधनं संपाद्य मोक्षं साधयि-
ष्यामीतीश्वरोपि सन् भ्रांतो भवति जागरे पुनर्यथोक्तजागरप्रपंचमुपसंहृत्य स्वप्ने निद्रादोषसहकृतः तादृ-
शमेव प्रपंचं परिकल्पयन् तत्र देहेंद्रियसाध्यभोगं भुंक्ते विशिष्टहृद्यो मुक्तो अन्येवहं अहमपि कश्चिदु-
द्धः दुःखी संसारी मुक्तो भविष्यामीति कल्पयित्वा पुनस्तमपि स्वप्नमुपसंहृत्य जागरं सुषुप्तिं वा सर्व-
भ्रमनिवृत्तिरूपां प्राप्नोतीति एवं सति एक एवात्माऽविद्यया स्वप्रकाशानंदैकस्वभावः स्वाज्ञान-
वशाज्जीवः संसारीत्यादिशब्दाभिधेयो भवति ननु तत्त्वः कश्चित्संसारी संभावयितुमपि शक्य इ-
ति स्थितं तस्यैवानादिसंसारसंचिततपःशक्तिचयविशिष्टशरीरकस्य ब्रह्मविरोधापादिसंपत्कस्य ज्ञानाभ्या-
सार्थप्रसादात्तादिना आकस्मिके तदैकाग्र्यकालादिसमेतिन श्रवणादिसाधनपरिपाकस्य यदा तत्त्वम-
स्यादिवाक्योत्थसाक्षात्कारउदयमासादयति तदाऽज्ञानतत्कार्यं सर्वमुपसंहृत्य स्वानंदस्वरूप-
स्वमहिम्नि स्थितो मुक्त इति व्यवहारभाग्भवति॥

वस्तुपरमेश्वरस्य जगद्रूपतावस्थावत्त्वपरिकल्पनेति ह्येतमर्थमाह एवमिति ब्रह्मैव स्वाज्ञानवशा-
त्संसरतीति जीवादिशब्दभाग्भवतीत्यर्थः कल्पित एव जीव इति कश्चित्तं प्रत्याचष्टे ननु तद्वत् इति
मुक्तिसंसारयोर्वैयधिकरण्यापातादित्यर्थः एवं ब्राह्मणः स्वाविद्यया संसारित्वं प्रतिपाद्य

ग्र॰ ४ — आत्मानं

आत्मनः ३९

जीवभेदानुभवं प्रतिपादयितुमाह श्रोतव्यमिति स एव जागरे इति भ्रान्तो भवतीति योजना सकः इत्यपेक्षायामा
ह एक इति आत्म इति शेषः एकस्त्रिविधपरिच्छेदशून्यः भेदाभेदनिरासायएवकारः तदेवाह नित्य इति नि
त्यैति कुतस्तस्य नित्यत्वमित्यत आह शुद्धेति अविद्यातत्कार्यरहित इत्यर्थः अविद्यकस्याविद्यापाश्रया
नित्यत्वादात्मनश्च तद्रयत्वान्नित्यत्वमित्यर्थः आत्मनोऽविद्यातत्कार्यरूपस्याभावे हेतुमाह बुद्धेति
जडरूपाविद्याया तत्कार्याच्चाचिद्रूपस्यात्मनोऽन्यत्वं मुक्त इत्यर्थः नन्वात्मा संसारी सच्चावि
द्याकार्यइतीनेत्याह मुक्तस्वभाव इति संसारित्वधर्मस्याविद्याकार्यत्वेपि विशेषस्वरूपेनक

देवादिदेहोपकरणत्वेन =

कार्यस =

[illegible]

श्रोतव्यं सावधानेन एक एव नित्यशुद्धबुद्धमुक्तस्वभाव उपनिषन्मात्रगम्यो वस्तुतोऽस्ति
स एवाज्ञानमाश्रित्य जीवभावं लब्ध्वा देवतिर्यङ्मनुष्यादिदेहान्परिकल्प्य तदुपकर
णत्वेन ब्रह्माण्डादिचतुर्दशभुवनं सृष्ट्वा तेषु देहेषु कश्चिद्देवः कश्चिन्मनुष्यः कश्चिद्धिरण्य
गर्भः सर्वेषां स्रष्टा कश्चिद्विष्णुः पालकः कश्चित्तदन्यः सर्वसंहारकर्ता रुद्रः प्रलये तेषामु
(पाधयः सत्त्वादिगुणाः तद्वशात्तेषां सर्वसामर्थ्यम्
पस्थितमित्यर्थः विमुक्तश्च विमुच्यत इतिश्रु
तिप्रमाणयतीति उपनिषदितिं प्रश्नेत्यादि संवादे विसंवादे उपनिषदां तत्राप्रामाण्यं स्यादतोय
(सफले — निष्फले)
यति मात्रेति अत एवाह वस्तुत इति ननु शुद्धे चैतन्ये स्वप्नजागराद्यवस्था संभवति तस्याजीवध
र्मत्वादित्यत आह स एव जीवाभावं लब्ध्वेति नहि मुक्ते संसारित्वविरुद्धरूपवत्त्वप्रसंग इत्यत आ
ह अज्ञानमाश्रित्येति शुक्त्यज्ञानकल्पितरजतवत्पूर्वोक्तात्माज्ञानकल्पितत्वाज्जीवभावस्येति
नविरुद्धरूपवत्त्वप्रसक्तिरित्यर्थः जीवभेदानुभवमुपपादयति देवेत्यादिना जगदनुभवमुपपादय
ति तदुपकरणत्वेनेति देवादिपरामर्शार्थस्तच्छब्दः तद्वशादिति सत्त्वादिगुणवशादित्यर्थः

अवस्था = २

त्व ४

त्रिव
२९

नहियत्र एकात्मसंयोगासमवायित्वं तत्रानेकशरीरनिष्ठचेष्टात्वं योग्यनेकशरीरचेष्टायां तदभा
भावात्

१ = एकशरीरमात्रनिष्ठचेष्टाभावेपि एकात्मसंयोगासमवायि(त्वात् = १

किंचानेकशरीरवर्तिन्यश्चेष्टा एकात्मसंयोगसमवायिन्यः चेष्टात्वात् एकैकशरीरमात्रसमवेतचेष्टाव
त् नचैकशरीरमात्रनिष्ठचेष्टात्वमुपाधिः योग्यनेकशरीरचेष्टासु साध्याव्यापकत्वादित्यभिप्रेत्य एके
नात्मनानेकदेहचेष्टोपपत्तौ दृष्टांतमाह नैयायिकानामिति तत्रीयमुत्थापयति तद्देवेति योगिदे
हेत्यर्थः शरीराननुप्रविष्टस्याविद्यावच्छिन्नस्य साक्षिणोनुसंधानमापद्येत शरीरावच्छिन्नस्य वा नाद्यः इ
ष्टापत्तेः नद्वितीयः उपाधिभेदादित्याह अविद्यावच्छिन्नं प्रतीत्यादिना तत्रापि योगिदेहेष्वित्यर्थः क

नैयायिकानां कायव्यूहदशायां योगिदेहवत् तद्देवेहानुसंधानप्रसंग इति चेन्न अविद्यावच्छि
न्नं प्रतीष्टत्वात् तत्र तद्देहावच्छिन्नं प्रतितदप्यभावात् आत्ममात्रस्यानुसंधातृत्वात् अतए
वैकस्मिन्नपि देहे पादावच्छिन्नः शिरोवच्छिन्नस्य सुखं नानुसंधत्ते पादे मे सुखं शिरसि मे वेद
नेत्यनुभवात् तथाचेदहमनुभवामीत्येव जीवभेदानुभव इति स्थितं तथापि कथम
ज्ञानुभव इति चेत् ॥

तर्हि योगिदेहेष्वनुसंधानादर्शनेपि तदर्शनायामाह आत्ममात्रस्येति अज्ञानमा
त्रोपहितस्येत्यर्थः उक्तमर्थमनुभवेन दृढयति अतएवेति उक्तयुक्त्या अज्ञानानवच्छिन्नस्य स्वप्ने
प्रत्यक्षेणानुमानाद्वाभेदस्याननुभवाज्जीवभेदानुभवो देहभेदमेवावलंबत इति सिद्धमिति नावि
निगमो दोष इत्युपसंहरति तथाचेति एवं दृष्टांते स्वप्ने दृष्टे कथं प्रतिपाद्य दार्ष्टांतिकेपि दृष्टेकत्वे
जीवभेदानुभवस्य च शरीरभेदविषयत्वं प्रतिपादयितुमर्थाद्बद्धमुक्तादिव्यवस्थां चोपपादयितुं जिर
ज्ञासामुत्थापयति तथापीति अजाग्रदवस्थायां जीवभेदानुभवादित्यर्थः ॥ ॥ ॥

ॐ

किमज्ञानोपहितजीवभेदं प्रत्यक्षमवगाहते उतानुमानं नाद्य इत्याह नहीति अयमर्थः किमेकमज्ञान-
मनेकजीवोपाधिरुत प्रतिजीवं भिद्यते ज्ञानमिति नाद्यः उपाधेरभेदे उपहितभेदाप्रमाणात् इत्युक्तं द्वितीयश्चे-
न्नाह नहीति परस्याज्ञानवत्परज्ञानस्याप्यतीन्द्रियत्वान्नदवच्छिन्नानामन्योन्यभेदो ग्रहीतुं शक्यते इत्य-
र्थः यद्यपि प्रत्यक्षं न जीवभेदं स्वविषयमवगाहते न च व्याप्त्यनुमानमपि जीवभेदे इति द्वितीयमुत्थापयति न-
पापीति शरीरत्वस्य व्यवस्थापकत्वेनाधर्मादिनिमित्तत्वात्कार्यत्वाद्धि शरीरक्रियाचेष्टानामतश्चेदेहभे-
दाद्भिद्यते नत्वपादानसमवेतः प्रयत्नवदात्मसंयोगाश्रयस्य शरीरस्यासमवायिकारणं चेष्टा चेतना-
ऽहमसमवायिकारणमनुमापयन्ती असमवायिकारणविशेषवत्तयात्मानमनुमापयति स चात्मा प्र-
तिदेहं भिन्नः अन्यथा एकस्मिन्देहे चेष्टमाने सति सर्वदेहाश्चेष्टेरन् चेष्टाहेतोरात्मशरीरसंयोगस्य वि-
द्यमानत्वात् तस्मात्तत्तच्छरीराधिष्ठातृतत्तच्छरीरचेष्टया पृथगनुमीयते इति स्वेष्टजीवभेदो ॥

प्रयत्नवदात्मसंयोगं=८
आत्मैकत्वस्वीकारे=८

नहि परज्ञानावच्छिन्नः परस्य प्रत्यक्षो भवितुमर्हतीति तथापि तत्तद्देहचेष्टयानुमीयते इति चे-
न्न एकेनाप्यनेकदेहचेष्टोपपत्तेः
न्नुभयसिद्ध इत्यर्थः तमेतं पक्षं दूषयति नेति हेतुमाह एके
नेति अयमत्रार्थः तत्तच्छरीरचेष्टया पृथगात्मानुमीयते इति कुतः किमेकस्मिन्देहे चेष्टमाने सर्वदे-
हाश्चेष्टेरन्नित्यतिप्रसंगात् किं वा एकस्मादात्मनोऽनेकदेहचेष्टानुपपत्तेः अथ वानेकशरीराधिष्ठातुरेक-
त्वस्वीकारे शरीरान्तरकृतकार्यानुसंधानप्रसंगादिति आद्यं दूषयति नेति न ह्यात्मसंयोगमात्रं चेष्टा-
या हेतुः किंतु प्रयत्नवदात्मसंयोगः प्रयत्नश्च यच्छरीरावच्छेदेनोत्पद्यते तच्छरीरचेष्टाया हेतु-
रिति कथमतिप्रसंगः स्यात् तत्तद्देहारंभकधर्मादिनिमित्तस्य नियामकत्वात् नातिप्रसंग इत्यर्थः
द्वितीयं दूषयति एकेनेति चेष्टावच्छरीरवर्त्तिनी स्वासमवायिकारणमात्मशरीरसंयोगमपे-
क्षते संयोगविशेषणमात्मा एको वाऽनेको वेत्यत्रोदास्ते तेनाऽन्यथानात्मभेदानुमीयत इत्यर्थः ॥

स्मरण=

चेष्टा=२ चेष्टया=१

अन्योन्यकोपि तेषां मध्ये
ऽन्यतरेषामनुभाव्यत्वात् =२

तेषामिति अनुभूतानामज्ञानोपहितानामित्यर्थः नन्वेतेषामनुभूतानां मध्ये एकः सत्य अन्ये कल्पिता इत्यनुपपन्नं
अनुभूतानामनुभाव्यत्वेन शुक्तिरजतवत्कल्पितैकरूपत्वात् अनुभवितुरेव सत्यत्वादिति मैवं सर्वेषामह
नामनुभवितृत्वस्यापि विद्यमानत्वात् किमेक एव परमार्थतोऽनुभवितेति लाघवात् अन्येऽप्यज्ञानाद्यनुभ
वितारोऽपि कल्पिता एवेति कल्पनाया युक्तत्वादिति प्रथमं दूषयति नाद्य इति अविरोधादिति अ
नेकदृष्टृकल्पनाप्राप्तसंशयादिनाऽनिर्मोक्षप्रसंगलक्षणाविरोधाभावाद्देहानामदृष्टृत्वादित्यर्थः ननु

स्वप्नेऽन्ये जीवाः कल्पिता इति कोऽर्थः किं देहा देवगन्धर्वादिसंज्ञकाः कल्पिताः उताऽज्ञानोपा
धिको जीवोऽस्मदभिमतस्तादृशा एव बहवोऽनुभूतास्तेषां मध्ये एकः सत्य अन्ये कल्पिता इ
ति नाद्यः देहानां कल्पितत्वेऽप्यविरोधात् नहि देहस्य वा देहावच्छिन्नस्य वा श्रवणाद्यधिकारि
त्वं ब्रूमः येनाविनिर्मोक्षः स्यात् न द्वितीयः अज्ञानावच्छिन्नस्य स्वप्ने भेदानुभवात् ॥

संशयादिना अनिर्मोक्ष
लक्षणः =२

देहस्य वा तदवच्छिन्नस्य वा द्रष्टृत्वादीनां कल्पितत्वात् कथमनेकेषु द्रष्टृष्वेकेन कल्प्यन्ते इति कथं न
पूर्वोक्तविरोध इति तत्राह नहीति द्रष्टृ हि श्रवणादावधिकारी अज्ञानाश्रयः स च द्रष्टा देहो वा तद
वच्छिन्नो वा न ज्ञानाश्रय अज्ञानकार्यत्वेनाज्ञानाश्रयत्वानुपपत्तेः ततो देहादिकल्पनेऽपि कः
परमार्थसत्यः श्रवणाद्यधिकारी तस्य विनिर्गमात् प्रवृत्तेरनिर्मोक्षापत्तिलक्षणो विरोधो नास्तीत्यर्थः
स्वप्ने जीवभेदाननुभवं तत इति परोऽह नद्वितीय इति यद्यप्यहमज्ञ इत्यज्ञानोपहितमात्मानमनुभव
त्येव स्वप्नदृक् तथापि जीवभेदं नानुभवतीति हेतुमाह अज्ञानेति ॥ श्रीरामानुजाय नमः ॥

तर्कविरोधाभावेप्यनुभवविरोधः स्यादितिशंकते तथापीति अनुभवस्य चिदज्ञानकल्पितदेहभेदविषयत्वेन ।
भ्रमत्वान्नतेनश्रुतिबाधोयुक्त इतिअभिप्रेत्यपरिहरति भवतुतर्हीति अभिप्रायमविद्वान्दृष्टांतदार्ष्टांतिकैक्यां ।
कुर्वन्निदृष्टमाशंकते ननुयथेति ननुस्वप्नद्रष्टापरमार्थसत्य इतिप्रतीतिः स्वप्नकालेतन्निवृत्युत्तरकाले वा ।
नाद्यः जागरेपितत्संभवे तथात्वानिश्चयाभावात्कथंनश्चरो ब्रूहि । द्वितीयेपि स्वप्ननिवृत्युत्तरकाले
इवजागरनिवृत्युत्तरकालेभविततथमनयाइतीत्यानचसायुज्यते तथाहिजागरनिवृत्युत्तरकालः किंस्वप्नका
लः सुषुप्तिकालोवामुक्तिकालोवा नाद्यः स्वप्ननिवृत्युत्तरकालेएवतादृक्प्रतीतेरदृष्टस्वीकारात् न ।

= स्वप्ननिवृत्युत्तरकालेपरमार्थसत्य इतिपदत्रयुरसीकृत्यतत्रस्वप्नका
लेतादृशप्रतीतिस्वीकारेपूर्वापरविरोधात् = १

तथापिवद्दवोजीवाअनुभवसिद्धा इतिचेत् भवतु तर्हि स्वप्नवद्व्यवस्था ननुयथास्वप्नेएकएवस्वप्नद्र ।
ष्टापरमार्थसत्यः अन्येतद्भ्रमकल्पिताः सर्वे एवंजागरेपिएकएवपरमार्थसत्यः अन्येसर्वेकल्पिता त
थाचबहूनांमध्येकोसावेक इत्यनिश्चयेएकः श्रवणादौप्रवर्ततेतिसाधनानुष्ठानाभावः निर्मोक्षप्रसं
(गइतिचेत् नूनंदेहात्मवादमाश्रित्यभ्रांतोसि कथमितिचेत् शृणु ।

विशिष्टज्ञानभावादेव = १
अहंपरमार्थसत्यमन्येकल्पिता इति = १

द्वितीयः सुषुप्तौविशेषज्ञानाभावात् अंत्यएवनतृतीयः प्रमातृत्वाभावात् ततोऽसदेतच्चोद्यमिति चेन्मैवं
अर्थापरिज्ञानात् नह्यसौबंधयत्स्वप्नद्रष्टेत्येवंवेदेति किंतुस्वाप्नपदार्थस्य तद्द्रष्टृविद्याविवर्तत्वात् स्वप्नद्र

स्वप्नप्रपंचजनका = ३
यस्यश्रवणादौप्रवृत्तिः
स्यात् २ =

ष्टृत्वतादृशाऽविद्याधिष्ठानत्वात्परमार्थसत्यतेतियुक्त्यानिश्चिते तद्दृष्टांतेनात्रापिजागरेतथात्वसंभावना
यांबहूनांद्रष्टृणांमध्येकस्याविद्याविवर्तोऽयंप्रपंच इतिसंशयः स्यादेवनिश्चयहेत्वभावादितियुक्तंनो
द्यमितिजागरेअनेकद्रष्टृणांनिरूपणाभावात्संशयानुपपत्तेःश्रवणादौप्रवृत्त्युपपत्तेःनानिर्मोक्षप्रसंग इति

स्वप्नप्रपंचजनकः ४ = येनस्वप्नद्रष्टापरमार्थसत्य इतिप्रतीतिः स्वप्नकाले इत्यादिविकल्पावकाशः स्यात् = १७

194

ननु वेदस्याद्वैत एव तात्पर्यमित्यनुपपन्नं तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेद इति श्रुतिर्वामदेवोक्तानात्मानुक्त इति
प्रतिपादयन्ती भेदमपि गोचरयति तत्कथमद्वैतमेव श्रुतिगोचर इति शंकते वेद एवेति योयो देवानामित्यादिश्रु
तिसिद्धाद्वैतसाक्षात्कारिणां देवादीनां संग्रहायादिपदं यथाश्रुतमंगीकरोति सत्यमिति तर्हि जीवभेदः सिद्ध इ
ति चेत् तत्रेदं वक्तव्यं किमिदं वाक्यं साक्षाज्जीवभेदमापादयति उत तद्धैतद्दर्शनेनात्मानं प्रपश्यन्परोक्षीकु
र्वन्नहं मनुरासमित्येवं साक्षात्कुर्वन्नहं मनुरभवं सूर्यश्चेत्येवं जातीयकान्सर्वभावापत्तिप्रतिपादकान्मंत्रान्
ति
प्रतिपेदे दृष्टवानिति श्रुतेरर्थस्त्वनुपपत्त्या जीवभेदः कल्प्यत इति आद्यं दूषयति तस्य जीवेति तस्य तद्धैतदित्यादि
वाक्यस्य भेदाप्रतिपादकत्वं च भेदस्यापदार्थत्वेनावाक्यार्थत्वात् भेदाकारज्ञानाजनकत्वाच्चेति ननु वामदेव

वेद एव वामदेवादेर्ज्ञानं श्रूयत इति चेत् सत्यं तस्य जीवभेदाप्रतिपादकत्वात् श्रुतार्थानुपपत्त्या क
ल्प्यत इति चेन्न निश्चितार्थजीवैक्यप्रतिपादकवाक्यान्तरविरोधेन कल्पनानुपपत्तेः ननु एकजी
वपक्षे एकजीवमुक्त्या सर्वमुक्तिप्रसंग इति चेन्न एकत्ववादिनं प्रति सर्वत्वस्यानिरूपयितुमशक्यत्वा

द्वर्तकाज्ञानाद्वामदेवः सर्वभावं प्राप्तवानिति श्रुतेरर्थस्तदोपपद्यते यदि वामदेवपदवाच्यः कश्चिज्जीवो मुक्तो
बद्धान्मुमुक्षोरन्यो भवेत् ततः श्रुतार्थानुपपत्तिर्जीवभेदे प्रमाणिकेति द्वितीयपक्षमुत्थापयति श्रुतार्थेति
कल्पना हि पुरुषबुद्धिमूला सा चाविरोधाधिकरणन्यायेन निश्चितार्थश्रुत्या बाध्यत इति नेति प्रतिज्ञायां
हेतुमाह निश्चितेति एको देवः सर्वभूतान्तरात्मा इत्यादिवाक्यानि जीवैक्यप्रतिपादकानि ननु जीवै
क्यप्रतिपादकवाक्यानां निश्चितार्थत्वं न युक्तं तर्कविरोधादिति शंकते एकजीवेति तर्काभासत्वेन परिह
रति नेति ॥ ॐ नमः श्रीकमलदलविपुलनयनाभिरामाय ॥ ॐ नमः शिवाय ॥ ॐ नमः शिवाय ॥ ॥

तत्रेति प्रामाण्यानुपपत्त्यानुभवानुपपन्नावित्यर्थः कीदृशा इति अर्थक्रियासमर्थो वा परमार्थसत्तो वेति किमाक्षेपः
अपेक्षित इत्यत्रानुभवप्रामाण्यायेति प्राप्तः अन्त्ये वा सा विति तथा चानुभवबलाद्वस्तूपपन्नेति भावः ननु मिथ्या
र्थो न प्रामाण्यं प्रयोजयति भ्रमस्यापि प्रामाण्यापत्तेः किंतु परमार्थसत्त्वं अविद्याकल्पितस्य वस्तुमात्रस्य इदं पारमा
अविद्यानुभवः र्थिकत्वाभावान्न स्वानुभवप्रामाण्योपपादकत्वमित्याशयेन द्वितीयमुत्थापयति परमार्थेति तथा च प्रपंचस्य सत्त्व
त्वे जीवानेकत्वस्य सत्यत्वे किं तत्त्वमिति भावः दूषयति कथमेवमिति वस्तुतत्त्वादिभेदप्रपंचस्य सत्यत्वं कथं भ
विष्यतीत्यर्थः भेदप्रपंचः सत्य एव कथं न भविष्यतीति चेत्तत्र वक्तव्यं किमद्वैतग्राहकप्रमाणाभावाद्द्वैतसत्त्व
त्वं शंक्यते उत भेदमिथ्यात्वग्राहकाभावाद्वा नाद्य इत्याह एकत्वस्येति तात्पर्यग्राहकषड्विधलिंगोपेतो वे

तत्र वक्तव्यं कीदृशो विषयोऽपेक्षितः व्यवहारयोग्यश्चेद् दृश्यते वासौ परमार्थसत्यश्चेत् कथं
मेवं भविष्यति एकत्वस्यैव वेदतात्पर्यविषयत्वात् तत्रैव फलसंबंधात् भेदस्य च सर्वस्य प्रति
पत्त्याबाधो नेति नेतीति वाक्येन निषिध्यमानतया मिथ्यात्वस्य सिद्धत्वात् ॥ ॥ ॥

देशकालवस्तुभिः =१

दस्तत्त्वमस्यादिवाक्यं त्रिविधवस्तुपरिच्छेदशून्यं वस्तुस्वरूपं परमार्थतो बोधयति ततः परिच्छेदा न परमार्थ
सत्या इत्यर्थः महावाक्यस्याद्वैतमात्रविषयत्वे हेतुमाह तत्रैवेति अध्ययनविधिर्हि फलवदर्थावबोधा
पाध्यापयति वेदवाक्यानि फलवांश्चाद्वैतसाक्षात्कार एव तरति शोकमात्मविदिति आदिश्रुतेः अतोऽ इत्यादी निषाठे ३
द्वैतप्रतिपादन एव फलसंबंधो नान्यत्रेति अद्वैतवेदतात्पर्यगोचर इत्यर्थः द्वितीयं दूषयति भेदस्य चेति
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

195

करणाभावादितिहेतुमाह एकेति एकस्यवामदेवस्यश्रवणादिसाधनसंपन्नस्यतत्त्वमस्यादिवाक्यात्तत्त्वसाक्षात्कारात्स
कलसंसारोपादानाविद्यानिवृत्त्यात्मकमुक्त्यानुभवोत्पत्तिहेतवंतःकरणेंद्रियादेर्विषयस्यवद्धमुक्तादेश्च संसारस्यो
च्छेदादनुभवस्वरूपलाभोनस्यादित्यर्थः वामदेवप्रसिद्धेनशरीरावच्छिन्नंचैतन्यमुच्यते उतानवच्छिन्नमत्रानिचै
तन्यं नाद्यः तस्यकल्पितत्वेवद्धमुक्तत्वानधिकरणत्वात् अविद्यावान्हिवद्धः नचावच्छिन्नमविद्यावत्
अविद्योत्तरभावित्वात् तेनावच्छिन्नंचैतन्यंनवद्धं अतएवनमुक्तं वद्धोहिमुच्यते अथानवच्छिन्नमत्रानि

एकमुक्त्यासकलसंसारोच्छेदादितिचेन्न अंतःकरणादेर्यथापूर्वमाविद्यकस्यस्वीकारात्क
रणानुपपत्त्यभावात् विषयाभावात् प्रामाण्यानुपपत्त्यानुपपन्नोऽनुभवइतिचेत्न
ऽनुभव=

अंतःकरणादेः=

चैतन्यंवामदेवप्रसिद्धार्थः तर्हितदज्ञानंननिवृत्तमहमज्ञइतिप्रतीतेरेव ततश्चाज्ञानकार्यस्यतद्विविधकर
णस्य यावदज्ञानसद्भावादनुभवोपपत्तिरित्यभिप्रायेणपूर्वपक्षनिषेधंप्रतिजानीते नेति उक्ताभिप्रायं
प्रकटयितुं नेतिनिषेधेहेतुमाह अंतःकरणेति अयमर्थः अनुभवोनसंभवतीतियदुक्तं तत्कुतःकिं
करणाभावाद्विषयाभावाद्वा नाद्यइत्याह अंतःकरणादेरिति आदिपदंवा इंद्रियलिंगशब्दादेर्ग्राहकं
ननुतेषांस्वीकारेहेत्वापत्तिरित्तिनेत्याह आविद्यकस्येति द्वितीयेपीदंचिंत्यं विषयःकिमनुभवस्वरूपो
अनुभवस्य= पयोगीतत्प्रामाण्योपयोगीवा नाद्यः विषयासत्वेप्यतीतादिज्ञानदर्शनात् द्वितीयंशंकते विषयाभावा
दिति ननुकिंप्रामाण्येनस्वकारणादुत्पन्नोऽनुभवोऽनुपपत्तिंपरिहरिष्यतीतितत्राह प्रामाण्येति अनुप

ओं
वे॰मु
१५

श्प्रपंचरचनोपपादिकाऽविद्या सा च लाघवादेका तादृगविद्योपाधिक आत्मा जीवो भवन्नेक एव भवतीत्युक्तो तत्र जीवै
क्ये बंधमोक्षादिव्यवस्थामुपपादयितुं जिज्ञासामुपस्थापयति बंधमोक्षेति तव मते एकस्मिन् जीवे सति तत्त
ज्ज्ञानात्प्राक् बद्धस्यैव व्यवहारो भवेत् तत्त्वज्ञानोत्तरकाले व्यवहर्तुरभावान्मुक्तव्यवहारो न स्यात् इत्यपत्तेर्बद्धमुक्ता
विति संप्रतिव्यवहारोऽत्र तो जीवैक्ये नोपपद्यतेति वा नानुपपन्न इत्यर्थः उत्तरमाह यथेति जीवभेदे यथा दृष्टं जग
त्कश्चित्तु बद्धः कश्चिन्मुक्त इति व्यवह्रियमाणं जीवाभेदेपि तथैवास्तु बंधमुक्तिव्यवस्थायां जगदस्त्वित्यर्थः
ननु जीवाभेदे तदनुपपन्नमित्युक्तं सत्यमुक्तं परं त्वनुपपत्तिर्न संभवति नहि दृष्टेऽनुपपन्नं नामेत्यभिप्रेत्य
